CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 46

Title KUMARASAMBHAVA

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 46 Subject: Kāvya - Poetry

Title: Kumārasambhava, with comm. by ? Vatsa

Author: Kālidāsa Scribe:

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.9" by 4.2" Extent: 130 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: Complete upto seven cantos

कुमारसंभवनीटीका
पत्र १३० आगीहोत्रीदि
वनीपत्र १२०

॥श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः। पूर्वापरौ तो-
यनिधी वगाह्य स्थितः पृथिव्या इव मानदंडः॥१॥ ॥उत्तरस्यां दिशि कौवेर्यां ककुभि नगाधिराजोऽस्ति पर्वताधि-
राजो विद्यते। अघाः चिवर्णितान गच्छंतीति नगाः पर्वतास्तेषां अधिराजो नगाधिराजः अत्यंत राजेऽयं अधिराजः नगानां
पर्वतानां मध्येऽधिकं राजते शोभते नेन नगाधिराजः। किंनामा हिमालयो नाम हिमस्य आलयो हिमालयः हिमानां
वस्थिति किंविशिष्टः अयं हि स्फुटं निश्चितं मानसी तस्याः आत्मा हिमालयः। अथवा हिमं कर्पूरादि वस्तु तस्य आलयः
आलयः। अत्र नाम शब्दः प्रतीति द्योतकः संज्ञावाचकः। किंविशिष्टः नगाधिराजः। देवतात्मा देवता स्वरूप आत्मा स्वरूप
देवतात्मा। ननु दृषन्मयाः पर्वताः कथं देवतात्मानो भवंति। अयं पर्वतानां देवस्वरूपे एकैकः वरमपरं जंगमं च। यत्स्थावर
तत्पाषाणमयं। यज्जंगमं तद्देवमयं। जंगमेन स्वरूपेन देवतानां मध्ये तज्ज्ञ यज्ञभाग विभागं च। अतो देवतात्मा इ-
त्युक्तं तथा वाके। यज्ञांगयोनित्वमवेक्ष्य यस्य। अथ च स्वरूपस्य मा दुह्य माता देवकं घटनो पुनः किंविशिष्टः नगाधिरा ३

ये नर्वस्था सा परिक्लृप्तवत्संमेरौ स्थिते दोग्धरि दोहदक्षे। भास्वंति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीं॥२॥

स्थितः। स्थितः। उर्ध्वमित्यर्थः। किं कृत्वा। तोयनिधी समुद्रौ विगाह्य अभिव्याप्य। तोयानां निधी यौ तोयनिधी तयोर्मिन्ति तौ तोय-
निधिः। तोयनिधिश्च तोयनिधिश्च तोयनिधी। नतु तोयनिधी यः समुद्रा च वार उच्यते इत्यादि। कौ पूर्वापरौ। पूर्वश्च समा-
हर्तश्च अपरश्च पूर्वापरौ। इक्षं कृतः स्वरूपं विंदत्कामणिना श्रीकालिदासेन। कइव। उत्प्रेक्षते पृथिव्या मानदंडइव। प्रमा-
णं वंशाद्वा मतिमतिं नानार्थीदंडः मानदंडः। यावन्मात्रा पृथिवी तावन्मात्रो हिमवान्। यावन्मात्रो हिमवान् तावन्मात्रा
पृथ्वी। न त्वत्र दिशि परुषं किमर्थं उत्तरस्यामित्यनेनैव। सिध्यवाच्यम्। यदि दिशि परुषं न करोति न दातव्यानि
पृथ्वी। नन्वत्र दिशि परुषं किमर्थं। उत्तरस्यामित्यनेनैव। अयं हि पृथिव्याः पृथुचस्या। निमानं अत्र। यदहं पृथ्वी। तस्मा-
मन गरीयस्य नवा। अतः कारणात् दिशि परुषं दत्तं। अयं हि पृथिव्याः पृथुचस्या निमानं अत्र। यदहं पृथ्वी। तस्मा-
मानदंडयतीति। स्फुटयतीति मानदंडः अत्र उपेंद्रवज्रा मेनोक्षंद ॥१॥ ॥पृथ्येसर्वति॥ ॥इवानी पादरानि श्लोके कविहि-
मालयं वर्णयन्नाह। सर्वशैलाः सर्वे मेरु मंदरादयः पर्वताः यं हिमालयं च संपरिकल्प्य तत्सं संप्रवार्य धरित्रीं पृथ्वीं दुदुहुः।
मालयं वर्णयन्नाह। सर्वशैलाः सर्वे मेरुमंदरादयः पर्वताः यं हिमालयं वत्सं परिकल्प्य तत्सं संप्रवार्य धरित्रीं पृथ्वीं दुदुहुः।
का। किं विशिष्टानि भास्वंति दीप्तिमंति। नास्ति वितरीनां तथा नामिनां भवंति। नास्तो विद्वंते यासां नाः। नास्वतः। नास्वंति वेना स्वयस्य नास्वंति नामेन
का। किंविशिष्टानि भास्वंति नास्ति ॥

[illegible]

[illegible]

रागां॥ स हिमालयो ... व्यां दिदिव्यस्सीतिसंबंधः॥४॥ आमेखलं संचरतां घनानां छायामधःसानुगतां निषेव्य। उद्वेजि
ता वृष्टिभिराश्रयंते शृंगाणि यस्यातपवंति सिद्धाः॥५॥ सिद्धा देवविशेषाः यस्य पर्वतस्य आतपवंति शृंगाणि आश्रयंते।
किं कृत्वा ... छायां निषेव्य। किंविशिष्टां छायां। अधःसानुगतां। अधः अधोभागे या निसानूनि तेषु गतां। आ
सानु ... तानां घनानां। आमेखलं यथा भवति तथा। संचरतां संचरंतीति संचरंतस्तेषां संचरतां मेखला
या; आमेखलं मेखलां मर्यादीकृत्य ... ताः सिद्धाः वृष्टिभिः उद्वेजिताः पीडिताः॥ हिमालयो नाम नगा
धिराज अस्तीति संबंधः॥५॥ पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानां। विदंति मार्गं नखरंध्रमु
क्तैर्मुक्ताफलैः केसरिणां किराताः॥६॥ यस्मिन् हिमवति किराताः पुलिंदाः केसरिणां सिंहानां मार्गं पं
थानं मुक्ताफलैः विदंति जानंति। किं कृत्वापि। पदं पादविन्यासं अदृष्ट्वापि। कथंभूतं पदं। तुषारस्रुतिधौतरक्तं।

[illegible]

… इत्यमरः ६ पद्मकं बिंदुजालमित्यमरः ६ । … [illegible]
विरहिणी प्रति … [illegible] … इत्यमरः …

तुषारस्रुत्या धौतं रक्तं दालितं रक्तं यस्य तत् तुषारस्रुतिधौतरक्तं । कथंभूतानां केसरिणां । हतद्विपानां । हताः द्विप
यैस्ते हतद्विपाः तेषां हतद्विपानां ॥ कथंभूतैः मुक्ताफलैः । नखरंध्रमुक्तैः । नखानां रंध्राणि तेभ्यः मुक्तानि तैः नख
रंध्रमुक्तैः । स पर्वतः तत्र तस्यां दिशि अस्तीति संबंधः ॥६॥ न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुंजरबिं
दुशोणाः । व्रजंति विद्याधरसुंदरीणामनंगलेखक्रिययोपयोगं ॥ भा॰ यत्र यस्मिन् पर्वते भूर्जत्वचः विद्या
धरसुंदरीणां अनंगलेखक्रियया उपयोगं सफलत्वं व्रजंति । गच्छंति । विद्याधराणां सुंदर्यः तासां विद्याधरसुंद
रीणां । अनंगस्य कामस्य लेखक्रिया तया अनंगलेखक्रियया । कथंभूताः भूर्जत्वचः । धातुरसेन न्यस्ताक्ष २
राः पुनः कथंभूताः भूर्जत्वचः । कुंजरबिंदुशोणाः । कुंजराणां । धातूनां गैरिकादीनां रसः तेन न्यस्तानि लिखि
तानि अक्षराणि यासु ताः न्यस्ताक्षराः पुनः कथंभूताः भूर्जत्वचः । कुंजरबिंदुशोणाः । कुंजराणां हस्तिनां ।

वेणवः कीचकास्ते स्युर्ये स्वनंत्यनिलोद्धता इत्यमरः ।) स्यात्किंनरः किंपुरुषः तुरंगवदनो मयुरित्यमरः ५ ।

बिंदवः मद्यबिंदवः तद्वत् शोणाः आरक्ताः ॥ कुंजरबिंदुशोणाः ॥ षाष्टिहायनस्य हस्तिनः पंचम्यां अवस्थायां कुंभस्थ
लात् मदबिंदवो रक्ताः निष्पतंति । अद मिदं स्थितं वय प्रीतावकी त्वमपि तच्चवसन्नपि मामकः । लिखितपत्रमनंग
रसाकुला । विरहिणीव हिणो निपतिं प्रति ॥ अयं अनंगलेखः । स पर्वतः तत्र तस्यां दिशि अस्तीति संबंधः ॥७॥ यः पू
रयन् कीचकरंध्रभागान् दरीमुखोत्थेन समीरणेन । उद्गास्यतामिच्छति किंनराणां स्थानप्रदायित्वमिवोपगंतुं ॥ भा॰
यः पर्वतः किंनराणां स्थानप्रदायित्वं उपगंतुं इच्छतीव ॥ उपगमनाय उपगंतुं ॥ स्थानं प्रददातीति स्थानप्रदः स्थान चि५
प्रदायिनो भावः स्थानप्रदायित्वं । कथंभूतानां किंनराणां उद्गास्यतां उद्गास्यंतीति उद्गास्यंतः तेषां उद्गास्यतां ॥ गा
तुं प्रवृत्तानां । किं कुर्वन् दरीमुखोत्थेन समीरणेन कीचकरंध्रभागान् पूरयन् सन् दरीमुखात् उत्तिष्ठते दरीमु
खोत्थः तेन दरीमुखोत्थेन । कीचकानां सच्छिद्रवंशानां रंध्राणि छिद्राणि तेषां भागाः तान् कीचकरंध्रभागान् । स प

र्वतः॥ उत्तरस्यां दिशि अस्तीति संबंधः॥७॥ कपोलकंडूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणां॥ यत्र स्रुतक्षीरतया
प्रसूतः सानूनि गंधः सुरभीकरोति॥८॥ यत्र हिमवति गंधः परिमलः सानूनि शिखराणि सुरभीकरोति॥ असुरभी
णि सुरभीणि करोतीति सुरभीकरोति॥ कथंभूतो गंधः सरलद्रुमाणां स्रुतक्षीरतया प्रसूतः॥ स्रुतं यत् क्षीरं तस्य भावः
तया॥ स्रुतक्षीरतया गलितरसत्वेन॥ कथंभूतानां सरलद्रुमाणां॥ करिभिर्विघट्टितानां॥ किं कर्तुं॥ कपोलकंडूं वि
नेतुं॥ कपोलस्थो कंडूः॥ तां॥ कपोलकंडूं॥ सरलाः ये द्रुमाः तेषां सरलद्रुमाणां विघट्टितानां घर्षितानां॥ स पर्वत उ
त्तरस्यां दिशि अस्तीति संबंधः॥८॥ वनेचराणां वनितासखानां दरीगृहोत्संगनिषक्तभासः॥ भवंति यत्रौषधयो
रजन्यामतैलपूराः सुरतप्रदीपाः॥९॥ यत्र यस्मिन् पर्वते औषधयः रजन्यां रात्रौ वनेचराणां सुरतप्रदीपाः
भवंति॥ सुरताय प्रदीपाः सुरतप्रदीपाः॥ वने चरंतीति वनेचराः तेषां वनेचराणां पुलिंदादीनां॥ कथंभूतानां

४

मार्गेषु

नेचराणां वनितासखानां॥ वनिता एव सखायो येषां ते तेषां वनितासखानां स्त्रीसहायानां॥ कथंभूताः सुरतप्रदीपा
अतैलपूराः॥ न तैलेन पूर्यंते इति अतैलपूराः॥ कथंभूताः औषधयः दरीगृहोत्संगनिषक्तभासः॥ दर्य एव गृहं दरीगृ
हं तस्य उत्संगः॥ तत्र निषक्ताः लग्नाः भासो यासां ताः दरीगृहोत्संगनिषक्तभासः॥ स पर्वत उत्तरस्यां अस्तीति संबंधः॥१०
उद्वेजयत्यंगुलिपार्ष्णिभागान् मार्गे शिलीभूतहिमेपि यत्र॥ न दुर्वहश्रोणिपयोधरार्ता भिंदंति मंदां गतिमश्वमुख्यः
॥११॥ यत्र हिमाचले अश्वमुख्यः किंनर्यो मंदां गतिं न भिंदंति न त्यजंति॥ कथंभूताः किंनर्यः दुर्वहश्रोणिपयोध
रार्ताः श्रोणिश्च पयोधरौ च श्रोणिपयोधराः दुर्वहा ये श्रोणिपयोधराः तैरार्ताः पीडिताः दुर्वहश्रोणिपयोधरार्ताः
क सति मार्गे अंगुलिपार्ष्णिभागान् उद्वेजयति सति पीडयति सति॥ अंगुलयश्च पार्ष्णिभागाश्च ताः अंगुलिपार्ष्णि
भागान्॥ कथंभूते मार्गे॥ शिलीभूतहिमे॥ अशिला शिला भूतं शिलीभूतं हिमं यत्र स शिलीभूतहिमः॥ तस्मिन् शिली

धिलीनत्तद्दिमे॥ सपर्वतः उत्तरस्यां दिशि अस्ति इति संबंधः॥२१॥ दिवाकराद्रक्षति यो गुहासु लीनं दिवा भीतमिवांधका
रं॥ क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव॥ १२॥ तिविराप्य आवो विजित्य सर्वः इतजाउ रनुबंधप्रद्वावक
यां विजूरयोः॥ उदिउ तिकश्चित्तमन्यः सयुके प्रातोश्चदेतोऽउन प्रत्ययः॥ आनामिन अप स्यालयो गुणः एकान्य
वदेजिता सिद्धं॥ उइजयतीति उद्देजयत्वात् तस्मिन् उद्देजयति वर्त्तमाने संज्ञः अत्राऽनुविकरणक र्त्तरि अकारकनाद्यं
तयोः गुणः एव अयू॥ यंजन मात्र संध्यहरयोगमसध्येकवचनं द्वि॥ अनुयंगयः॥ नलोपः यंजनमः उद्देजय
तिसिद्धं॥ पातुलाश्लोककीर्तियाः॥ यः पर्वतः अंधकारं दिवाकरात् दिवादिनेरक्षति कयंभूतं अंधकारं गुहा ५
सुलीनं॥ लग्नं कथं भूतं अंधकारं उत्प्रेक्षते भीतमिवाभितभिवाहवं निश्चितं शरणं प्रपन्ने क्षुद्रे पिनीचे पिउ
च्चैः शिरसामहतां ममत्वं भवति किं भिन्न इव सति इव साधवि व यथा महतां ममत्वं साधुजने भवति तथात्र

रणं प्रपन्नेनीचेति भवतीत्यर्थः॥ सपर्वत उत्तरस्यां दिशि अस्तीति संबंधः॥ दिवाशब्दः आकारांतो अव्ययं दिवा स्त्रियते सप्त
म्येकवचने ङि अव्ययादवेर्लोपः॥ दिवा सिद्धं॥ २३॥ लांगूलविक्षेपविसर्पिशोभैरितस्ततश्चंद्रमरीचिगौरैः॥ यस्यार्
थयुक्तं गिरिराजशब्दं कुर्वंति बालव्यजनैश्चमर्यः॥ आवमर्यः अरण्यगावः यस्य पर्वतस्य गिरिराजशब्दं बाल
व्यजनैः अर्थयुक्तं कुर्वंति॥ बालाश्च ते व्यजनानि चामराणि तैः बालव्यजनैः कथंभूतैः बालव्यजनैः इतस्ततः
मदक्षिणतः लांगूलविक्षेपविसर्पिशोभैः लांगूलस्य पुच्छस्य विक्षेपः चालनं तेन विसर्पिणी प्रसरणशीला शो
भा येषां तानि तैः लांगूलविक्षेपविसर्पिशोभैः पुनः कथंभूतैः बालव्यजनैः चंद्रमरीचिगौरैः॥ चंद्रस्य मरीच
यः किरणाः तद्वद्गौराणि श्वेतानि तैः चंद्रमरीचिगौरैः॥ सपर्वत उत्तरस्यां दिशि अस्तीति संबंधः॥ १३॥ यत्रांशु
काक्षेपविलज्जितानां यदृच्छया किंपुरुषांगनानां॥ दरीगृहद्वारविलंबिबिंबास्तिरस्करिण्यो जलदा भव

× प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ।१

...।। यत्र यस्मिन्पर्वते जलदाः मेघाः किंपुरुषांगनानां तिरस्करिण्यः आच्छादनपटाः भवंति। कथंभूता मेघाः
दरीगृहद्वारविलंबिबिंबाः। दरी एव गृहं तस्य द्वारं तस्मिन् विलंबीनि विलंबमानानि बिंबानि मंडलानि येषां ते
दरीगृहद्वारविलंबिबिंबाः। तिरस्कुर्वंतीति आच्छादयंतीति तिरस्करिण्यः। किंविशिष्टानां किंपुरुषांगनानां
यदृच्छया स्वेच्छया। अंशुकाक्षेपविलज्जितानां। अंशुकानां वस्त्राणां आक्षेपः आकर्षणं तेन विलज्जिताः तासां अं
शुकाक्षेपविलज्जितानां। स पर्वत उत्तरस्यां दिशि अस्तीति संबंधः।।१४।। भागीरथीनिर्झरसीकराणां वोढा मुहुः कं
पितदेवदारुः। यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखंडिबर्हः।।१५।। किरातैः यद्वायुः आसेव्यते। य ६
स्मिन्पर्वते वायुः यद्वायुः कथंभूतैः किरातैः अन्विष्टमृगैः। अन्विष्टाः अवलोकिताः मृगा यैस्ते अन्विष्टमृगाः तैः अ
न्विष्टमृगैः। कथंभूतो यद्वायुः भागीरथीनिर्झरशीकराणां वोढा वहतीति वोढा। भागीरथ्या निर्झराः तेषां

तेषां भागीरथीनिर्झरसीकराणां। प्रवाहे निर्झरो झरः। कथंभूतः यद्वायुः मुहुः वारंवारं कंपितदेवदारुः कंपिताः दे
वदारवो येन स कंपितदेवदारुः।। पुनः कथंभूतः यद्वायुः भिन्नशिखंडिबर्हः भिन्नं शिखंडिनां मयूराणां बर्हं येन
भिन्नशिखंडिबर्हः।। स पर्वत उत्तरस्यां दिशि अस्तीति संबंधः।।१५।। सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान्प
रिवर्तमानः। पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः।।१६।। विवस्वान् सूर्यः यस्य पर्वतस्य अ
ग्रसरोरुहाणि पद्मानि ऊर्ध्वमुखैः मयूखैः किरणैः प्रबोधयति। विकासयति। ऊर्ध्वमुखानि येषां ते ऊर्ध्वमुखाः
तैः ऊर्ध्वमुखैः। अग्रे यानि सरांसि तेषु रोहंतीति तानि अग्रसरोरुहाणि। कथंभूतो विवस्वान्। अधः अधोभा
गे परिवर्तमानः परिवर्तते परिवर्तमानः भ्रममाणः। पुनः कथंभूतानि पद्मानि सप्तर्षिहस्तावचितावशेषाणि
सप्तर्षीणां हस्ताः तैरवचितानि अवशेषाणि उद्धृतानि तानि सप्तर्षिहस्तावचितावशेषाणि। स पर्वत उत्तरस्यां।

मारिवंलास्थितिरमेवक्षपरः

सर्वेभ्यो निमित्तिः कृं मात्रमं निर्मिते । एक्षा हिमवतेष्या । द्वितीयाऽतो निमेषदोत्तमीयामवद्वेपताङनिर्मेद्दःपर्वतः ॥

॥ यज्ञांगयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च ॥ प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्व
तिष्ठत् ॥ १७ ॥ प्रजापतिर्ब्रह्मा यस्य पर्वतस्य शैलाधिपत्यं स्वयं आत्मना अन्वतिष्ठत् ददौ । किं कृत्वा । यज्ञांगयोनित्व
मवेक्ष्य दृष्ट्वा पुनः धरित्रीधरणक्षमं सारं बलं अवेक्ष्य दृष्ट्वा यज्ञानां अंगानि सोमयज्ञादीनि तेषां योनिः
उत्पत्तिस्थानं तस्य भावः यज्ञांगयोनित्वं तत्र यज्ञांगयोनित्वं धरित्र्याः धरणे धारणे समर्थः तं धरित्रीधरणक्षमं कथं च तं
शैलाधिपत्यं कल्पितयज्ञभागं कल्पितः यज्ञभागो यत्र तत् कल्पितयज्ञभागं सपर्वतः उत्तरस्यां दिशि अस्तीति सं
बंधः ॥ आदिक्रियां कुलकं ॥ ढ ॥ स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः ॥ मेनां मुनीनाम ७
पि माननीयामात्मानुरूपां विधिनोपयेमे ॥ १८ ॥ स हिमाचलः मेनां उपयेमे परिणीतवान् केन विधिना कस्यै
कुलस्य स्थितये कथंभूतां मेनां पितॄणां कव्यवाडादीनां मानसीं कन्यां मनसि भवा उत्पन्ना सा मानसी अस्मा

नसीं ॥ कथंभूतः स हिमाचलः स्थितिज्ञः स्थितिं जानातीति स्थितिज्ञः पुनः कथंभूतः स हिमाचलः मेरुसख
मेरुः सखा यस्य सो मेरुसखः कथंभूतां मेनां आत्मानुरूपां आत्मनः अनुरूपा योग्या आत्मानुरू
पा तां आत्मानुरूपां आत्मसदृशीमित्यर्थः ॥ १८ ॥ कालक्रमेणाथ तयोः प्रवृत्ते स्वरूपयोग्ये सुरतप्रसंगे ॥ मनो
रमं यौवनमुद्वहंत्या गर्भोऽभवद्भूधरराजपत्न्याः ॥ १९ ॥ अथ अथानंतरं भूधरराजपत्न्याः गर्भः अभवत् ॥ किं कु
र्वंत्याः मनोरमं यौवनं उद्वहंत्याः उद्वहतीति उद्वहंती तस्याः उद्वहंत्याः ज्ञनोत्तावः यौवनेत्ताने अग्रेणाक्रमति ।
कालक्रमेण कालपरिपाट्या तयोः मेनाहिमाचलयोः सुरतप्रसंगे प्रवृत्ते सति निष्पन्ने सति कथंभूते सुर
तप्रसंगे स्वरूपयोग्ये स्वरूपस्य आत्मनो रूपस्य योग्यः सदृशः स्वरूपयोग्यः ॥ १९ ॥ असूत सा नागवधूपभो
ग्यं मैनाकमंभोनिधिबद्धसख्यं ॥ क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्रावेदनाज्ञं कुलिशक्षतानां ॥ २० ॥ सा मेना ॥ मेना
अपुत्रं असूत अजीजनत् ॥ कथंभूतं मैनाकं नागवधूपभोग्यं नागवधूभिः उपभोग्यः तं नागवधूपभोग्यं पुनः

नांत्र १

कथंभूतं मैनाकं।अंतोनिधिबद्धसख्यं।अंतोनिधिना समुद्रेण सह बद्धं सख्यं येन।साप्तपदीनं येन।सतां।अंतोनिधिबद्धस
ख्यं।पुनः कीदृशं मैनाकं।पक्षच्छिदि वृत्रशत्रौ इंद्रे कुद्धे पि सति।कुलिशक्षतानां अवेदनाज्ञं।पक्षान् छिनत्ति पक्षच्छि
त् तस्मिन् पक्षच्छिदि।कुलिशस्य वज्रस्य क्षतानि प्रहाराः तेषां कुलिशक्षतानां॥२०॥अथापमानेन पितुः प्रयुक्ता
दक्षस्य कन्या भवपूर्वपत्नी।सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे॥२१॥अथ अनंतरं सती नाम्नी
तां शैलवधूं प्रपेदे मेनां प्र जन्मने प्रपेदे प्राप।कथंभूता सती।पितुः अपमानेन अवगणनेन प्रयुक्ता।प्रेरिता।पुनः
कथंभूता सती।दक्षस्य कन्या।पुनः किंविशिष्टा सती।भवपूर्वपत्नी।भवस्य ईश्वरस्य पूर्वं पत्नी भवपूर्वपत्नी।पुनः
किंविशिष्टा सती।पतिव्रता।पुनः किंविशिष्टा।योगविसृष्टदेहा।योगेन विसृष्टः देहो यया सा।सती योगविसृष्टदे ८
हा॥२१॥सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या।सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्सा
हगुणेन संपत्॥२२॥भूधराणां पर्वतानां अधिपेन स्वामिना कर्त्रा।सा।कर्म उदपादि।अजनि।कस्यां तस्यां

मेनायां।कथंभूतायां तस्यां।समाधिमत्यां।समाधिर्विद्यते यस्याः सा समाधिमती तस्यां समाधिमत्यां।सुरक्षितायां।
कथंभूता सा सती भव्या।मनोहरा।केन कस्यां का इव।उत्साहगुणेन।उद्यमगुणेन।नीतौ नयमार्गे।संपत् इव।कथंभूता
यां नीतौ।सम्यक्प्रयोगात्।सम्यक् शास्त्रोक्तकरणात्।अपरिक्षतायां।अपरिभ्रष्टायां।प्रयोजनं प्रयोगः सम्यक्
समीचीनो यः प्रयोगः तस्मात् सम्यक्प्रयोगात्॥२२॥प्रसन्नदिक्पांसुविविक्तवातं शंखस्वनानंतरपुष्पवृष्टि।श
रीरिणां स्थावरजंगमानां सुखाय तज्जन्मदिनं बभूव॥२३॥तज्जन्मदिनं स्थावरजंगमानां शरीरिणां सुखाय बभू
व।तस्याः पुत्र्याः जन्मदिनं तज्जन्मदिनं।कथंभूतं जन्मदिनं।प्रसन्नदिक्।प्रसन्ना दिशो यत्र तत् प्रसन्नदिक्।पुनः
कथंभूतं तज्जन्मदिनं।पांसुविविक्तवातं।पांसुना रेणुना विविक्तो रहितो वातो यत्र तत् पांसुविविक्तवातं।पुनः
कथंभूतं तज्जन्मदिनं।शंखस्वनानंतरपुष्पवृष्टि।शंखध्वनात् अनंतरं पुष्पवृष्टिर्यत्र तत् शंखस्वनानंतरपुष्प

षि॥नारीरं दिद्युतेयेषां तेषां शरीरिणां॥२३॥तयादुहित्रासुतरां सवित्रीस्फुरत्प्रभामंडलयाचकासे॥वैदूर्यभूमिर्न
वमेघशब्दादुद्भिन्नया रत्नशलाकयेव॥२४॥सवित्रीमाता कर्त्री तया दुहित्रा पुत्र्या करणभूतया सुतरां अतिशयेन
चकासे शुशुभे॥कास्टृ दीप्तौ॥कास्टृशब्दकुत्सायां॥इति कास धातोश्चादिपठितस्यादंत्यसकारांतस्यालच
कासा॥कासप्रत्ययांतेभ्य आम्प्रत्ययो भवति॥यथा सद्दिकांचकार सांचकार कोपुरीरघ्यति चकाशे॥इत्यत्र काश्टृ दीप्तौ॥
इत्यस्य दिवादि पठितस्यात् तालव्यशकारांतस्यरूपं॥कसात्रामप्रत्ययनिषेधः॥कथंभूतया दुहित्रा स्फुरत्प्रभा ९
मंडलया॥स्फुरद्दीप्यमानप्रभामंडलं यस्याः सा तया॥स्फुरत्प्रभामंडलया॥कयाकेव॥रत्नशलाकया वैदूर्यभू
मिरिव॥कथंभूतया रत्नशलाकया॥नवमेघशब्दात् उद्भिन्नया उद्भितया॥२४॥दिनेदिने सापरिवर्द्धमाना लब्धो ६२
दया चांद्रमसीव लेखा॥पुपोष लावण्यमयान्विशेषान् ज्योत्स्नांतराणीव कलांतराणि॥२५॥सापार्वती॥लाव

ण्यमयान्विशेषान् पुपोष॥हस्तपादाद्यवयवान् पुपोष॥कथंभूता सा॥दिनेदिने परिवर्द्धमाना॥केव चांद्रम
सीमुखेवांद्रनः कथंभूता सा॥लब्धोदया॥लब्ध उदयो यया सा लब्धोदया॥कानीव॥कलांतराणीव॥कथंभूतानि कला
तराणीव॥कथंभूतानि कलांतराणि॥ज्योत्स्नांतराणि॥ज्योत्स्नाया अंतरे येषां तानि॥ज्योत्स्नांतराणि कलांतराणि॥क
लानां अंतराणि तानि कलांतराणि॥यथा लब्धोदया चांद्रमसी लेखा॥दिनेदिने परिवर्द्धमाना सती ज्योत्स्नांत
राणि कलांतराणि पुपोष॥तथा लब्धोदया सा पार्वती॥दिनेदिने परिवर्द्धमाना सती॥लावण्यमयान्विशेषा
सौंदर्ययुक्तान्विशेषान्हस्तपादाद्यवयवान्पुपोष॥अभुप्रत्॥लावण्येन अकुराः॥लावण्यमयास्तान् लाव
ण्यमयान्॥चंद्रमसः इयं चांद्रमसी॥परिवर्द्धते परिवर्द्धमाना॥२५॥तां पार्वतीत्याभिजनेन नाम्ना बंधुप्रियां
बंधुजनो जुहाव॥उमेति मात्रा तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगाम॥२६॥बंधुजनः तां कन्यां नाम्ना

इत्याशुद्धा वा॥ क्षेत्रस्पर्द्धीयां वा चि॥ अब्रवीत्॥ इतीति किं॥ पार्वतीति॥ पर्वतस्यापत्यं स्त्री पार्वती॥ किंविशिष्टेन
नाम्ना॥ आभिजनेन॥ अभिजनस्य कुलस्य कमस्य इदं आभिजनं तेन आभिजनेन॥ कथं भूतां कन्यां॥ बंधुप्रि
यां॥ सा सुमुखी पार्वती॥ पश्चात् अनंतरं उमाख्यां जगाम॥ आगमत्॥ कथं भूता सा॥ सुमुखी॥ मात्रा मेन
या इति निषिद्धा॥ इतीति किं॥ हे पार्वति॥ वं उ इति कोमलालापे॥ तपसे मा॥ त्वं तपसे मा गच्छ॥ उमा इति आख्या
तां॥२६॥ महीभृतः पुत्रवतोपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिं॥ अनंतपुष्पस्य मधोर्हि चूते द्विरेफमाला
सविशेषसंगा॥२७॥ महीभृतः पुत्रवतोपि दृष्टिः तस्मिन् अपत्ये पार्वतीलक्षणे तृप्तिं न जगाम॥ पु
त्राः विद्यंते यस्य पुत्रवान् तस्य पुत्रवतः॥ महीं बिभर्त्तीति महीभृत् तस्य महीभृतः॥ हि यस्मात् कारणा
त्॥ अनंतपुष्पस्य मधोः वसंतस्य द्विरेफमाला चूते आम्रे सविशेषसंगा भवति॥ सह विशेषसंगेन व

मधुर्मद्येन पुष्परसे मद्ये चैत्रवसंतयोरिति विश्व॰

१०

त्र तया सा सविशेषसंगा॥ अनंतानि पुष्पाणि यस्य स अनंतपुष्पः तस्य अनंतपुष्पस्य॥२७॥ प्रभामहत्या
शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः॥ संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च॥२८
तया पार्वत्या कृत्वा स हिमालयः पूतः पवित्रो बभूव॥ न पुनर्विभूषितो बभूव॥ कया क इव॥ प्रभामहत्या
शिखया कृत्वा दीप इव॥ पुनः कया क इव॥ त्रिमार्गया गंगया त्रिदिवस्य स्वर्गस्य मार्गः पंथा इव॥ पुनः क
या क इव॥ संस्कारवत्या लक्षणवत्या गिरा वाण्या कृत्वा मनीषी बुधो विद्वानिव॥ प्रभया दीप्त्या महती
गरीयसी प्रभामहती तया प्रभामहत्या॥ संस्कारो विद्यते यस्याः सा संस्कारवती तया संस्कारवत्या॥
२८॥ मंदाकिनीसैकतवेदिकाभिः सा कंदुकैः कृत्रिमपुत्रकैश्च॥ रेमे मुहुर्मध्यगता सखीनां क्रीडारसं
निर्विशतीव बाल्ये॥२९॥ सा पार्वती सखीनां मध्यगता सती मुहुः वारंवारं॥ रेमे॥ काभिः॥ मंदाकिनी

भिर्दिश्यानविज्ञोगयोरितिअमरः ॥ स्त्रोतोऽधोकीनार्थ्यालयोरस्तिविभः ॥४॥

सैकतवेदिकाभिः ॥ मंदाकिन्याः गंगायाः सैकते सिकतामये तटे या वेदिकाः ताभिः ॥ मंदाकिनीसैकत
वेदिकाभिः ॥ सैकतं सिकतामयं इत्यमरः ॥ च पुनः कैः रेमे ॥ कंदुकैः ॥ च पुनः कैः रेमे ॥ कृत्रिमपुत्रकैः ॥ कृत्रिमा
ये पुत्रकाः तैः कृत्रिमपुत्रकैः ॥ उमेत्युक्ते सा पार्वती बाल्यं निर्विशती वा उपभुंजती वा बालस्य यत्तद्बाल्यं ॥
यणुद्र प्रत्ययः ॥ न्नितः ॥ कथंभूतं बाल्यं क्रीडारसं ॥ क्रीडायां रसो यत्र तत् क्रीडारसं ॥२९॥ तां हंसमालाः शरदीव
गंगां महौषधीर्नक्तमिवात्मभासः ॥ स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥३०॥ प्राक्तनज
न्मविद्यां तां पार्वतीं प्रपेदिरे ॥ प्राप्नुवन्त ॥ उपदेशकाले उपदेशस्य कालः तस्मिन् उपदेशकाले ॥ कथंभूतां ११
तां स्थिरोपदेशां ॥ स्थिरः उपदेशो यस्याः सा तां स्थिरोपदेशां ॥ काः कस्मिन् का इव ॥ हंसमालाः शरदि गंगामि
व ॥ पुनः काः कस्मिन् कामिव ॥ आत्मभासः प्रदीपस्य नक्तं महौषधीमिव ॥३०॥ असंभृतं मंडनमंगयष्टेर

नासवाख्यं करणं मदस्य ॥ कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे ॥३१॥ अथ अनंतरं सा दे
वी बाल्यात्परं अन्यत् वयः यौवनं प्रपेदे ॥ प्राप ॥ कथंभूतं वयः ॥ अंगयष्टेः शरीरस्य असंभृतं अकृत्रिमं मंडनं ॥ पु
नः कथंभूतं वयः ॥ मदस्य करणं ॥ पुनः कथंभूतं कामस्य अस्त्रं अनासवाख्यं न आसवः इति आख्या य
स्य तत् अनासवाख्यं ॥ पुनः कथंभूतं वयः ॥ कामस्य अस्त्रं ॥ कथंभूतं अस्त्रं ॥ पुष्पव्यतिरिक्तं ॥ पुष्पाद्व्यतिरिक्तं
भिन्नं तत् पुष्पव्यतिरिक्तं ॥३१॥ उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविंदं ॥ बभूव तस्याश्चतुरस्र
शोभि वपुर्विभक्तं नवयौवनेन ॥३२॥ तस्याः पार्वत्याः वपुः नवयौवनेन विभक्तं विभागीकृतं सत् चतुरस्र
शोभि बभूव ॥ कया किमिव ॥ तूलिकया सूक्ष्मकूर्चिकया उन्मीलितं प्रकटीकृतं चित्रमिव ॥ पुनः कैः किमि
व ॥ सूर्यांशुभिः भिन्नं विकासितं अरविंदमिव ॥ कमलमिव ॥ चतुरस्रं समंतात् शोभते चतुरस्रशोभि ॥ अश्च

स्युन्नतांगुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरंतौ।आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविंदश्रियमव्यवस्थां।
।३३।तच्चरणौ पृथिव्यां स्थलारविंदश्रियं आजह्रतुः।कथंभूतां स्थलारविंदश्रियं अव्यवस्थां।श्रियो व्यवतिष्ठ
ते।व्यवस्था न व्यवस्था।तां अव्यवस्थां।संचारिणीं।स्थले ये अरविंदास्तेषां श्रीः तां स्थलारविंदश्रियं।तस्याः पार्वत्या
श्चरणौ तच्चरणौ।उत्प्रेक्ष्यते तच्चरणौ निक्षेपणात् पादन्यासात् रागं उद्गिरंताविव।उद्गिरतः इति उद्गिरंतौ।काभिः। १२
अत्युन्नतांगुष्ठनखप्रभाभिः।अत्युन्नतौ मध्योर्ध्वौ यौ अंगुष्ठनखौ तयोः प्रभाः ताभिः।अत्युन्नतांगुष्ठनखप्रभा
भिः।३३।सा राजहंसैरिव सन्नतांगी गतेषु लीलांचितविक्रमेषु।व्यनीयत प्रत्युपदेशलुब्धैरादित्सुभिर्नूपु
रसिंजितानि।३४।राजहंसैः पार्वती गतेषु गमनेषु व्यनीयत।इव शिक्षिता इव।कथंभूतैः राजहंसैः प्रत्युप
देशलुब्धैः।प्रत्युपदेशो शिक्षायां लुब्धाः।तैः प्रत्युपदेशलुब्धैः।पुनः कथंभूतैः राजहंसैः नूपुरसिंजितानि आ

दित्सुभिः।आदातुमिच्छवः आदित्सवस्तैः आदित्सुभिः।यद्वा ईतुकामैः।नूपुराणां सिंजितानि शब्दितानि।तानि नूपु
रसिंजितानि।कथंभूता सा।सन्नतांगी।सन्नतानि नम्रांगानि यस्याः सा सन्नतांगी।कथंभूतेषु गतेषु।लीलांचितवि
क्रमेषु।लीलाया क्रीडाया अंचिताः पूजिताः विक्रमाः येषां तानि तेषु लीलांचितविक्रमेषु।३४।वृत्तानुपूर्वे च न
चातिदीर्घे जंघे शुभे सृष्टवतस्तदीये।शेषांगनिर्माणविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः।३५।विधातुर्ब्र
ह्मणः शेषांगनिर्माणविधौ उत्पाद्ये उत्पादनीये लावण्ये यत्नः प्रयत्नः आस इव।अभूदिव।उत्पाद्यते इति उत्पा
द्यः।तस्मिन् उत्पाद्ये।लवणस्य भावो लावण्यं।सौंदर्यं।शेषाणि उद्धृतानि यानि अंगानि तेषां निर्माणे रचने तस्य
विधिः।तस्मिन्।शेषांगनिर्माणविधौ।किं कुर्वतः।विधातुः।तदीये जंघे शुभे सृष्टवतः।रचयतः।तस्याः इमे तदी
ये।पुनः किं कुर्वतः।वृत्तानुपूर्वे जंघे सृष्टवतः।रचयतः।आनुपूर्वे हस्ते वर्तुले।वृत्तानुपूर्वे।गोपुच्छानुकारे।च

ऊरू॥ किंभूर्वत॥ अतिदीर्घजंघेन॥ सुष्ठुवत॥ एवंयत॥ अनुरूविः॥ असौ परोक्षा॥ अदृष्टा॥ अप्परोक्षा॥ ॰ असुहृद्विर्वनौ
अस्यासस्युहृद्भिः॥ यं जनमवशोष्या॥ सुलोप॥ अस्यादेः सर्वत्र॥ अस्यास्हैर्दीर्घुदीर्घात्परस्नोपः॥ यं जनमः॥ असंहि
द्वं॥ असेर्ह्वरसार्वधातुके॥ इति॥ अनेन सूत्रेण॥ असूक्ष्मतोऽर्द्ररादेवोनव्यति॥ विश्व ब्लनात्॥ स्वबलात्॥ असेति
वस्त्ववार्थो॥ अव्ययप्रकरणे विसरसर्वं॥ आसः इति अव्ययं॥ ३॥ नागेंद्रहस्तास्त्वचि कर्कशत्वादेकांतशैत्यात्कदली
विशेषाः॥ लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः॥ ३॥ नागेंद्रहस्ताः॥ दस्तौ द्वाणां हस्ताः॥ शुं
डादंडाः॥ त्वचि॥ कर्कशत्वात्॥ तद्ऊर्वोः उपमानबाह्या जाताः॥ उपमानस्य बाह्याः॥ उपमानस्य बाह्या॥ तस्याः पा १३
र्वत्याः ऊरू॥ तदूरू॥ तयोः तदूर्वोः॥ कदलीविशेषाः॥ कदलीस्तंभाः॥ तदूर्वोरुपमानबाह्याः जाताः॥ कस्मात्॥ ए
कांतशैत्यात्॥ शीतस्य भावः शैत्यं॥ एकांतं निरंतरं यत् शैत्यं तस्मात् एकांतशैत्यात्॥ किंकृत्वापि लोके जगति

परिणाहि विशालं रूपं लब्ध्वापि॥ ४॥ एतावता नवानुमेयशोभि कांचीगुणस्थानमनिंदितायाः॥ आरोपितं वा किं गिरिशे
न पश्चादनन्यनारीकमनीयमंकं॥ ५॥ अनिंदितायाः पार्वत्याः कांचीगुणस्थानं एतावता प्रमाणेन एव अनुमे
यशोभि जातं॥ अनुमानेन प्रमाणेन ज्ञायते यत्तत् अनुमेयं॥ अनुमानयोग्यां कांचीगुणस्थानं॥ अनुमीयते इति अ
नुमेयं॥ शोभते इति शोभि॥ अनुमेयं च तत् शोभि॥ अनुमेयशोभि॥ यत् यस्मात्कारणात् गिरिशेन ईश्वरेण यत् कां
चीगुणस्थानं पश्चात्॥ अंके आरोपितं॥ एतावता एव कांचीगुणस्थानं अनुमेयशोभि जातं॥ कथंभूतं अंकं॥ अनन्य
नारीकमनीयं॥ न अन्यासां नारीणां कमनीयः अभिलषणीयः तं॥ कमनीयं॥ ५॥ तस्याः प्रविष्टा नतनाभिरंध्रं
रराज तन्वी नवरोमराजिः॥ नीवीमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः॥ ६॥ तस्याः पार्वत्याः तन्वी सूक्ष्मा
नवरोमराजिः॥ अत्र नवरोमावली रराज॥ शुशुभे॥ कथंभूता नवरोमराजिः॥ नतनाभिरंध्रं प्रविष्टा नतं गंभीरं यत् ना

सिरंध्रं तरुन त नातिरेधं॥ कथंभूता रोमराजिः॥ उत्प्रेक्ष्यते नीवीं व्यत्यये थिं अतिक्रम्य तन्मेखलामध्यमणेः अर्चिरिव॥
दीप्तिरिव॥ तस्याः पार्वत्याः मेखला तस्याः मध्यमणिः प्रवृत्त मेखलामध्यमणेः॥ कथंभूतस्य तन्मेखलामध्यमणेः॥
सितेतरस्य॥ सितात् इतरः कृष्णः तस्य सितेतरस्य॥ ३८॥ मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला॥
आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तं॥ ३९॥ सा बाला मध्येन उदरेण वलित्रयं बभार॥ कथंभू
ता सा वेदिविलग्नमध्या वेदिवत् विलग्नं मध्यं यस्याः सा वेदिविलग्नमध्या॥ कथंभूतं वलित्रयं चारु
मनोज्ञं॥ कथंभूतं वलित्रयं॥ उत्प्रेक्ष्यते कामस्य आरोहणार्थं नवयौवनेन प्रयुक्तं रचितं सोपानमिव॥ १४
३९॥ अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं चारु तथा प्रवृद्धं॥ मध्ये यथा श्याममुखस्य तस्य मृणा
लसूत्रान्तरमप्यलभ्यं॥ ४०॥ उत्पलाक्ष्याः चारु स्तनद्वयं तथा प्रवृद्धं॥ किं कुर्वत्॥ अन्योन्यं परस्परं उत्पीडयत्॥ यथा

अंगीकृते

यन्नार्हति॥ कथंभूतं रुद्रं॥ मंत्रपूतं॥ मंत्रेण पूतं मंत्रपूतं॥ ५१॥ अयाचितारं न हि देवदेवमद्रिः सुतां ग्राह
यितुं शशाक॥ अभ्यर्थनाभंगभयेन साधुर्माध्यस्थ्यमिष्टेप्यवलंबतेर्थे॥ ५२॥ अद्रिः हिमालयः सुतां पु
त्रीं देवदेवं ईश्वरं ग्राहयितुं न शशाक॥ न समर्थो बभूव॥ कथंभूतं देवदेवं॥ अयाचितारं॥ याचितेति
याचिता॥ न याचिता॥ अयाचिता॥ तं अयाचितारं॥ साधुः महान् अवलंबते अर्थे वस्तुनि॥ माध्यस्थं
विशिष्टं स्वरूपं इष्टे इच्छति॥ केन॥ अभ्यर्थनाभंगभयेन॥ अभ्यर्थनायाः भंगः अभ्यर्थनाभंगः॥ तस्माद्भ १८
यं॥ तेन अभ्यर्थनाभंगभयेन॥ ५२॥ यदैव पूर्वे जनने शरीरं सा दक्षरोषात् सुदती ससर्ज॥ तदाप्रभृत्ये
व विमुक्तसंगः पतिः पशूनामपरिग्रहोभूत्॥ ५३॥ सा सुदती यदा एव पूर्वे जनने दक्षरोषात् श
रीरं ससर्ज॥ तत्याज॥ कथंभूता सा॥ सुदती॥ शोभना दंता यस्याः सा सुदती॥ तदा प्रभृति तत आरभ्य एव

जनने इति पा॥ ३॥

समीपे॥समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरार्द्धहरां हरस्य॥५२॥किल इति पुराणादौ श्रूयते।नारदः मुनिः
तां पार्वतीं हरस्य महादेवस्य भवित्रीं एकवधूं समादिदेश।कथयामास॥कथंभूतः नारदः।कामचरः।कामं
स्वेच्छया चरतीति कामचरः।किंकृत्वा।कदाचित्।कस्मिंश्चित्समये।तां कन्यां पितुः हिमाचलस्य समीपे प्रे
क्ष्य॥दृष्ट्वा॥कथंभूतां तां।प्रेम्णा स्नेहेन।शरीरार्द्धहरां।शरीरस्य अर्द्धं भागं हरतीति शरीरार्द्धहरा।तां श
रीरार्द्धहरां॥५३॥गुरुः प्रगल्भेऽपि वयस्यतोऽस्यास्तस्थौ निवृत्तान्यवराभिलाषः॥ऋते कृशानोर्न हि मंत्रपूत
मर्हंति तेजांस्यपराणि हव्यं॥५४॥गुरुः हिमाचलः अतःकारणात् निवृत्तान्यवराभिलाषः तस्थौ।स्थितवान्।
निवृत्तः अन्येषु वरेषु अभिलाषो यस्य सः निवृत्तान्यवराभिलाषः॥कस्मिन् सति।अस्याः पार्वत्याः वयसि
प्रगल्भेऽपि सति॥प्रौढेऽपि सति॥हीति उत्प्रेक्षायां॥कृशानोः ऋते अग्निं विना।अपराणि तेजांसि हव्यं हवि १२

॥४७॥लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः॥तं केशपाशं प्रसमीक्ष्य कुर्युर्बालप्रियत्वं शिथि
लं चमर्यः॥४८॥तिरश्चां पशूनां चेतसि यदि लज्जा स्यात्॥तदा चमर्यः अरण्यगावः पर्वतराजपुत्र्याः पार्वत्याः तं के
शपाशं प्रसमीक्ष्य दृष्ट्वा असंशयं यथा स्यात् तथा बालप्रियत्वं शिथिलं कुर्युः॥प्रियस्य भावः प्रियत्वं बाला
नां प्रियत्वं॥४९॥सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन॥सा निर्मिता विश्वसृजा प्रयत्नादेक
स्थसौंदर्यदिदृक्षयेव॥५०॥विश्वसृजा ब्रह्मणा सा पार्वती सर्वोपमाद्रव्यसमुच्चयेन निर्मिता॥कस्मात्।प्रय १
त्नात्॥कथंभूतेन सर्वोपमाद्रव्यसमुच्चयेन।यथाप्रदेशं।यथास्थानेषु विनिवेशितेन।न्यस्तेन।उत्प्रेक्ष्य
ते कयेव।[illegible] सौंदर्यदिदृ[illegible]तया।[illegible]स्य दिदृक्षा सौंदर्यदिदृक्षा तया।सौंदर्यदिदृक्षया।एक
स्मिन् वस्तुनि [illegible] सौंदर्यं [illegible] कस्मिन् [illegible]॥५१॥तां नारदः कामचरः कदाचित्कन्यां किल प्रेक्ष्य पितुः

सि॰ कर्दृश॥ क्या दृष्टिप्रेक्षितात तत्र विश्रीप्रेमाग्दृष्टी तां अधीरं चंचलं यत् तु विप्रेक्षितं अवलोकनं॥ कथंभूतया तया॥ आ
यताक्ष्या॥ आयते अक्षिणी यस्याः ततित्रींश्रूः दृष्टी॥ तया आयताक्ष्या॥ कथंभूतं अधीरविप्रेक्षितं॥ प्रवातनीलो
त्पलनिर्विशेषं॥ प्रवाते प्रकृष्टवायौ यद् नीलोत्पलं तस्मात् निर्विशेषं विशेषरहितं प्रवातनीलकमलस
दृशं॥४७॥ तस्याः शलाकांजननिर्मितेव कांतिर्भ्रुवोरायतलेखयोर्या॥ तां वीक्ष्य लीलाचतुरामनंगः स्वचाप
सौंदर्यमदं मुमोच॥४८॥ कामः अनंगः तां भ्रुवोः लीलाचतुरां कांतिं वीक्ष्य दृष्ट्वा स्वचापसौंदर्यमदं मुमो
च॥ स्वचापस्य आत्मधनुषः सौंदर्यं तस्य मदः॥ तं स्वचापसौंदर्यमदं॥ तस्याः पार्वत्याः भ्रुवोः या कांतिः॥ कथं
भूते शलाकांजननिर्मितेव॥ शलाकायाः अंजनं तेन निर्मिता रचिता॥ शलाकांजननिर्मिता॥ किंविशि
ष्टयोः भ्रुवोः॥ आयतलेखयोः॥ आयते लेखे ययोस्ते॥ आयतलेखे तयोः॥ आयतलेखयोः॥ दीर्घरेखयोः

तस्य
या पुनः॥ कथंभूतं तस्याः स्मितं तस्य॥ ताम्रोष्ठपर्यस्तरुचः॥ ताम्रोय ओष्ठः तत्र पर्यस्ता पतिता रुक् यस्य॥ तत् तु॥ ताम्रोष्ठपर्ये
स्तरुचः॥ तत्र अत्र समस्येकवचने तस्य॥ सार्वविभक्तिकस्तसु प्रत्ययो के॥४४॥ स्वरेण तस्याममृतस्रुतेव प्रजल्पितायां
मभिजातवाचि॥ अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितंत्रीरिव ताड्यमाना॥४५॥ अन्यपुष्टा कोकिलापि श्रोतुर्ज
नस्य प्रतिकूलशब्दा उद्वेगकारिणी॥ केव॥ ताड्यमाना वितंत्रीरिव वाद्यमाना विस्वरा तंत्री वितंत्री॥ अन्यैः पु न
ष्टा पोषिता॥ पुष्टा अन्यपुष्टा॥ कोकिला॥ कस्यां सत्यां॥ तस्यां पार्वत्यां स्वरेण प्रजल्पितायां सत्यां॥ कथंभूते
न स्वरेण लक्ष्यते॥ अमृतस्रुतेव॥ अमृतं स्रवतीति अमृतस्रुत् तेन अमृतस्रुतेव॥ कथंभूतायां तस्यां॥ अ १
भिजातवाचि॥ अभिजाता कोमला वाक् यस्याः सा तस्यां अभिजातवाचि॥४६॥ प्रवातनीलोत्पलनिर्वि
शेषमधीरविप्रेक्षितमायताक्ष्या॥ तया गृहीतं नु मृगांगनाभ्यस्ततो गृहीतं नु मृगांगनाभिः॥४७॥ तया पार्व
त्या कर्त्र्या अधीरविप्रेक्षितं कस्मात् मृगांगनाभ्यः गृहीतं॥ नु इति वितर्के विचारे मृगांगना

ती॥ पद्मगुणान्न भुंक्ते॥ पद्माश्रिता लक्ष्मीः चांद्रमसीमभिख्यां शोभां न भुंक्ते॥ पद्मे कमले आश्रिता पद्माश्रि
ता चंद्रमसः इयं चांद्रमसी तां चांद्रमसीं॥ पुनः लोला चंचला लक्ष्मीः उमामुखं प्रतिपद्य प्राप्य द्विसंश्रयां
प्रीतिं अवाप॥ द्वौ संश्रयौ यस्याः सा द्विसंश्रया तां द्विसंश्रयां॥४४॥ पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं
वा स्फुटविद्रुमस्थं॥ ततोनुकुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य॥४५॥ पुष्पं कर्तृ तत् स्मि
तस्याः॥ पार्वत्याः स्मितं तदा अनुकुर्यात् सदृशं भवति यदि पुष्पं प्रवालोपहितं स्यात्॥ स्मितस्य अनु
कर्मणि षष्ठी॥ पुष्पं स्मितं ततस्तदा अनुकुर्यादित्यर्थः॥ मांसस्य नाश्नीयात् इतिवत्॥ द्विजः मांसं
नाश्नीयात्॥ इत्यर्थः॥ प्रवाले पल्लवे उपहितं॥ प्रवालोपहितं॥ पल्लवोपरिन्यस्तं॥ वा॥ अथवा मुक्ताफलं
तस्याः पार्वत्याः स्मितस्य स्मितं ततस्तदा अनुकुर्वन् सदृशं भवति॥ यदि मुक्ताफलं स्फुटविद्रुमस्थं स्या
त्॥ स्फुटं निर्मलं यत् विद्रुमं तत्र तिष्ठतीति स्फुटविद्रुमस्थं॥ कथंभूतस्य स्मितस्य विशदस्य निर्म

निस्तल[illegible]

मकरध्वजेन कामेन यौ बाहू हरस्य कंठपाशीकृतौ॥४२॥ कंठस्य तस्याः स्तनबंधुरस्य मुक्ताकलापस्य च निस्तलस्य।
अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः॥४३॥ तस्याः पार्वत्याः कंठस्य च पुनः मुक्ताकलापस्य
अन्योन्यशोभाजननात् भूषणभूष्यभावः॥ साधारणः समानो बभूव॥ अन्योन्यं परस्परं यत् शोभायाः जननं त
स्मात्॥ अन्योन्यशोभाजननात्॥ कथंभूतस्य कंठस्य॥ स्तनबंधुरस्य॥ स्तनाभ्यां बंधुरं॥ उन्नतो नतस्तस्य स्तनबंधुरस्य।
बंधुरं तून्नतानते इत्यमरः॥ कथंभूतस्य स्तनबंधुरस्य॥ मुक्ताकलापस्य॥ निस्तलस्य॥ निर्गतं तलं यस्मात् सो नि
स्तलः तस्य निस्तलस्य॥ वर्तुलस्य॥ भूषणं आभरणं भूष्यः कंठः॥ भूष्यते मंड्यते येन तत् भूषणं भूष्यते यस्मा १५
त् भूष्यः॥ भूषणं च भूष्यश्च भूषणभूष्यौ तयोर्भावः॥ भूषणभूष्यभावः॥४३॥ चंद्रं गता पद्मगुणान्न भुंक्ते पद्माश्रि
ता चांद्रमसीमभिख्यां॥ उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः॥४४॥ लक्ष्मीश्चंद्रं गता म

स्या॥ तस्या श्याममुखस्य स्तनद्वयस्य मध्ये। मृणालसूत्रांतरमप्यलभ्यं॥ आसीत् मृणालसूत्रस्य अंतरं। अवकाशस्तस्या
श्याममुखं यस्य तत्तु तस्य श्याममुखस्य॥४०॥ निर्लोभिताशोकदलप्रसूति पाणिद्वयं चारुनखं तदीयं॥ नवोदितेंदुप्र
तिमस्य शोभां॥ अथः प्रदोषे विफलीचकार॥४१॥ निर्लोभिता तिरस्कृता अशोकदलस्य दलानां पत्राणां प्रसूत
योहाणां अंकुरा येन निर्लोभितप्रसूति। किंविशिष्टस्य। अथः नवोदितेंदुप्रतिमस्य॥ नवा नूतना उदिता उद्
ता इंदोः यस्य प्रतिबिंबस्य यत्र तत्तु नवोदितेंदुप्रतिमस्य॥ किं विशिष्टं पाणिद्वयं चारुनखं। चारवो मनोहरा नखा
यत्र तत्तु चारुनखं॥४१॥ शिरीषपुष्पाधिकसौकुमार्यौ बाहू तदीया विति मे वितर्कः॥ पराजितेनापि कृतौ हरस्य यौ क
ण्ठपाशौ मकरध्वजेन॥४२॥ तदीयो बाहू शिरीषपुष्पाधिकसौकुमार्यौ वर्त्तेते। शिरीषपुष्पेभ्यः अधिकं सौकु
मार्यं कोमलत्वं ययोः तौ शिरीषपुष्पाधिकसौकुमार्यौ॥ मे मम इति वितर्कः। विचारः। इतीति किं पराजितेनापि

तीमेवि ३

ति निश्चितं पशूनां पतिः ईश्वरः। अपरिग्रहः। अकृततु। अकृतदारः अकृततु॥ न परिग्रहः स्त्री यस्य सो अपरिग्रहः
कथंभूतः पशूनां पतिः विमुक्तसंगः। विमुक्तः संगो येन सः विमुक्तसंगः॥५४॥ स कृत्तिवासास्तपसे यतात्मा
गंगाप्रपातोक्षितदेवदारु॥ प्रस्थं हिमाद्रे मृगनाभिगंधि किंचित्क्वणत्किंनरमध्युवास॥५५॥ स कृत्तिवा
सा ईश्वरः तपसे हिमाद्रेः प्रस्थं। अध्युवास। कृत्तिः गजचर्म वासो वस्त्रं यस्य स कृत्तिवासाः। ईश्वरः कथंभू
तः कृत्तिवासाः यतात्मा। यतः संयतः आत्मा यस्य सः यतात्मा॥ कथंभूतं प्रस्थं। गंगाप्रपातोक्षितदेवदारु।
गंगाप्रपातेन उक्षिताः देवदारवो यत्र तत्तु गंगाप्रपातोक्षितदेवदारु। पुनः कथंभूतं प्रस्थं मृगनाभिगं
धि। मृगनाभेः कस्तूरिकायाः गंधो यत्र तत्तु मृगनाभिगंधि। पुनः कथंभूतं प्रस्थं। किंचित्क्वणत्किंनरं। किंचि
त्क्वणंतः किंनरा यत्र तत्तु किंचित्क्वणत्किंनरं। प्रस्थः सानुः अस्त्रियां। प्रस्थशब्दो नपुंसके पुल्लिंगे च॥५५॥ ग

गणा नमेरुप्रसवावतंसा भूर्जत्वचःस्पर्शवतीर्दधानाः॥ मनःशिलाविच्छुरिता निषेदुः शैलेयनद्धेषु शिलातले
षु॥५५॥ गणाः भृंगि नंदि महाकाल प्रभृतयः शिलातलेषु निषेदुः॥ उपनिविष्टाः॥ शिलानां तलानि तेषु शिलातले
षु॥ कथंभूताः गणाः नमेरुप्रसवावतंसाः॥ नमेरूणां देववृक्षाणां प्रसवाः पुष्पाणि अवतंसा आभरणानि येषां
ते नमेरुप्रसवावतंसाः॥ पुनः किं कुर्वाणाः गणाः स्पर्शवतीः कोमलाः भूर्जत्वचः दधानाः धारयंतः॥ पुनः क
थंभूताः गणाः॥ मनःशिलाविच्छुरिताः मनःशिलाभिः विच्छुरिताः कर्बुरिताः॥ कथंभूतेषु शिलातलेषु॥ शै
लेयनद्धेषु॥ शैलेयैः शैवालैः नद्धानि बद्धानि तेषु शैलेयनद्धेषु॥५६॥ तुषारसंघातशिलाः खुराग्रैः स
मुल्लिखन्दर्पकलः ककुद्मान्॥ दृष्टः कथंचिद्गवयैर्विविग्नैरसोढसिंहध्वनिरुन्ननाद॥५७॥ ककुद्मान्
वृषभः उन्ननाद जगर्ज॥ किंविशिष्टः ककुद्मान् दर्पकलः दर्पेण अहंकारेण कलः मनोज्ञः दर्प

अत्र वनितां सिमीरगल दक्ष्यः शशिशेखर हरस्य ऊनान्तः गणेन ईशस्य धनंजय वैरिणो नि गदितास्त्रिदिशैर्व शिष्टये॥

कलः॥ किं कुर्वन् खुराग्रैः तुषारसंघातशिलाः समुल्लिखन् खुराणां अग्राणि तैः खुराग्रैः॥ तुषाराणां हिमा
नां संघातः तस्य शिलाः ताः तुषारसंघातशिलाः॥ ककुद् स्कंधो विद्यते यस्यासौ ककुद्मान्॥ पुनः कथंभूतः
ककुद्मान्॥ असोढसिंहध्वनिः॥ असोढः असहितः सिंहानां ध्वनिर्येन सः असोढसिंहध्वनिः॥५८॥ तत्राग्निमाधा
य समित्समिद्धं स्वमेव मूर्त्यंतरमष्टमूर्तिः॥ स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार॥५९॥ अ
ष्टमूर्तिः ईश्वरः तत्र हिमवतः प्रस्थे समित्समिद्धं अग्निं आधाय केनापि कामेन अभिलाषेण तपः चचार॥ कथंभूता
म् कथंभूतं अग्निं स्वमेव आत्मीयं मूर्त्यंतरं॥ मूर्तीनां अष्टानां अंतरं मध्यवर्ती॥ मूर्त्यंतरं मूर्त्यंतरं समि
द्भिः समिद्धं दीप्यमानं समित्समिद्धं॥ कथंभूतः अष्टमूर्तिः तपसः फलानां स्वयं विधाता कर्ता॥६०॥ अनर्घ्य
मर्घ्येण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा॥ आराधनायास्य सखीसमेतां समादिदेश प्रयतां तन

जो॥ ५८॥ अद्रिनाथः हिमाचलः तत्तनूजां पुत्रीं अस्याः ईश्वरस्य आराधनाय समादिदेश॥ दिश अतिसर्जने॥ किं कृ
त्वा॥ अनर्घ्यं तं ईश्वरं अर्घ्येण अर्चयित्वा पूजयित्वा॥ कथंभूतं तं ईश्वरं स्वर्गौकसां देवानां अर्चितं पूजितं॥ कथं
भूतां॥ तां॥ तत्तनूजां पुत्रीं॥ प्रयतां सावधानां॥ पुनः कथंभूतां॥ तत्तनूजां॥ सखीसमेतां॥ सखीसेव्यां जयविजयाभ्यां
समेतां संयुक्तां॥ न अर्घ्यः अनर्घ्यः तं अनर्घ्यं॥ ५८॥ प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोनुमे
ने॥ विकारहेतौ सति विक्रियंते येषां न चेतांसि त एव धीराः॥ ५९॥ गिरिशः तां पार्वतीं शुश्रूषमाणां अनुमे
नेऽङ्गीचकार॥ शुश्रूषते शुश्रूषमाणा तां शुश्रूषमाणां॥ आराधनतत्परां॥ कथंभूतामपि तां समाधेः प्र 2
त्यर्थिभूतां॥ शत्रुरूपां॥ ध्यानोत्कर्षात् निवातावलदीपावस्थानमिव॥ एकत्र चेतसोवस्थानं सा समाधिः॥ ई
श्वरः तर्हि तां कथं अनुमेने॥ इत्याशंक्याह॥ किं विकारहेतौ विकारकारणे सति॥ येषां चेतांसि मनांसि न

विक्रियंते॥ न विकारं यांति त एव धीराः पंडिताः॥ धियाः॥ चेतांसि अत्र कर्मकर्तृ॥ कर्मकर्त्री॥ ५९॥ अवचितबलिपुष्पा वे
दिसंमार्जदक्षा नियमविधिजलानां बर्हिषां चोपनेत्री॥ गिरिशमुपचचार प्रत्यहं सा सुकेशी नियमितपरिखेदा त
च्छिरश्चंद्रपादैः॥ ६०॥ सा सुकेशी प्रत्यहं प्रतिदिनं गिरिशं उपचचार॥ आराधयामास॥ शोभनाः केशा यस्याः सा सु
केशी॥ कथंभूता सा सुकेशी॥ अवचितबलिपुष्पा॥ अवचिता निश्रोटिता निबलये पुष्पाणि यया सा अवचित
बलिपुष्पा॥ पुनः कथंभूता सा॥ वेदिसमार्जदक्षा॥ संमार्जनं संमार्गः वेद्याः संमार्गः तत्र दक्षा॥ प्रवीणा॥ वेदिसम्मा
र्जदक्षा॥ कथंभूता॥ सा सुकेशी॥ नियमविधिजलानां उपनेत्री॥ नियमविधेः जलानि तेषां नियमविधिजलानां
पुनः कथंभूता॥ तच्छिरश्चंद्रपादैः नियमितपरिखेदा॥ तस्य ईश्वरस्य शिरसि स्थितश्चंद्रः तस्य पादाः किरणाः तैः तच्छि
रश्चंद्रपादैः नियमितः उपशमितः खेदो यस्याः सा नियमितपरिखेदा॥ ६०॥ ॥ इति कुमारसंभवे महा

॥ श्रीकालिदासकृतौ कुमारसंभवकृतायां टीकायां प्रथमः सर्गः ॥ ॥छ॥ ॥श्री॥ तस्मिन् विप्रकृताः काले ता
रकेण दिवौकसः ॥ तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ॥१॥ तस्मिन्काले पार्वतीईश्वरसेवनकाले त
त्काले दिवौकसो देवाः तुरासाहं इंद्रं पुरोधाय अग्रे कृत्वा स्वायंभुवं धाम ययुः ॥ स्वयंभुवः ब्रह्मण इदं स्वा
यंभुवं ॥ कथंभूताः दिवौकसः ॥ तारकेण दैत्येन विप्रकृताः पीडिताः ॥ दिवं आकाशं ओको गृहं येषां ते दिवौकसः ॥ दिवशब्दः
अकारांतः ॥ यथा दिवौकाः दिवं क्षिर इति ॥१॥ तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियां ॥ सरसां सुप्तप २१
द्मानां प्रातर्दीधितिमानिव ॥२॥ ब्रह्मा तेषां देवानां आविरभूत् प्रकटीबभूव ॥ कथंभूतानां देवानां प
रिम्लानमुखश्रियां ॥ परिम्लाना मुखश्रियो येषां ते तेषां परिम्लानमुखश्रियां ॥ के यथा कइव ॥ सुप्तपद्मानां
सरसां तडागानां प्रातः प्रभाते दीधितिमानिव सुप्तानि पद्मानि येषु तानि तेषां सुप्तपद्मानां दीधित

यो विद्यंते यस्यासौ दीधितिमान् ॥ सूर्यः ॥२॥ अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखं ॥ वागीशं वाग्भिरर्थ्याभि
प्रणिपत्योपतस्थिरे ॥३॥ अथ अनंतरं ते सर्वे देवाः सर्वस्य धातारं कर्तारं ब्रह्माणं प्रणिपत्य प्रणम्य वाग्भि
उपतस्थिरे ॥ उपस्तुवंति स्म कथंभूतं सर्वतोमुखं ब्रह्माणं सर्वतः मुखानि यस्य असौ सर्वतोमुखः तं सर्वतो
मुखं कथंभूतं ॥ सर्वतोमुखं वागीशं ॥ वाचां ईशः वागीशः तं वागीशं कथंभूताभिः वाग्भिः अर्थ्याभिः अर्थे
साधवः अर्थ्याः ताभिः अर्थ्याभिः सत्याभिः ॥ नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ॥ गुणत्रयवि
भागाय पश्चाद्भेदमुपेयुषे ॥४॥ हे ब्रह्मन् तुभ्यं नमः ॥ किंविशिष्टाय तुभ्यं त्रिमूर्तये ॥ तिस्रो मूर्तयो यस्य
स त्रिमूर्तिः तस्मै त्रिमूर्तये ब्रह्मविष्णुरुद्ररूपाय ॥ पुनः कथंभूताय तुभ्यं सृष्टेः संसारात्प्राक् पूर्वं के
वलात्मने केवलः एकः आत्मा यस्य स केवलात्मा तस्मै केवलात्मने एकरूपाय ॥ पुनः कथंभूताय पश्चा

ऊ स्तु येषु हे ॥ उपेयाय इति उपेयिवान् ॥ तस्मै उपेयुषे ॥ सेदं प्राप्तायाक स्मै गुणत्रयविभागाय ॥ गुणानां त्रयं
तस्य विभागः ॥ तस्मै गुणत्रयविभागाय ॥ ४ ॥ यदमोघमपामंतरुप्तं बीजमज त्वया ॥ अतश्चराचरं विश्वं प्रभवस्तस्य
गीयसे ॥ ५ ॥ टीका ॥ हे अज त्वया यत् अमोघं सफलं बीजं अपां तोयानां अंतर्मध्ये उप्तं निक्षिप्तं ॥ दुवप बीजसंताने
[illegible] वप उप्यते स्म ॥ विश्वाक [illegible] यजादी [illegible] ॥ वकारस्य संप्रसारणे ॥ [illegible]
निक्षिप्तो [illegible] एतस्मात् बीजात् चराचरं [illegible] जगत् [illegible] तस्य विश्वस्य त्वं प्रभवः [illegible] गीयसे ॥ कथ्यसे ॥ अ
र्थात् कवि [illegible] इति [illegible] ॥ तस्य [illegible] चराचरे [illegible] चराचरं जंगमस्थावरं ॥ एतद्दलि
[illegible] तस्यात् [illegible] प्रभवस्तु [illegible] एतद्स्थाने [illegible] सिद्धं ॥ ५ ॥ तिसृभिस्त्वमवस्था
भिर्महिमानमुदीरयन् ॥ [illegible] स्थितिसर्गाणामेकः कारणतां गतः ॥ ६ ॥ टीका ॥ हे ब्रह्मन् [illegible] त्वं प्रलयस्थितिस

र्गाणां कारणतां गतः ॥ हे ब्रह्मन् [illegible] प्रलयश्च स्थितिश्च सर्गश्च [illegible] स्थितिसर्गाः तेषां प्रलयस्थितिसर्गाणां ॥ [illegible]
तिसृभिस्त्रि [illegible] महिमानं माहात्म्यं उदीरयन् ॥ ६ ॥ स्त्रीपुंसावात्मभागौ ते
[illegible] सिसृक्षया ॥ प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥ ७ ॥ टीका ॥ हे ब्रह्मन् यौ स्त्रीपुंसौ ते तव आत्मभागौ स्वांशौ
[illegible] सिसृक्षया [illegible] भिन्नमूर्तेः ॥ सृष्टुमिच्छा सिसृक्षा ॥ [illegible] तया [illegible] दर्शित
[illegible] ॥ [illegible] स्त्रीपुरुषौ प्रसूतिभाजः सर्गस्य विश्वस्य पितरौ स्मृतौ ॥ क
[illegible] ॥ [illegible] आदेश्च [illegible] ॥ आदि [illegible] ॥ प्रसूतिं उत्पत्तिं [illegible] ॥ माता [illegible]
[illegible] प्रसूति [illegible] ॥ यदुक्तं [illegible] आत्मनो रूपं अर्धेन पुरुषो [illegible] ॥ अर्धेन नारी तस्यां [illegible] विराजमसृजत् प्रभुः ॥ ७ ॥ स्व
कालपरिमाणेन व्यस्तरात्रिंदिवस्य ते ॥ यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ ॥ ८ ॥ हे ब्रह्मन् ते तव यौ स्वप्नाव
बोधौ ॥ भूतानां प्राणिनां तौ प्रलयोदयौ स्मृतौ ॥ कथंभूतस्य ते स्वकालपरिमाणेन व्यस्तरात्रिंदिवस्य [illegible]

नः कालः तस्य परिमाणं तेन च कालपरिमाणेन रात्रिश्च दिवा च रात्रिं दिवे ॥ त्वं विभागीकृतं रात्रिं दिवे ये
न स च स्वरात्रिं दिवः तस्य स रात्रिं दिवस्य ॥ स्वप्नश्च प्रबोधश्च स्वभावबोधे ॥ प्रलयश्च उदयश्च प्रणे लयोद
यौ ॥ उक्तं च गीतायां ॥ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः ॥ १ ॥ य
दा स देवो जागर्ति तदेव चेतेजगत् ॥ यदा स्वपिति शांतात्मा तदा सर्वं प्रलीयते ॥ २ ॥ दैविकानां युगानां तु सहस्र
परिसंख्यया ॥ ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥ ३ ॥ जगद्योनिरयोनिस्त्वं ॥ जगदंतोप्यनंतकः ॥ जगदा
दिरनादिस्त्वं जगदीशो निरीश्वरः ॥ ९ ॥ हे ब्रह्मन् त्वं जगद्योनिरपि अयोनिः ॥ जगतां योनिः उत्पत्तिस्थानं जग
द्योनिः ब्रह्मत्वेन न विद्यते योनिर्यस्य स अयोनिः असि त्वं ॥ हे ब्रह्मन् त्वं जगदंतोपि अनंतकः जगतः
अंतः रुद्ररूपत्वात् ॥ न अंतको यस्य स अनंतकः अविनाशित्वात् ॥ हे ब्रह्मन् त्वं जगदादिरपि अनादिः ज
गतां आदिः जगदादिः पुराणत्वात् ॥ न आदिर्यस्य स अनादिः नित्यत्वात् ॥ हे ब्रह्मन् त्वं जगदीशोपि अनी २२

श्वरः ॥ जगतां ईशः जगदीशः परमैश्वर्यविशिष्टत्वात् ॥ न ईश्वरो यस्य स अनीश्वरः ॥ तदधिके ईश्वरांतरस्यासंभवात् ॥
तस्मादधिकं यत् ईश्वरांतरं तस्य असंभवत्वात् ॥ अपि शब्दो विरोधालंकारे ॥ ९ ॥ आत्मानमात्मना वेत्सि सृजस्या
त्मानमात्मना ॥ आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥ १ ॥ हे ब्रह्मन् त्वं आत्मना आत्मानं वेत्सि ॥ हे ब्रह्मन् त्वं आ
त्मना आत्मानं सृजसि हे ब्रह्मन् त्वं आत्मना आत्मनि विलीयसे ॥ विलयं यासि ॥ कथंभूतेन आत्मना कृतिना प्र
वीणेन ॥ १० ॥ द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ॥ व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥ ११ ॥ हे
ब्रह्मन् त्वं द्रवोसि द्रवतीति द्रवः रससलिलादिरूपत्वात् ॥ हे ब्रह्मन् त्वं संघातकठिनोसि संघातेन कठिनः संहननकठि
नः परमाणूनां संहतः संघातः तेन कठिनः शिलारूपत्वात् ॥ हे ब्र० त्वं स्थूलोसि पृथ्व्यादिरूपत्वात् ॥ हे ब्र०
त्वं सूक्ष्मोसि परमाणुरूपत्वात् ॥ सर्वांतरगतत्वात् नैव स्वरूपं लक्ष्यते ॥ तस्य त्रिशाखमोनागः परमा
णुः न लक्ष्यते ॥ हे ब्रह्मन् त्वं लघुरसि तूलादिरूपत्वात् दलवी ॥ हे ब्रह्मन् त्वं गुरुरसि तत्सु

१

साध॥ कनकादिरूपत्वात् हे ब्रह्मन् त्वं व्यक्तोसि॥ महदादिरूपत्वात् हे ब्रह्मन्॥ हंसः लोकेश्वरोसि॥ व्यक्तात् इ
तरः॥ अव्यक्तः॥ अव्यक्तः॥ प्रकृतिरूपत्वात्॥ हे ब्रह्मन् विश्वनिष्ठ ब्रह्मादिसुमहिमस्तु तेन व प्राकाम्यं बाहुल्येन व
र्तते॥ हे ब्रह्मन् प्राकाम्यं यथेष्टतावर्तते॥ वा॥ प्रकामस्य भावः प्राकाम्यं॥११॥ उद्गीथः प्रणवो यासां न्यासे त्रि
तिरुदीरणं॥ कर्म यज्ञः फलं स्वर्गः तासां त्वं प्रसवो गिरां॥१२॥ हे ब्रह्मन्॥ तासां गिरां वाचां त्वं प्रसवः॥ उत्पत्तिस्थानं
तासां कासां॥ यासां गिरां प्रणवः॥ ओंकारः उद्गीथः॥ प्रथमो भागः॥ किं विशिष्टः ओंकारः॥ सामपदं उद्गीथमाह
वेदपाठे हि आद्यं तयोः॥ अवश्यं अवश्यं ओंकारः॥ प्रयुज्यते॥ यासां गिरां त्रिवृत्तिः उदात्तानुदात्तस्वरितैः ना २४
ये उदीरणं कथनं॥ यासां गिरां यज्ञः कर्म॥ यासां गिरां स्वर्गः फलं॥ तासां गिरां त्वं प्रसवः॥ इति वाक्यार्थः॥१२
त्वामामनंति प्रकृतिं पुरुषार्थप्रवर्तिनीं॥ तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः॥१३॥ हे ब्रह्मन् सांख्यास्त्वां
प्रकृतिं आमनंति॥ कथयंति॥ आ स्यात् समा॥ आङ् पूर्वः वर्त्तमानार्थेति॥ अम्नि॰ असंध्यक्षरयोः॥ आमन॥

म्ना॥ हे आमन आदेशः॥ छंदनमः॥ आमनंति॥ कथयंति॥ किं विशिष्टां प्रकृतिं पुरुषार्थप्रवर्तिनीं॥ पुरुषार्थेन प्रयोजनेन प्रव
र्तते इति पुरुषार्थप्रवर्तिनी॥ तां पुरुषार्थप्रवर्तिनीं॥ पुरुषार्थं पुरुषप्रयोजनाय प्रवर्तयतीति स्वयमेव प्रवृत्तिरूपत्वा
त्॥ प्रवर्तते इति वा॥ तां पुरुषार्थप्रवर्तिनीं सांख्यास्त्वामेव पुरुषं विदुः॥ जानंति॥ किं विशिष्टं पुरुषं॥ तद्दर्शिनं॥ तां प्रकृतिं
द्रष्टुं शीलमस्यासौ तद्दर्शी तं तद्दर्शिनं॥ पुनः कथंभूतं॥ उदासीनं॥ कर्मफलोपभोगरहितं॥ शुभाशुभरहितं॥ द्रष्टा
पुरुषः॥ दृश्या प्रकृतिः॥ इति कापिलाः॥१३॥ त्वं पितॄणामपि पिता देवानामपि देवता॥ परतोपि परश्चासि विधाता
वेधसामपि॥१४॥ पितरः सप्तविधाः॥ देवविशेषास्तेषां पितॄणां त्वं पितासि॥ अस भुवि॥ असु वर्तमाना कोसि॥ अधि॰
अदादः अस्तेः सौ॥ अस्य कास सकार कोपो॥ असि सिद्धं॥ हे ब्रह्मन् त्वं देवानामपि इंद्रादीनामपि देवता॥ असि॥
हे ब्रह्मन् त्वं परतोपि परः असि॥ परेभ्यः परतः सूक्ष्मेभ्योपींद्रियार्थेभ्यः त्वं परः सूक्ष्मतमः॥ यदुक्तं॥ इंद्रियेभ्यः प
राह्यर्था अर्थेभ्यश्च परं मनः॥ मनसस्तु परा बुद्धिः बुद्धेरात्मा ततो महान्॥ महतः परमव्यक्तं॥ अव्यक्तात्पुरुषः प

रः॥ पुरुषाच्च यत्परं किं तु साक्षाद्या सा परा गतिः॥ हे ब्रह्मन् त्वं वेधसामपि विश्वतासि कर्त्ता असि॥१४॥ त्वमेव हव्यं होता च
भोज्यं भोक्ता च शाश्वतः॥ वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परं॥१५॥ हे ब्रह्मन् त्वमेव हव्यं असि हूयते तन्नु हव्यं॥
हे ब्रह्मन् त्वं पुनर्होतासि जुहोतीति होता॥ हे ब्रह्मन् त्वं भोज्यं असि भुज्यत इति भोज्यं॥ हे ब्रह्मन् त्वं भोक्तासि भुन
क्तीति भोक्ता॥ पुनः कथंभूतः शाश्वतः॥ अविनाशी॥ हे ब्रह्मन् त्वं वेद्यमसि विद्यते ज्ञायते अनेनेति वेद्यं॥ हे ब्रह्मन्
त्वं वेदितासि वेत्तीति वेदिता॥ ज्ञाता॥ हे ब्रह्मन् च पुनः त्वं ध्याता असि ध्यायतीति ध्याता॥ हे ब्रह्मन् यत्परं उत्कृष्टं ध्ये
यं तत् त्वमसि॥१५॥ इति तेभ्यः स्तुतीः श्रुत्वा यथार्थहृदयंगमाः॥ प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः॥ २५
१६॥ वेधाः ब्रह्मा दिवौकसः देवान् प्रत्युवाच॥ प्रत्युवाच तु कथंभूतः वेधाः प्रसादाभिमुखः॥ किं कृत्वा तेभ्यो देवे
भ्यः इति पूर्वोक्तेन प्रकारेण स्तुतीः श्रुत्वा॥ कथंभूताः स्तुतीः॥ यथार्थहृदयंगमाः॥ यथार्थाश्च ताः हृदयंगमाश्च या
थार्थहृदयंगमाः॥ ताः यथार्थहृदयंगमाः॥ सत्या श्रीमनःप्रियाः॥ प्रसादेन अभिमुखः सन्मुखः॥१६॥ पुराणस्य

कवेस्तस्य चतुर्मुखसमीरिता॥ प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी॥१७॥ तस्य पुराणस्य पुरातनस्य कवेः क्रां
तदर्शिनः सर्वविदः ब्रह्मणः चतुर्मुखसमीरिता अत एव चतुष्टयी शब्दानां प्रवृत्तिः आसीत्॥ कथंभूता प्रवृत्तिः
चरितार्था चरितः सफलः अर्थो यस्याः सा चरितार्था॥ चतुर्भिर्मुखैः समीरिता उच्चरिता चतुर्मुखसमीरिता॥ चत्वा
रो अवयवा यस्याः सा चतुष्टयी॥१७॥ स्वागतं स्वानधीकारान् प्रभावैरवलंब्य वः॥ युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्रा
ज्यविक्रमाः॥१८॥ हे प्राज्यविक्रमाः वः युष्माकं स्वागतं॥ प्राज्यः प्रचुरो विक्रमो येषां ते प्राज्यविक्रमाः॥ तेषां संबो
धनं हे प्राज्यविक्रमाः॥ शोभनमागतं स्वागतं॥ किं विशिष्टेभ्यः॥ वः युष्मभ्यं॥ स्वान् अधीकारान् नियोगान् प्रभावैः
माहात्म्यैरवलंब्य अपरित्यज्य युगपत् प्राप्तेभ्यः समकालं आगतेभ्यः पुनः किं विशिष्टेभ्यः॥ वः युगबाहुभ्यः
हस्तद्वयं युगं युगप्रमाणा बाहवो भुजा येषां ते युगबाहवः तेभ्यः युगबाहुभ्यः॥ आजानुभुजेभ्य इत्यर्थः॥१८॥

किमिदं द्युतिमात्मीयां न बिभ्रति पुरा यथा॥ हिमक्लिष्टप्रस्तावानि ज्योतींषीव मुखानि वः॥१९॥ हे प्राज्यविक्रमाः वो
युष्माकं मुखानि। यथा पुरा पूर्वं द्युतिं दीप्तिं अविलक्षः तथा वो युष्माकं मुखानि आत्मीयां द्युतिं किमिति न बिभ्रति।
न वहंति॥ कानीव। ज्योतींषीव। कथंभूतानि ज्योतींषि। हिमक्लिष्टप्रस्तावानि। हिमेन क्लिष्टः कदर्थितः प्रस्तावो येषां
तानि हिमक्लिष्टप्रस्तावानि॥ डुभृञ् डुकृञ् धारणपोषणयोः अस्य वर्त्तमाने अंति। अबि। अदादेः जुहोत्यादीनां सार्व
धातुके श्लुः द्विर्वचनं॥ ऋवर्णस्याकारः। भृञामित्। इकारः। नि। द्वितीयचतुर्थयोः प्रथमतृतीयौ॥ विभ्रतु
वर्णः। झांत नमः। लोपो न्यस्मादिति नः। अनुस्वारलोपः। विभ्रति इति सिद्धं॥१९॥ प्रशमादर्चिषामेतदनुद्गीर्णसुरा २६
युधं॥ वृत्रस्य हंतुः कुलिशं कुंठिताश्रीव लक्ष्यते॥२०॥ वृत्रस्य हंतुः इंद्रस्य एतत् कुलिशं वज्रं कुंठिताश्रीव लक्ष्
यते। अर्थात् मया कर्त्री। कुंठिता नष्टा अश्रिर्धारा यस्य तत्। कुंठिताश्रि। किंविशिष्टं कुलिशं। अर्चिषां दीप्तीनां प्र

शमात् निर्वाणात्। अनुद्गीर्णसुरायुधं॥ न उद्गीर्णं प्रकटीकृतं सुरायुधं येन तत्। अनुद्गीर्णसुरायुधं॥ वज्रज्योतिःप्रसरा
त्। इंद्रधनुः उदेति॥ कवय इति आहुः। अश्रिः धारा॥२०॥ किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः॥ मंत्रेण हतवी
र्यस्य फणिनो दैन्यमाश्रितः॥२१॥ किंच अधिकमुच्यते॥ प्रचेतसः वरुणस्य पाणौ। अरिदुर्वारः। अरिभिः शत्रुभिः दुःखेन
वार्यत इति दुर्वारः। अयं पाशः। फणिनः सर्पस्य दैन्यं आश्रितः। प्राप्तः। दीनस्य भावः दैन्यं। कथंभूतस्य फणिनः। मंत्रेण
हतवीर्यस्य। हतं वीर्यं यस्यासौ हतवीर्यः। तस्य हतवीर्यस्य॥२१॥ कुबेरस्य मनःशल्यं शंसतीव पराभवं। अपवि
द्धगदो बाहुर्भग्नशाख इव द्रुमः॥२२॥ कुबेरस्य बाहुः मनःशल्यं पराभवं कर्म शंसतीव। कथंभूतो बाहुः। अपविद्धग
दः। अपविद्धा गदा येन सः अपविद्धगदः। उत्प्रेक्ष्यते। भग्नशाखद्रुम इव। भग्ना शाखा यस्यासौ भग्नशाखः॥२२॥
यमोपि विलिखन् भूमिं दंडेनास्तमितत्विषा॥ कुरुतेस्मिन्नमोघेपि निर्वाणालातलाघवं॥२३॥ हे देवाः। यमोपि

दंडेनस्तंभितं विलिख्य मुसन्नू॥ अस्मिन् दंडे निर्वाणालाटतलाघवं कर्म कुरुते। निर्वाणः शांतो यो अलात उल्मुक
विशेषः तस्य अलाघवं अलातदंदं तत्तु निर्वाणालातलाघवं। कथंभूते दंडे अमोघफले। कथंभूतेन दंडेन। अस
मितविषा। अस्तमिता विषादीप्तयो यस्य सः अस्तमितत्विष् तेन तथा॥ २३॥ अमीच कथमादित्याः प्रतापक्षितिशी
तलाः। चित्रन्यस्ता इव गताः प्रकाशमालोकनीयतां॥ २४॥ हे देवाः। अमी आदित्याः प्रकाशमालोकनीयतां कथं गताः। प्रका
मस्त्वेक्रयात्व आलोकनीयं दर्शनीयं तस्य भावः प्रकाशमालोकनीयता। तां प्रकाशमालोकनीयतां। सपुनरर्थे। पुनः ३१
कथं ते आदित्याः प्रतापक्षतिशीतलाः। प्रतापस्य क्षतिः नाशः तया शीतलाः उत्स्वेदिता। अमी आदित्याः चित्रन्य
स्ता इव। चित्रे न्यस्ताः आलेख्ये लिखिता इव॥ २४॥ पर्याकुलत्वान्मरुतां वेगभंगोनुमीयते। अंतसामोघसंरो
धः प्रतीपगमनादिव॥ २५॥ हे देवाः मया मरुतां वायूनां वेगभंगः अनुमीयते ज्ञायते। कस्मात् पर्याकुलत्वा

त्वात्॥ पर्याकुलस्य भावः पर्याकुलत्वं। तस्मात् पर्याकुलत्वात्। पुंजीकृतत्वात्। वेगात्। वायवः सर्वतो नाकुला
भवंतीति भावः॥ कथंभूतो वेगभंगः उत्प्रेक्ष्यते प्रतीपगमनात्। व्याघुटनात्। अंतसां पानीयानां ओघसंरोध इव
पूररोध इव॥ ओघस्य संरोधः। प्रतीपं यत् गमनं प्रतीपगमनं। तस्मात् प्रतीपगमनात्॥ २५॥ आवर्जितजटामौलि
विलंबिशशिकोटयः। रुद्राणामपि मूर्द्धानः क्षतहुंकारशंसिनः॥ २६॥ हे देवाः। रुद्राणामपि मूर्द्धानः क्षतहुंकार
शंसिनो वर्तंते। क्षतं नष्टं हुंकारैः अस्त्रविशेषः शंसंतियेते क्षतहुंकारशंसिनः। अथवा। क्षतं त्यक्तं अहंकारं
वै हुंकारः शस्त्रविशेषः शंसंति। इत्येवंशीलाः क्षता हुंकारशंसिनः॥ कथंभूताः रुद्राणां आवर्जितजटामौलि
विलंबिशशिकोटयः॥ २६॥ लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः। अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः॥ २७॥
हे देवाः बलवत्तरैः परैः शत्रुभिः कर्तृभिः यूयं किं कृतव्यावृत्तयः। कृता व्यावृत्तिः स्वाधिकारात् व्याघुटनं येषां ते कृत

श्रा इत्यन्वयः॥ बाधितत्वाधिकाराः॥ यत्तादौश्चांशेनलभंते॥ इत्यभिप्रायः॥ कथंभूता यूयं प्रथमं स्वंस्वं लब्धप्रतिष्ठाः॥ ल
ब्धाः प्रतिष्ठाः स्थितयो यैस्ते लब्धप्रतिष्ठाः॥ प्राप्तस्थितयः॥ कैः के वा अपवादैः उत्सर्गा इव॥ यथा अपवादविधिभिरुत्
सर्गविधयः कृतलब्धात्रयोत्तवंति॥ तथा॥ विशेषोक्तो विधिः अल्पव्यापको विधिरपवादः॥ सामान्योक्तो विधिर्ब
हुव्यापको विधिः उत्सर्गः॥ उत्सर्गापवादयोरपवादो विधिर्बलवान्॥ २७॥ तद्ब्रूत वत्साः॥ किमितः प्रार्थयध्वे समाग
ताः॥ मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता॥ २८॥ हे देवाः॥ समागताः यूयं इतो मत्सकाशान्मत्तः किं प्रार्थयध्वे
कियाचध्वे॥ यूयं तद्ब्रूत॥ ब्रूञ् व्यक्तायां वाचि॥ ब्रूयंचमी॥ अच्चि॰ अदादेः॥ ब्रूतमिदं॥ कथयत॥ लोकानां सुरादीनां॥ २७
सृष्टिः उत्पत्तिः मयि अवस्थिता॥ लोकानां रक्षा तु युष्मासु अवस्थिता॥ २८॥ ततो मंदानिलोद्भूतकमलाकरशोभि
ना॥ गुरुं नेत्रसहस्रेण प्रेरयामास वासवः॥ २९॥ ततः अनंतरं वासवः इंद्रः नेत्रसहस्रेण गुरुं बृहस्पतिं॥ नोदया

मास॥ नुद संनोदने॥ प्रेरयामास॥ नेत्राणां सहस्रं तेन नेत्रसहस्रेण॥ कथंभूतेन नेत्रसहस्रेण॥ मंदानिलोद्भूतकमला
करशोभिना॥ मंदश्चासौ अनिलश्च मंदानिलः॥ तेन उद्भूतोयः कमलाकरः सरसिजवनं तद्वच्छोभते इति मंदानि
लोद्भूतकमलाकरशोभि॥ तेन मंदानिलोद्भूतकमलाकरशोभिना॥ २९॥ स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकं॥
वाचस्पतिरुवाचेदं प्रांजलिर्जलजासनं॥ ३०॥ स वाचस्पतिर्बृहस्पतिः जलजासनं ब्रह्माणं प्रति इदं वक्ष्यमाणं उ
वाच॥ अब्रवीत्॥ कथंभूतः वाचस्पतिः॥ प्रांजलिः प्रकृष्टो बद्धो अंजलिर्येन सः प्रांजलिः॥ बद्धांजलिरित्यर्थः॥ पुनः
कथंभूतो वाचस्पतिः॥ हरेः इंद्रस्य चक्षुः स्वचक्षुरिव चक्षुः॥ इंद्रः बृहस्पतिना सर्वकार्याणि पश्यति॥ कृतिनावत्॥ कथं
भूतं चक्षुः॥ द्विनेत्रं॥ द्वे नेत्रे यस्य तत् द्विनेत्रं॥ कथंभूतं चक्षुः सहस्रनयनाधिकं॥ सहस्रसंख्यानि नयनानि तेभ्यो
अधिकं सहस्रनयनाधिकं॥ ३०॥ एवं यदात्थ भगवन्नामृष्टं नः परैः पदं॥ प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि

ष्ट्रो॥३१॥हे भगवन् त्वं अच्छ॥तत् पूर्वं प्रभुः कर्ता नः अस्माकं पदं कर्मस्थानं परैः शत्रुभिः आक्रान्तं इति कथनेन ज्ञास्यति
अपि ज्ञास्यति॥कथं चेत् प्रभुः॥प्रत्येकं विनियुक्तः॥एकं एकं प्रति प्रत्येकं॥तत् प्रत्येकं॥क्रियाविशेषणं॥विनियुक्तः आ
ज्ञायस्य स विनियुक्तः॥मा सर्वस्य आत्मरूपेण अवस्थितः॥कृत्यकार्यो वा वि॥वर्तमाने मिं॥अधिः अदादेः॥आदो
स्ववस्तुपर्यालो॥नवानीच विदेस्वथा॥अदादयो निपात्यन्ते इत्यादीनां व्ययाकर्मा॥कृत्स्थाने आद आदेशः॥सिद्धाने थ लृ
टां तृतीयाद्वः॥कृत्र अघोषेष्टः॥इति षष्ठो प्रथमः॥ह्युत्पूर्वं इनमः॥आक सिद्ध॥ज्ञास्यति॥अत्र सकर्मकत्वात्॥परस्मैपदं॥नि २८
ह्नवे ज्ञा॥ज्ञा अनोः निह्नवे अर्थे निराकरणेऽर्थे निवारणेऽर्थे आत्मनेपदं भवति॥शतमपजानीते॥शतं वारयतीत्यर्थः॥
अकर्मकत्वा॥अकर्मको ज्ञाधातोरात्मनेपदं भवति॥३१॥त्वया दत्तवरोदीर्णस्तारकाख्यो महासुरः उपप्लवाय लो
कानां धूमकेतुरिवोत्थितः॥३२॥हे ब्रह्मन् तारकाख्यो महासुरः लोकानां उपप्लवाय उत्थितः॥उदितः उत्तिष्ठते॥

स्म उत्थितः॥उपप्लवनं उपप्लवः॥तस्मै उपप्लवाय॥क इव धूमकेतुरिव यथा धूमकेतुः लोकानां उपप्लवाय उत्थि
तस्तथा॥कथंभूतस्तारकः॥त्वया दत्तवरोदीर्णः॥त्वया दत्तो यो वरस्तेन उदीर्णः उत्कटः॥३२॥पुरे तावन्तमेवास्य तनोति र
विरातपं दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते॥३३॥हे ब्रह्मन् रविः सूर्यः अस्य तारकस्य पुरे नगरे तावन्तं
आतपं तनोति॥यावन्मात्रेण साध्यते॥आतपेन दीर्घिकाकमलोन्मेषः साध्यते॥तत्परिमाणमस्य तावान् तं ताव
न्तं॥यावत्परिमाणमस्य स यावन्मात्रः॥तेन तावन्मात्रेण दीर्घिकाणां वापीनां कमलानि तेषां उन्मेषो विकासः॥
सर्वाभिः सर्वदा चंद्रस्तं कलाभिर्निषेवते॥नादत्ते केवलां लेखां हरचूडामणीकृतां॥३४॥चंद्रः सर्वदा सर्वा
भिः सर्वाभिः कलाभिः तं तारकं निषेवते॥सेवते सेवायां॥अत्र स्पष्टतो प्रयोगः॥चंद्रः केवलां एकां हरचूडामणी
कृतां॥लेखां न आदत्ते॥न गृह्णाति॥अचूडामणिः चूडामणिः कृता चूडामणीकृता तां हरचूडामणीकृतां॥३४॥

यात्रनगतिरुद्यानेकुसुमसेयसाप्रसात्॥नवातिवायुस्तस्यपार्श्वेतालवृंतानिलाप्रधिकं॥३५॥हेअर्हन्नूवायुःतस्यपार्श्वेता
लवृंतानिलाप्रधिकंनवातितस्यतारकस्ययापार्श्वे॥तस्मिन्नूतस्यपार्श्वेबाडुमूलेतलौकद्वौ॥पार्श्वमस्त्रीतयोरप्रङ्ख्यमरः
कथंभूतोवायुः॥कुसुमसेयसाप्रसात्॥उद्यानेव्याप्तत्रिगति॥कुसुमानांसेवसंश्यसाप्रसंनयंतस्मात्॥कुसुमसेय
साप्रसात्॥हृत्वाव्याघुटितागतिर्यस्यसद्यान्नगति॥तालवृंतस्यव्यंजनस्यअनिलः॥तस्मात्॥अधिकं॥यत्रकर्मणितत्
तालवृंतानिलाप्रधिकं॥क्रियाविशेषणकाणी॥कर्मचंपुकत्रानपुंसककत्तव्वकथ्यां॥३६॥पर्यायसेवासुखत्रयुष्पसंनार ३०
तत्परः॥उद्यानपालसामान्यमूतवसमुपासते॥३६॥हेअर्हन्नू॥भूतवः॥तंतारकंउपासतेसेवते॥आत्मवाद्यका
रात्॥कथंउद्यानपालसामान्यं॥यथालवतितथाउद्यानपालेनमालिकेनसामान्यंसदृशंयत्कर्मतत्उद्यानपा
लसामान्यं॥किंकृत्वा॥पर्यायसेवासुखत्रय॥पर्यायेणक्रमेणआसेवा॥तांपर्यायसेवां॥कथंभूताःऋतवःपुष्पसंनारतत्प

राःपुष्पाणांसंभारःसमूहः॥तत्रतत्पराः॥सावधानाःश्रद्धा॥तस्योपायनयोग्यानिनिरत्नानिसरितोपतिः॥कथमप्यंन
सामंतरानिष्यतेप्रतीच्छते॥३७॥हेअर्हन्नू॥सरितोपतिःसमुद्रःरत्नानिअलसांधेतःतोयानांमध्येआनिष्यतेःकथ
मप्यमहत्ताकष्टेनप्रतीच्छते॥स्थापयति॥निष्पन्नमामयोंदीकस्यआनिष्पन्नः॥तस्याः॥आनिष्पन्ने॥निष्पन्नंया
दृपूकथंभूतानिरत्नानि॥तस्यतारकस्यउपायनयोग्यानि॥उपायनेढौकनिकायांयोग्यानि॥सदृशानि॥तानितस्यो
पायनयोग्यानि॥३७॥हालमणिशिखाश्चैनेवासुकिप्रमुखानि॥शि॥स्थिरप्रदीपत्वमेयभुजंगाःपर्युपासते॥३८॥
हेअर्हन्नवासुकिप्रमुखाःभुजंगाःपुनंतारकंउपासते॥सेवंते॥किंकृत्वा॥स्थिरप्रदीपतामेत्य॥प्राप्य॥आगत्य॥स्थिरप्र
दीपस्यभावःस्थिरप्रदीपता॥तांस्थिरप्रदीपतांकस्यांनिशि॥रात्रौ॥वासुकिःप्रमुखःआदौयेषांतेवासुकिप्रमुखाः
कथंभूताः॥हालमणिशिखाः॥हालंश्यामणीनोशिखाहालायेषांतेहालमणिशिखाः॥भुजगाः॥आद्ःसर्वः॥त्राय

नेष्टर्वेष्वय्या। एककर्तृकौ क्वा। समासो सा विमानत्वकर्तृकोयपूत्वास्त्वानेयश। ख्यातोसौ तः। यानुबंधा। इष्ट्गौ गे तू अपवर्ग
वर्णेषु। ग्रुत्य मिद्धं। ३९। तत्कृतानुग्रहापेक्षी तं मुग्धई तदारितैः। अनुकूलयतींद्रोपि कल्पद्रुमविरूपणैः। ३९। देवब्रह्म
न् इंद्रोपि तं तारकं कल्पद्रुमविरूपणैः। प्रयदं अनुकूलयति। अनुकूलं करोति अनुकूलयति। अनुदिनं आराधयति।
कल्पद्रुमाणां विरूपणानि। अलंकारास्तैः। कल्पद्रुमविरूपणैः। कथं भूतः इंद्रः। तत्कृतानुग्रहापेक्षी। तेन तारकेण कृतो
योनुग्रहः तं अपेक्षते। तच्छीलः। तत्कृतानुग्रहापेक्षी। कथं भूतैः कल्पद्रुमविरूपणैः। इतदारितैः। इतैः चरैः दारितानि
प्रेषितानि तैः। इतदारितैः। ३९। इहमाराध्यमानोपि क्लिश्नाति भुवनत्रयं। शाम्येत्प्रत्युपकारेण नोपकारेण दुर्ज ३१
नः। ४०। हे ब्रह्मन् इह अमुना प्रकारेण रविशशिपवनऋतुउदधिसुरगसुरेशैः आराध्यमानोपि सेव्यमानो
पि स तारकः दैत्यः भुवनत्रयं क्लिश्नाति। किंवत् उपतापो। तापयति। आराध्यते आराध्यमानः। दुर्जनः प्रत्युपकारे

णशाम्येत् न निवर्तते। अपकारं विरुद्धकरणं प्रत्यपकारः। विरुद्धकरणं तेन न नोपकारेण। दुर्जनः शत्रुः उपकारेण नो शा
म्येत्। ४०। तेनामरवधूहस्तसदयालूनपल्लवाः। अभिज्ञाश्छेदपातानां क्रियंते नंदनद्रुमाः। ४१। तेन तारकेण नंदन
द्रुमाः छेदपातानां अभिज्ञाः ज्ञातारः क्रियंते। कथं भूता नंदनद्रुमाः। अमरवधूहस्तसदयालूनपल्लवाः। अमरवधू
नां सुरललनानां हस्तैः करैः सदयं यथा स्यात्तथा आलूनाः छेदिताः पल्लवाः किसलया येषां ते अमरवधूहस्तसदयालू
नपल्लवाः। छेदाश्च पाताश्च छेदपाताः तेषां छेदपातानां। छेदं ते पात्यंते इत्यर्थः। ४१। बीज्यते स हि संसुप्तः श्वाससा
धारणानिलैः। चामरैः सुरबंदीनां बाष्पशीकरवर्षिभिः। ४२। हे ब्रह्मन् सुरबंदीनां चामरैः स तारकः बी
ज्यते। कथं भूतैश्चामरैः। श्वाससाधारणानिलैः। श्वासेन साधारणः समानः अनिलो येषां ते तानि तैः श्वाससाधा
रणानिलैः। पुनः कथं भूतैः चामरैः। बाष्पशीकरवर्षिभिः। अर्थात् सुरबंदीनां बाष्पकणान् वर्षितुं शीलं येषां

तानि तैः बाष्पशीकरवर्षिभिः॥ अर्थात्चामराणि॥ सुरवंदीनां बाष्पकणान् वर्षंतीति तानि वा॥४२॥ उत्पाट्य मेरुशृंगाणि
क्षुण्णानि हरितां खुरैः॥ आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु॥४३॥ देव ब्रह्मन् तेन तारकेण मेरुशृंगाणि उत्पाट्य स्व
स्वेषु वेश्मसु॥ आक्रीडपर्वताः कल्पिताः॥ केलिशैलाः संरचिताः॥ आक्रीडस्य पर्वताः॥ आक्रीडपर्वताः॥ कथंभूतानि
मेरुशृंगाणि॥ हरितां नीलसूर्याश्वानां खुरैः क्षुण्णानि॥ कोदितानि॥४३॥ मंदाकिन्याः पयः शेषं दिग्वारणमदाविलं॥ हे
मांभोरुहसस्यानां तद्वाप्यो धाम सांप्रतं॥४४॥ देव ब्रह्मन् मंदाकिन्याः पयः तोयं शेषं उद्धृतं वर्तते॥ शिष्यते इति शेषं
उद्धृतं वर्तते शिष्यते इति शेषं॥ शिषू सर्वोपयोगे॥ शिषु॥ कथंभूतं पयः॥ दिग्वारणमदाविलं॥ दिशां वारणाः दंतिनः दिग्वा ३२
रणाः तेषां मदः तेन आविलं कलुषं॥ दिग्वारणमदाविलं॥ सांप्रतं इदानीं सति॥ संप्रत्येव सांप्रतं॥ स्वार्थे अण्॥ हेमांभो
रुहसस्यानां धाम तद्वाप्यः तस्य तारकस्य वाप्यः तद्वाप्यः तदेमस्वासु वर्णस्य अंभोरुहाणि तान्येव सस्यानि तेषां हेमां

भोरुहसस्यानां॥ उत्खातप्रतिरोपितानि सस्यानि॥ इदानीं सुवर्णकमलानि तस्य तारकस्य वापीषु वर्तंते॥४४॥ भुवना
लोकनप्रीतिः स्वर्गिभिर्नानुभूयते॥ खिलीभूते विमानानां तदापातभयात्पथि॥४५॥ स्वर्गिभिर्देवैः भुवनालोकनप्रीतिर्न
अनुभूयते॥ न प्राप्यते॥ क्व सति॥ विमानानां पथि मार्गे आकाशे खिलीभूते सति॥ शून्यत्वं प्राप्ते सति॥ कस्मात्॥ तदापातभ
यात्॥ तस्य आपातः तस्मात् भयं तस्मात्॥ तदापातभयात्॥ भुवनानां द्वीपादीनां आलोकनं दर्शनं तस्य प्रीतिः परितोषः
भुवनालोकनप्रीतिः॥४५॥ यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः॥ जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः॥४६॥ दे
व ब्रह्मन् स मायी तारकः नः अस्माकं हव्यं जातवेदोमुखात् आच्छिनत्ति॥ माया विद्यते यस्य असौ मायी॥ जातवेदसः अग्नेर्मुखं
तस्मात्॥ हव्यं पुरोडाशादि॥ कथंभूतं हव्यं॥ यज्वभिः याज्ञिकैः विततेषु विस्तीर्णेषु अध्वरेषु यज्ञेषु संभृतं॥ कृतं॥ कथंभू
तानां नः॥ अस्माकं मिषतां स्पर्द्धमानानां॥ पश्यतां वा पश्यतां॥४६॥ उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च॥ देहबद्धमिवेंद्र
स्य चिरकालार्जितं यशः॥४७॥ देव ब्रह्मन् तेन तारकेण उच्चैःश्रवाः हयरत्नं उच्चैर्यथा स्यात्तथा प्रकटं यथा स्यात्तथा

सितया अदारि कृतं॥हयानां मध्ये रत्नं हयरत्नं॥उच्चैः उन्नते श्रवसी कर्णौ यस्य स उच्चैःश्रवाः॥तन्त्रे दत्ते इंद्रस्य
देहबद्धे चिरकालार्जितं यशइव॥देहेन बद्धं देहबद्धं॥चिरकालेन अर्जितं चिरकालार्जितं॥४७॥तस्मिन्नुपा
यास्सर्वे नः क्रूरे प्रतिहतक्रियाः॥वीर्यवंत्योषधानीव विकारे सान्निपातिके॥४८॥हे ब्रह्मन् तस्मिन् क्रूरे तारकेन
अस्माकं सर्वे उपायाः सामदानभेददंडाः प्रतिहतक्रियाः वर्त्तंते॥प्रतिहता विघ्निता क्रिया व्यापारो येषां ते प्र
तिहतक्रियाः॥कथं भूता उपायाः॥तस्मिन् क्रूरे तस्मिन् सन्निपातिके विकारे वीर्यवंति औषधानीव॥यथा सांनिपातिके वि ३३
कारे वीर्यवंति औषधानि प्रतिहतक्रियाः भवंति॥तथा सन्निपाते भवः सान्निपातिकः तस्मिन् सान्निपातिके त्रिदोषज
वीर्यं विद्यते येषां ते वीर्यवंति॥४९॥जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा॥हरिचक्रेण तेनास्य कंठे निष्क
इवार्पितः॥५०॥हे ब्रह्मन् यत्र हरिचक्रे नः अस्माकं जयाशा वर्त्तते॥तेन हरिचक्रेण अस्य तारकस्य कंठे निष्क
इव अर्पितः॥अर्पितः॥जयस्य आशा जयाशा॥निष्कः ग्रीवा [illegible] तेन हरिचक्रेण प्रतिघातोत्थितार्चिषा प्र

॥५१॥तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु॥अभ्यस्यंति तटाघातं निर्जितैरावता गजाः॥५२॥हे ब्रह्मन् अद्य तदीया
गजाः पुष्करावर्तकादिषु तोयदेषु तटाघातं अभ्यस्यंति॥पुष्करश्च आवर्तकश्च पुष्करावर्तकौ तौ आदिर्येषां ते पुष्करा
वर्तकाः तेषु पुष्करावर्तकादिषु॥कथंभूता तदीया गजाः॥निर्जितैरावताः॥निर्जितः ऐरावतो यैस्ते निर्जितैरावताः॥तस्य
तारकस्य इमे तदीयाः॥तटस्य आघातः तटाघातः तं तटाघातं॥तोयं ददातीति तोयदः॥तेषु तोयदेषु॥५२॥तदिच्छामो
विभो स्रष्टुं सेनान्यं तस्य शांतये॥कर्मबंधच्छिदं धर्मं भवस्येव मुमुक्षवः॥५३॥हे ब्रह्मन् हे विभो॥तस्मात् कारणात् वा
यं तस्य तारकस्य शांतये नाशाय॥सेनान्यं सेनापतिं स्रष्टुं इच्छामः॥सृज्यते असौ स्रष्टव्यः स्रष्टुं॥यथा स्रष्टुमिति वाक्य
विशेषः॥के कमिव॥मुमुक्षवः॥योगिनः भवस्य संसारस्य शांतये नाशाय॥कर्मबंधच्छिदं धर्ममिव॥कर्मबंधं छिनत्ती
ति कर्मबंधच्छित् तं कर्मबंधच्छिदं॥५३॥गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्॥प्रत्यानेष्यति शत्रुभ्यो वंदीमिव
जयश्रियं॥५४॥हे ब्रह्मन् गोत्रभित् इंद्रः सुरसैन्यानां गोप्तारं रक्षकं यं पुरस्कृत्य अग्रे कृत्वा शत्रुभ्यः

यश्छिद्रैर्व्याप्यानेष्यति॥कांसिवावेदीमिव॥नारीमिव॥हृदयमपि प्राप्नोतीत्यर्थः॥गोष्ट्यां॥त्रायंतेरक्षंतीतिगोत्राः॥पर्वताः
तान्‌त्रायंतेरक्षंतीतिगोत्रत्रिन्॥इंद्र॥सुराणांसैन्यानितेषांसुरसैन्यानां॥पुरस्कृतेति॥अग्रस्थापयंगतिर्वेन॥नमस्पुरसोर्गत्योरितिग
त्वे॥५१॥वचस्यवसरेतस्मिन्ससर्जगिरमात्मभूः॥गर्जितानंतरांवृष्टिंसौभाग्येनजिगायया॥५२॥तस्मिन्बार्हस्पत्येव
चस्यवसरेसति॥समयेसति॥आत्मभूर्ब्रह्मा॥गिरंससर्ज॥उवाच॥यागीःवाणीसौभाग्येनसुंदरत्वेनगर्जितानंतरांवृष्टिं
जिगाय॥अजैषीत्॥जितवतीत्यर्थः॥गर्जिताअनंतरा॥गर्जितानंतरा॥नअंतरंयस्याःसाअनंतरा॥गर्जितात्अने
तरा॥गर्जितानंतरा॥तांगर्जितानंतरां॥गर्जिततात्कालिकी॥वृहस्पतेर्वचः॥गर्जितसदृशं॥वृष्टिसमंब्रह्मणोवचः २४
जिगाय॥अजैःगिःस्वरपरोत्त्वयोः॥जिःस्थानेगिरादेशः॥५३॥संपत्स्यतेवःकामोयंकालःकश्चित्प्रतीक्ष्यतां॥नत्वस्यासिद्धौयास्यामि
सर्गव्यापारमात्मना॥५४॥हेदेवाः॥वःयुष्माकंअयंकामःसंपत्स्यते॥संपत्स्यति॥सवद्भिःकश्चित्किंचित्कालःप्रती
क्ष्यतां॥सह्यतां॥तुपुनःअहंअस्यकार्यस्यसिद्धौआत्मनःस्वयंसर्गव्यापारेसृष्टिकर्मनयास्यामि॥नगमिष्या

मि॥कस्मात्तुइत्याह॥५४॥इतःसदैत्यःप्राप्तश्रीर्नेतएवार्हतिक्षयं॥विषवृक्षोपिसंवर्ध्यस्वयंछेत्तुमसांप्रतं॥५५॥सदैत्यः
तारकःइतःसकाशात्प्राप्तश्रीःप्राप्ताश्रीर्येनप्राप्तश्रीः॥सदैत्यःइतएवमत्सकाशादेवक्षयंनार्हति॥नाशंनयाति॥स्वयं
आत्मनाकर्त्रा॥विषवृक्षोपिकर्मसंवर्ध्यवृद्धिंनीत्वाछेत्तुंअसांप्रतंअयुक्तं॥संवर्द्धनंपूर्वंसंवर्ध्य॥छेदनायाछेत्तुं॥तृद
नूलिख्यते॥तस्मात्इतःपंचम्यास्तसू॥तत्रेदमिःइदमस्थानेइकारः॥५५॥वृतंतेनेदमेवप्राक्मयाचास्मैप्रतिश्रुतं॥
वरेणशमितंलोकानलंदग्धुंहितत्तपः॥५६॥तेनतारकेणप्राक्पूर्वंइदंवृतंप्रार्थितंमयावास्सरत्रिंशद्वर्षाणीयिवा
देवानामवध्यत्वं॥इतितेनवृतं॥पुनःमयाचैतारकायप्रतिश्रुतं॥अंगीकृतं॥तत्तपःवरेणशमितं॥अनिर्वापि
तंसत्लोकान्दग्धुंअलंसमर्थं॥तस्यतारकस्यतपःतत्तपः॥५६॥संयुगेसांयुगीनंतमुद्यतंप्रसहेतकः॥अंशा
दृतेनिषिक्तस्यनीललोहितरेतसः॥५७॥संयुगेसंग्रामेउद्यतं॥तंतारकंकर्म॥तवतामध्येकःकर्ताप्रसहेत॥अ
पिःरनकोपि॥कथंभूतंसांयुगीनं॥संयुगेसाधुःसांयुगीनः॥तंसांयुगीनं॥कस्मात्॥नीललोहितरेतसःअंशात्

विनागात्ववृद्ध्याते॥ विना॥ नीललोहितईश्वरः तस्य रेतः नीललोहितरेतसः॥ तस्य नीललोहितरेतसः॥ कथंभूतस्य नील-
लोहितरेतसः॥ निषेकस्य॥ ॥५७॥ सहि देवः परंज्योतिः तमःपारे प्रतिष्ठितं॥ परिछिन्नप्रभावर्द्धिर्न मया न च विष्णुना॥ ५८॥
सदेवः महेश्वरः परंज्योतिः परं उत्कृष्टं तेजः कथंभूतं ज्योतिः तमःपारे प्रतिष्ठितं॥ तमसः पारं प्रांतः तस्मिन् तमःपारे॥
अविद्यातीतं सो देवाः मया ब्रह्मणा च पुनः विष्णुना सदेवः ईश्वरः परिछिन्नप्रभावर्द्धिर्न॥ परिछिन्ना ज्ञाता निश्चयी-
कृता प्रभावानां महिम्नां ऋद्धिः संपत्तयस्य स परिछिन्नप्रभावर्द्धिः॥ ५८॥ उमारूपेण ते यूयं संयमस्तिमितं मनः शंभो- ३५
र्यतध्वमाक्रष्टुमयस्कांतेन लोहवत्॥ ५९॥ सो देवाः ते यूयं उमारूपेण करणभूतेन शंभोः महादेवस्य मनः आक्रष्टुं
यतध्वं॥ आकर्षणाय आक्रष्टुं कथंभूतं मनः॥ संयमस्तिमितं॥ संयमेन स्तिमितं॥ समाधिनिश्चलं॥ केन किंवत्॥ अ-
यस्कांतेन चुंबकपाषाणेन लोहवत्॥ यथा अयस्कांतेन मणिना लोहं आकृष्यते॥ तथा यूयं उमारूपेण शंभो-
र्मनः आक्रष्टुं यतध्वं॥ इत्यन्वयः॥ ५९॥ उभे एव क्षमे वोढुमुभयोर्बीजमाहितं॥ सा वा शंभोस्तदीया वा मूर्तिर्जलम-

यी॥ ६०॥ हे देवाः उभे स्त्रियौ एव निनिश्चितं उभयोः ईश्वरब्रह्मणोः आहितं निक्षिप्तं बीजं रेतः वोढुं क्षमे समर्थे॥ वहनाय वो-
योः को इत्याह॥ शंभोः आहितं बीजं वोढुं सा माया॥ अथवा तदीया जलमयी मूर्तिः॥ मम ब्रह्मणः आहितं बीजं रेतः
वोढुं क्षमा समर्था॥ तस्य ईश्वरस्य इदं तदीयं॥ जलेन निर्वृत्ता जलमयी॥ ६०॥ तस्यात्मा शितिकंठस्य सेनापत्यमुपेत्य वः॥
मोक्ष्यते सुरबंदीनां वेणीर्वीर्यविभूतिभिः॥ ६१॥ तस्य शितिकंठस्य नीलकंठस्य आत्मा पुत्रः वः युष्माकं सेनापत्यमुपे-
त्य प्राप्य सुरबंदीनां वेणीः कसमोक्ष्यते॥ सेनापतेर्भावः सेनापत्यं च सेनाथ जंः॥ कानि॥ वीर्यविभूतिभिः॥ वीर्याणां तेजसां
विभूतयः संपत्तयस्ताभिः॥ वीर्यविभूतिभिः॥ ६१॥ इति व्याहृत्य विबुधान् विश्वयोनिस्तिरोदधे॥ मनस्याहितकर्तव्यास्ते-
पि देवा दिवं ययुः॥ ६२॥ विश्वयोनिर्ब्रह्मा तिरोदधे॥ अदृश्यो बभूव॥ किं कृत्वा॥ विबुधान् इति व्याहृत्य उक्त्वा॥ व्याहरणं
कृत्वा॥ व्याहृत्य॥ विश्वस्य योनिः उत्पत्तिस्थानं॥ तेपि देवाः दिवं प्रति ययुः॥ कथंभूताः विबुधाः मनस्याहितकर्तव्याः॥ आहि-
तं आरोपितं कर्तव्यं यैस्ते मनस्याहितकर्तव्याः॥ आहृतकर्तव्याः॥ कार्याः॥ ६२॥ तत्र निश्चित्य कंदर्पमगमत्पाकशास-

नः॥मनसा कार्यसंसिद्धै त्वरा द्विगुणरंहसा॥ ...आलत्वा समनः॥ तत्र सदसि निक्षिप्तं मैत्रिभिः सदनिश्चयं कृत्वा
कार्यसंसिद्धै मनसा केदयै डमरुः॥ कामं समनाद्देहर्थं॥६४॥ ...थंभूतेन मनसा॥ त्वरा द्विगुणरंहसा॥ द्विगुणो रंहो
वेगो ...य स्यास्तूतत्वा तेन द्विगुणरंहसा॥ ...॥ पाको नाम असुरस्याकत्यचाशनात् वधात् पाकशासनः॥६५॥ अ
थ सुललितयोषिद्भ्रूलताचारुशृंगं रतिवलयपदांके चापमासज्य कंठे॥ सहचरमधुहस्तन्यस्तचूतांकुरा
स्त्रः शतमखमुपतस्थे प्रांजलिः पुष्पधन्वा॥६४॥ अथ अनंतरं पुष्पधन्वा कामः शतमखं इंद्रं उपतस्थे आगतः॥ २६
किं कृत्वा कंठे चापं आसज्य॥ आरोप्य॥ कथंभूतः पुष्पधन्वा॥ प्रांजलिः प्रकर्षेण बद्धो अंजलिर्येन सः प्रांजलिः पुनः क
थंभूतः पुष्पधन्वा सहचरमधुहस्तन्यस्तचूतांकुरास्त्रः॥ सहचरो यो मधुः तस्य हस्ते न्यस्तानि दत्तानि चूतांकुरा एव अस्त्रा
णि येन स सहचरमधुहस्तन्यस्तचूतांकुरास्त्रः॥ कथंभूते कंठे॥ रतिवलयपदांके रतेः वलयानि तेषां पदानि चिह्नानि
तेषां अंको लांछनं यत्र सः तस्मिन्॥ रतिवलयपदांके॥ किंविशिष्टं चापं सुललितयोषिद्भ्रूलताचारुशृंगं॥ सुल

लिता विलासान्विता या योषित् तस्याः भ्रूलता तद्वत् चारुणी मनोहरे शृंगे अग्रभागौ यस्य तत्॥ सुललितयोषिद्भ्रूल
ताचारुशृंगं॥ चापं अस्त्रं तथा स्त्रियां॥ धनुश्चापौ धन्वशरासनकोदंडकार्मुकं इत्यमरः॥६४॥ ॥इति श्रीकुमारसंभवे म
हाकाव्ये कालिदासकृतौ व्याख्यायां द्वितीयः सर्गः॥ ॥२॥ ॥श्री॥ ॥तस्मिन् मघोनस्त्रिदशान् विहाय
सहस्रमक्ष्णां युगपत्पपात॥ प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु॥१॥ मघोनः इंद्रस्य अक्ष्णां सह
स्रं तस्मिन् कामे युगपत् समकालं पपात॥ किं कृत्वा त्रिदशान् देवान् विहाय त्यक्त्वा॥ विहाय त्यक्त्वा विहाय यतः का
रणात् प्रभूणां स्वामिनां आश्रितेषु भृत्येषु गौरवं आदरः प्रायो बाहुल्येन चलं अस्थिरं भवति॥ कया॥ प्रयोजनापेक्षि
तया॥ कार्यं वा सनप्रयोजनस्य अपेक्षा तस्याः॥ ...प्रयोजनापेक्षया॥१॥ स वासवेनासनसंनिकृष्टमितो
निषीदेति विसृष्टभूमिः॥ भर्तुः प्रसादं प्रतिनंद्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनं॥२॥ स कामः मिथः एकांते
...वक्तुं प्राक्रमत आरेभे॥ किं कृत्वा भर्तुः प्रसादं ...प्रतिनंद्य॥ प्रतिनंद्य ...प्रतिनंद्य॥ कथंभूतः कामः वा

सवेन इंद्रेण॥आसनसंनिकृष्टं पीठसमीपं यथा भवति तथा॥इति निस्पृहत्वमिः॥निस्पृहशब्दवाच्यमिर्यस्मै स निस्पृ
हस्त्वमिः॥इतीति किं॥हे इतो निषीदेति॥उपविश॥इदम्॥अस्मि भ्रूकृतः सार्वविक्त किंकसमुदये के॥उत्कंठानेतस्मा
तत्वेदमिः॥इदमस्थाने इहा इतः सिद्धं॥२॥आज्ञापयामास विशेषा कुंसी लोके प्रणयने करणीयम स्ति॥अनुग्रहं संस्मरणप्र
वृत्त मिच्छामि संवर्द्धितमाज्ञयाते॥३॥देवसं सांप्रुरूषाणां ज्ञातविशेषा॥यो के...स्वसुखादिस्रुयतृतेतवकरणीयंक
र्त्तव्यं अस्ति तत् आज्ञापय॥ज्ञातः विशेषो येन स ज्ञातविशेषः॥तस्य संबोधनं क्रियते॥हे ज्ञातविशेष विदितातिश
याप्त इदं ते तव अनुग्रहं आज्ञया संवर्द्धितं वदादेशेन वृद्धिं नेतुं इच्छामि॥कामये॥कथंभूतं अनुग्रहं संस्मरणप्रवृत्तं
संस्मरणेन प्रवृत्तः॥तं संस्मरणप्रवृत्तं॥संवर्द्धनाय संवर्द्धितं॥३॥केनाप्यस्या फलकांक्षिणा ते नितांतदीर्घैर्
नितांततपोभिः॥यावद्भवत्याहितसायकस्य मकार्मुकस्यास्य निदेशवर्त्ती॥४॥हे इंद्र॥केन पुरुषेण॥तपोभिः ते
तव अस्य स्या कोपः जनिता॥उत्पादिता॥कथंभूतेन तेन फलकांक्षिणा॥फलं कांक्षते फलकांक्षी तेन फल २७

कांक्षिणा॥कथंभूतैस्तपोभिः॥नितांतदीर्घैः॥नितांतं अतिशयेन दीर्घानि तैः नितांतदीर्घैः॥चिरसंचितैः॥इत्यर्थः॥यावत्
सपुरुषः॥अस्य कार्मुकस्य निदेशवर्त्ती॥भवति तावत् ते तव अस्य स्यास भवतु॥कथंभूतस्य मकार्मुकस्य आहितशा
यकस्य॥आहितः सायको यत्र तत् तस्य आहितसायकस्य॥आरोपितशरस्य॥निदेशो आदेशो वर्त्तितुं शीलं यस्य स निदेश
वर्त्ती॥५॥असंमतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात्प्रपन्नः॥बद्धश्चिरं तिष्ठतु सुंदरीणां आरेचितभ्रूचतुरैः कटाक्षैः॥६॥
हे इंद्र तव असंमतः॥अनिष्टः शत्रुः कः॥पुनर्भवक्लेशभयात् मुक्तिमार्गं प्रपन्नः॥पुनर्भवं पुनर्भवः॥तस्य क्लेशः॥तस्मात्
यद्भयं तस्मात्॥पुनर्भवक्लेशभयात्॥मुक्तेर्मार्गः मुक्तिमार्गः॥न संमतः असंमतः॥स पुरुषः सुंदरीणां कटाक्षैः बद्धः चि
रं तिष्ठतु॥कथंभूतैः कटाक्षैः॥आरेचितभ्रूचतुरैः॥आरेचिता भ्रूभिर्नर्तिता भ्रूलताः भ्रुवः तैः चतुराः मनोहराः तैः आरेचितभ्रूचतुरैः
॥अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते॥कस्यार्थधर्मौ वद पीडयामि सिंधोस्तटावोघ इव प्रवृद्धः॥७॥
हे इंद्र अहं ते तव कस्य द्विषः शत्रोः अर्थधर्मौ पीडयामि॥तत्त्वं वद॥कथंभूतस्य द्विषः॥उशनसा शुक्रेण नीतिं अध्यापि

नस्या॥पाश्रितस्य॥पुनः कथंभूतस्य द्विषः प्रद्युम्नरागप्रणिधेः प्रद्युम्नप्रेरितः राग एव प्रणिधिः चरो येन स तस्य॥प्रद्युम्न
रागप्रणिधेः॥कस्य अहं अर्थधर्मौ पीडयामि॥कः कोऽसावाप्रबद्धः हृद्गितः आघः हरः सिंधोसरितः तटेऽस्ति॥६॥कामेक
पत्नीव्रतदृढस्वशीलां लोलं मनस्याऽऽकृतया प्रविष्टां॥नितंबिनीमिच्छसि मुक्तलज्जां कंठे स्वयंग्राहनिषक्तबाहुं॥७॥देहीड्
खंकां नितंबिनीं इच्छसि॥कथंभूतां एकपत्नीं एक एव पतिर्यस्याः सा एकपत्नी तां एकपत्नीं॥पतिव्रतां॥पुनः कथंभू
तां व्रतदृढस्वशीलां व्रतदृढं स्वं शीलं यते व्रतदृढस्वशीला तां व्रतदृढस्वशीलां॥पुनः कथंभूतां एकपत्नीं चारुतया म
नोहरत्वेन लोलं मनः प्रविष्टां॥पुनः कथंभूतां एकपत्नीं मुक्तलज्जां मुक्ता लज्जा यया सा मुक्तलज्जा तां मुक्तलज्जां॥
पुनः कथंभूतां एकपत्नीं॥कंठे स्वयंग्राहनिषक्तबाहुं॥स्वयं गृहीतः इति स्वयंग्राहो॥स्वयंग्राहो निषक्तो बाहुर्यस्याः
सा स्वयंग्राहनिषक्तबाहुः॥तां स्वयंग्राहनिषक्तबाहुं॥७॥कथयामि किमिह सहसापराद्धः पादानतः कोपनयावधू
तः॥तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरं॥८॥देहीड् त्वं पादानतः सन् कया कोपनया अवधूतोऽसि॥ २५

निराकृतोऽसि॥कथंभूतस्त्वं॥सहसापराद्धः॥सहसा झटिति अपराद्धं येयस्यासौ सहसापराद्धः॥आर्द्रापराद्धः॥देकामिनु
परं तस्याः शरीरं प्रवालशय्याशरणं करिष्यामि॥कथंभूतं शरीरं दृढानुतापं॥दृढः गाढः अनुतापो यस्य तत् दृढानुतापं॥
प्रवालैः पल्लवैः रचितशय्या प्रवालशय्या॥सैव शरणं यस्य तत् प्रवालशय्याशरणं॥८॥प्रसीद विश्राम्यतु वीर वज्रं न मे
मदीयैः कतमः सुरारिः॥बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योपि कोपस्फुरिताधराभ्यः॥९॥हे वीर त्वं प्रसीद॥वज्रं विश्राम्य
तु मदीयैः शरैः सुरारिः कथंभूतः कतमः॥किंजातीयः किंप्रमाणः इत्यर्थः॥स सुरारिः स्त्रीभ्योपि बिभेतु॥कथंभूतः सुरारिः मो
घीकृतबाहुवीर्यः॥अमोघं मोघं कृतं मोघीकृतं बाहुवीर्यं यस्य सः मोघीकृतबाहुवीर्यः॥निष्फलीकृतनिजदोर्दंडप
राक्रमः॥कथंभूताभ्यः स्त्रीभ्यः॥कोपस्फुरिताधराभ्यः॥कोपेन स्फुरिता अधरा यासां ताः कोपस्फुरिताधराः ताभ्यः को
पस्फुरिताधराभ्यः॥९॥तव प्रसादात्कुसुमायुधोपि सहायमेकं मधुमेव लब्ध्वा॥कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्यु
तिं के मम धन्विनोन्ये॥१०॥हे वीर कुसुमायुधोपि अहं तव प्रसादात् एकं मधुं सहायं लब्ध्वा हरस्यापि धैर्यच्युतिं

रां कुर्यां॥ कथंभूतस्य पिनाकपाणेः॥ पिनाकं पाणौ यस्यासौ पिनाकपाणिः तस्य पिनाकपाणेः॥ ममाग्रे अन्ये धन्विनः कोऽपि
पि तु न केपि॥१०॥ अथोरुदेशादवतार्य पादमाक्रांतसंभावितपादपीठं॥ संकल्पितेऽर्थे विवृतात्मशक्तिमाखंडलः काम
मिदं बभाषे॥११॥ अथ अनंतरं आखंडलः इंद्रः कामं प्रति इदं वक्ष्यमाणवस्तु उवाच॥ किं कृत्वा॥ ऊरुदेशात् पादं अवता
र्य ऊरोः देशः तस्मात् ऊरुदेशात्॥ कथंभूतं पदं॥ आक्रांतसंभावितपादपीठं॥ आक्रांत्या अधिष्ठानेन संभावितं अनुगृही
तं पुरुकृतं नीतं पादपीठं येन सः तं आक्रांतसंभावितपादपीठं॥ कथंभूतं कामं संकल्पितेऽर्थे विवृतात्मशक्तिं॥ विवृता प्रक ३९
टीकृता आत्मशक्तिर्येन सा विवृतात्मशक्तिः तं विवृतात्मशक्तिं॥१२॥ सर्वं सखे त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवांश्च॥
श्च॥ वज्रं तपोवीर्यमहत्सु कुंठं त्वं सर्वतोगामि च साधकं च॥१३॥ हे सखे हे काम एतत् सर्वं त्वयि उपपन्नं॥ युक्तं॥ हे काम मम
अस्त्रे उभे द्वे॥ एकं कुलिशं वज्रं॥ च पुनः द्वितीयं त्वान्॥ वज्रं अस्त्रं तपोवीर्यमहत्सु कुंठं॥ तपसः धराः एवं वर्तते॥ तपसः वीर्यं तेन
महांतः तेषु तपोवीर्यमहत्सु॥ त्वं अस्त्रं सर्वतोगामि॥ सर्वत्र गच्छतीति सर्वतोगामि॥ तापसेषु संगोत्पादकत्वात्॥ च पुनः

साधकं॥ साधकं साधयतीति साधकं वांछितकार्यनिष्पादकं॥ अस्त्रापेक्षया नपुंसकत्वं॥१३॥ अवैमि ते सारमतः खलु त्वां का
र्ये गुरुण्यात्मसमं नियोक्ष्ये॥ व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः॥१४॥ हे काम अहं ते तव सारं बलं अ
वैमि जानामि॥ अतः कारणात् त्वां खलु निश्चयेन गुरुणि कार्ये महति॥ कार्ये नियोक्ष्ये॥ आदेशं प्रदास्ये॥ तथा च॥ कृष्णेन
शेषः देहोद्वहनाय व्यादिश्यते॥ आदेशो दीयते॥ देहस्य उद्वहनं तस्मै देहोद्वहनाय॥ किं कृत्वा॥ भूधरतां अवेक्ष्य दृष्ट्वा॥ भुवं धर
तीति भूधरः तस्य भावः तां भूधरतां॥१४॥ आशंसता बाणगतिं वृषांके कार्यं त्वया नः प्रतिपन्नमेव॥ निबोध यज्ञांशभुजामि
दानीमुच्चैर्द्विषामीप्सितमर्थमत्र॥१५॥ हे काम त्वया नः अस्माकं कार्यं प्रतिपन्नकल्पं ईषत् अपरिसमाप्तं॥ प्रतिपन्नक
ल्पं॥ अंगीकृतप्रायं॥ किं कुर्वता त्वया॥ वृषांके ईश्वरे बाणगतिं आशंसता॥ कथयता॥ हे काम त्वं अत्र ईश्वरे इदानीं य
ज्ञांशभुजां देवानां ईप्सितं अर्थं निबोध जानीहि॥ कथंभूतानां यज्ञांशभुजां॥ उच्चैर्द्विषां॥ बलवद्वैरिणां॥ उच्चैर्द्विषो येषां
ते उच्चैर्द्विषः तेषां उच्चैर्द्विषां॥ यज्ञांशं भुंजते यज्ञांशभुजः तेषां यज्ञांशभुजां॥१५॥ निबोधेत्यत्र इन न्यु यज्ञादेवानये॥

॥अमीह्विवीर्यप्रसवंसवस्यजयायसेनान्यमुशंतिदेवाः॥सचत्वदेकेषुनिपातसाध्योब्रह्मांगभूर्ब्रह्मनियोजितात्मा॥१५
हेकामअमीदेवाःसवस्यईश्वरस्यवीर्यप्रसवंरेतःसमुद्भवंसेनान्यंउशंति॥वांछंति॥कस्मैजयाय॥सईश्वरःत्वदेकेषु
निपातसाध्यः॥तवएकःइषुःतस्यनिपातःतेनसाध्यः॥कथंभूतःसब्रह्मांगभूः॥ब्रह्मणिनियोगःअंगभूःतनयः॥अथ
वाअंगभूःस्तुत्योयस्यसब्रह्मांगभूः॥अथवाब्राह्मणाःदेवस्यअंगानियज्ञातेषांस्थानंमुनः॥कथंभूतःसब्रह्मणि
योजितात्मा॥योजितआत्मायेनसयोजितात्मा॥निह्वितचेतावशीकांतौवशीवर्तमानाश्रुंति॥आविश्ःअदादेत्यस्य
वजिस्यधिवष्टिःसंप्रसारणेवस्यउशंति॥१५॥तस्मैहिमाद्रेःप्रयतांतनूजांजितात्मनेरोचयितुंयतस्व॥योषित्सुतद्वी ४०
र्यनिषेकभूमिःसैवक्षमेत्यात्मभुवोपदिष्टा॥१६॥हेकामत्वंहिमाद्रेःतनूजांपुत्रींतस्मैईश्वराययरोचयितुंयतस्वायतलं
कथारोचनायरोचयितुं॥कथंभूतायतस्मैयतात्मने॥यतःआत्मायेनसयतात्मा॥तस्मैयतात्मने॥हेकामआत्मभुवाब्र
ह्मणाइतिउपदिष्टं॥कथितंइतीति॥किं॥योषित्सुस्त्रीषुमध्येसापार्वतीतद्वीर्यनिषेकभूमिःक्षमासमर्था॥तस्यईश्वरस्य

वीर्यंतस्यनिषेकःक्षेपःतस्यभूमिःस्थानंतद्वीर्यनिषेकभूमिः॥१६॥गुरोर्नियोगाच्चनगेंद्रकन्यास्थाणुंतपस्यंतमधित्यकायां॥
अन्वासइत्यप्सरसांमुखेभ्यःश्रुतंमयामत्प्रणिधिःसवर्गे॥१७॥हेकाममयाअप्सरसांमुखेभ्यःइतिश्रुतं॥इतिआकर्णि
तं॥इतीति॥किं॥नगेंद्रकन्यापार्वतीगुरोर्नियोगात्॥हिमाचलस्यआदेशात्॥अधित्यकायांपर्वतोपरितनभूमौतपस्यं
तंतपःकुर्वंतंस्थाणुंईश्वरंअन्वास्ते॥सेवते॥मत्प्रणिधिःअप्सरसांवर्गःसमूहः॥मत्प्रणिधिः॥ममप्रणिधिःचरःप्रणिधिःप्रार्थने
चरेऽप्यमरः॥१७॥तद्गच्छसिद्ध्यैकुरुदेवकार्यमर्थोयमर्थांतरलभ्यएव॥अपेक्षतेप्रत्ययमुत्तमंत्वांबीजांकुरःप्रागुद
यादिवांभः॥१८॥हेकामतत्तस्मात्कारणात्त्वंसिद्ध्यैदेवकार्यायगच्छ॥हेकामत्वंदेवकार्यंकुरु॥हेअर्थांतरभ्यर्थात्
गम्योऽयंउत॥अयंतव॥तस्यसंबुद्धिःहेअर्थांतरभ्या॥अयंअर्थःकुमारलक्षणः॥लभ्यएव॥प्राप्यःएव॥केवलंअयंत्रि
पुरारकलक्षणःउत्तमंप्रत्ययंकारणंत्वां॥अपेक्षते॥वांछति॥कः॥किमिव॥बीजांकुरःउदयात्प्रसादात्प्राक्पूर्वंअंभः
जलंयथाबीजांकुरःउदयात्प्राक्पूर्वंरोदनिर्गमनात्॥त्वंअंभःनःवांछति॥तथा॥१८॥अस्मिन्सुराणांविजयाभ्युपायेत

हेव कामास्त्रगतिः कृती त्वं॥ अस्य प्रसिद्धं शमसेद्धिर्पुंसामनन्यसाधारणमेव कर्म॥१८॥ हे काम अस्मिन् सुराणां विज
[illegible]रूपाये विजयलक्षणे तवैव अस्त्रगतिः॥ तव अस्त्रप्रसरः॥ अतः सुराणां विजयाभ्युपाये त्वं कृती दक्षः कृतमस्यासि
तिकृती॥ अद्य सिद्धं अपि कर्म स्वल्पमपि॥ कर्मे तु सांप्रुरूपाणां यत्रासे भवति॥ कीर्तिस्फुटं एव ति निश्चितं॥ कथंभूतं कर्म अ
नन्यसाधारणं॥ न अन्यैः साधारणं सदृशं अनन्यसाधारणी॥ अन्यैरिदं कर्म कर्तुं न शक्यते॥ इति तावः॥१९॥ सुरा समभ्यर्थयि
तार एते कार्यं त्रयाणामपि विष्टपानां॥ चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः॥२०॥ हे काम एते सुरान्देवान्स
मभ्यर्थयितारः॥ समभ्यर्थयंते ते समभ्यर्थयितारः॥ याचका इत्यर्थः॥ त्रयाणां अपि विष्टपानां जगतां कार्यं हे काम ते त
व चापेन अतिहिंस्रं कर्म न॥ अतिघातुकं कर्म न॥ अहो इति आश्चर्ये॥ इति यद् हे काम त्वं स्पृहणीयवीर्योसि॥ स्पृहणीयं
वीर्यं यस्य सः स्पृहणीयवीर्यः॥२०॥ मधुश्च ते मन्मथ साहचर्यादसावनुक्तोपि सहाय एव॥ समीरण प्रेरयिता भवेति
व्यादिश्यते केन हुताशनस्य॥२१॥ हे मन्मथ असौ मधुः वसंतः ते तव अनुक्तोपि सहाय एव॥ कस्मात् साहचर्यात्॥ सह

चरस्य भावः साहचर्यं॥ तस्मात् साहचर्यात्॥ मित्रत्वात्॥ हे काम इति केन व्यादिश्यते ज्ञाप्यते॥ इतीति किं हे समीरण व
हुताशनस्य अग्नेः प्रेरयिता न वा प्रेरयतीति प्रेरयिता॥२१॥ तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे॥ ऐ
रावतास्फालनकर्कशेन हस्तेन पस्पर्श तदंगमिंद्रः॥२२॥ मदनः प्रतस्थे प्रस्थानं कृतवान्॥ किं कृत्वा॥ भर्तुः इन्द्रस्य आज्ञां
मूर्ध्ना इति आदाय॥ इतीति किं॥ तथेति प्रमाणमिति॥ आज्ञां कामिव॥ शेषामिव मालामिव॥ इन्द्रः हस्तेन तदंगं पस्पर्श पराष्ट
वान्॥ तस्य मदनस्य अंगं तदंगं॥ कथं हस्तेन॥ ऐरावतास्फालनकर्कशेन॥ [illegible] वारणाः [illegible] वारणाः॥ तेषां स्फाल
नेन कर्कशः कठिनः॥ तेन ऐरावतास्फालनकर्कशेन॥२२॥ समाधवेनाभिमतेन सख्या रत्या च साशंकमनुप्रयातः॥
अंगव्ययप्रार्थितकर्मसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम॥२३॥ स कामः हैमवतं स्थाण्वाश्रमं जगाम॥ हिमवतः अयं हैम
वतः तं हैमवतं॥ स्थाणोः ईश्वरस्य आश्रमः स्थाण्वाश्रमः तं स्थाण्वाश्रमं॥ कथंभूतः सः कामः॥ अभिमतेन अभीष्टेन माधवे
न अनुयातः अनुगतः॥ कथं यथा न भवति तथा॥ साशंकं यथा भवति॥ सह आशंकया वर्त्तते यत्र कर्मणि तत् साशंकं॥ अनु

नः कथंभूतः सकामः सख्या रत्या अनुयातः ॥ पुनः कथंभूतः कामः अंगद्वयप्रार्थितकर्मसिद्धिः अंगद्वयेन देहनाशेन प्रार्थि-
तकर्मसिद्धिर्येन सः अंगद्वयप्रार्थितकर्मसिद्धिः ॥२३॥ तस्मिन् वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती संक-
ल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृंभे ॥२४॥ मधुः वसंतः तस्मिन् वने आश्रमे पुष्पादिरूपेण आत्मानं आधा-
य जजृंभे ॥ स्वं आरोप्य उल्ललास ॥ कथंभूतो मधुः संयमिनां जितेंद्रियाणां मुनीनां तपःसमाधेः प्रतिकूलवर्ती विघ्नका-
री तपसः समाधिः तपःसमाधिः तस्य ॥ कथंभूतं आत्मानं संकल्पयोनेः कामस्य अभिमानभूतं ॥ अहंकारस्वरूपं ॥ संकल्प-
योनिर्यस्य सः संकल्पयोनिः तस्य संकल्पयोनेः ॥२४॥ कुबेरगुप्तां दिशमुष्णरश्मौ गंतुं प्रवृत्ते समयं विलंघ्य ॥ दिक् दक्षिण- ४२
गंधवहं मुखेन व्यलीकनिश्वासमिवोत्ससर्ज ॥२५॥ दक्षिणादिक् मुखेन वक्त्रेण गंधवहं वातं उत्ससर्ज मुमोच ॥ कथंभू-
तं गंधवहं उत्प्रेक्ष्यते व्यलीकनिश्वासमिव ॥ व्यलीकस्य निश्वासः व्यलीकनिश्वासः तं ॥ कृतापराधे भर्तरि सति स्त्रीणां यो
निःश्वासः व्यलीकमुच्यते ॥ व्यलीकं अप्रियेऽनृते ॥ उष्णरश्मौ सति उष्णरश्मौ सूर्ये समयं विलंघ्य कालं त्यक्त्वा कुबेर-

कुमा०२२

गुप्तां दिशं उत्तरां गंतुं प्रवृत्ते सति ॥ कुबेरेण गुप्ता रक्षिता ॥ तां कुबेरगुप्तां ॥ व्यलीकं प्रतिकूलतायां राधः ॥२५॥ असूत सद्यः कुसुमा-
न्यशोकः स्कंधात्प्रभृत्येव सपल्लवानि ॥ पादेन नापैक्षत सुंदरीणां संपर्कमासिंजितनूपुरेण ॥२६॥ अशोकः स्कंधात्प्रभृ-
ति सद्यः कुसुमानि असूत ॥ अजीजनत् ॥ कथंभूतानि कुसुमानि सपल्लवानि ॥ सह पल्लवैर्वर्तंते यानि तानि सपल्लवा-
नि ॥ अशोकः सुंदरीणां पादेन संपर्कं संयोगं नापैक्षत ॥ कथंभूतेन पादेन आसिंजितनूपुरेण ॥ आसिंजितः शब्दितः नू-
पुरो यस्य सः आसिंजितनूपुरः तेन आसिंजितनूपुरेण ॥२६॥ सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे
निवेशयामास मधुर्द्विरेफान् नामाक्षराणीव मनोभवस्य ॥२७॥ मधुर्वसंतः नवचूतबाणे द्विरेफान् निवेशयामास
द्विरेफान् उत्प्रेक्ष्यते मनोभवस्य कामस्य नामाक्षराणीव ॥ कथंभूते नवचूतबाणे सद्यः प्रवालोद्गमचारुपत्रे प्रवाला-
नां पल्लवानां उद्गमः प्रवालोद्गमः ॥ प्रवालोद्गम एव चारूणि पत्राणि यस्य स प्रवालोद्गमचारुपत्रः तस्मिन् प्रवालोद्ग-
मचारुपत्रे ॥ पुनः कथंभूते नवचूतबाणे समाप्तिं परिपूर्णतां नीते ॥ प्रापिते नवचूतः एव बाणः तस्मिन् न-

नः कथंभूतबाणे॥२७॥ वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गंधतया स्म चेतः॥ प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृ
जः कर्मप्रवृत्तिः॥२८॥ कर्णिकारं निर्गंधतया चेतः दुनोति स्म पीडयति स्म। निर्गंधस्य भावः निर्गंधता तया निर्गंधवीतया॥ क
स्मिन्सति वर्णप्रकर्षे सति। वर्णस्य प्रकर्षः अतिशयः। तस्मिन्सति वर्णप्रकर्षे। प्रायेन। बाहुल्येन। विश्वसृजः ब्रह्मणः प्रवृत्तिः गु
णानां सामग्र्यविधौ पराङ्मुखी। सामग्र्यस्य एकीकरणस्य विधिः। तस्मिन्तु सामग्र्यविधौ॥२८॥ बालेंदुवक्राण्यविकास
भावाद्बभुः पलाशान्यतिलोहितानि। सद्यो वसंतेन समागतानां नखक्षतानीव वनस्थलीनां॥२९॥ अतिलोहितानि ४३
आरक्तानि पलाशानि बभुः शुशुभिरे। कथंभूतानि पलाशानि। अविकाशभावात्। मुकुलभावात्। बालेंदुवत् वक्रा
णि। पलाशानि कस्मिन्निव वनस्थलीनां नखक्षतानीव। नखानां क्षतानि नखक्षतानि। कथंभूतानां वनस्थलीनां। स
द्यः तत्कालं वसंतेन समागतानां संमीलितानां॥२९॥ मृगाः प्रियालद्रुममंजरीणां रजःकणैर्विघ्नितदृष्टिपाताः॥
मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः॥३०॥ मृगाः हरिणाः वनस्थलीः विचेरुः परिबभ्रमुः क

कथं यथा स्यात्तथा॥ प्रत्यनिलं। कथंभूताः मृगाः प्रियालद्रुममंजरीणां रजःकणैः। कैः विघ्नितदृष्टिपाताः। विघ्निता दृष्टिपा
ता येषां ते विघ्नितदृष्टिपाताः। प्रियालद्रुमाणां मंजर्यः। तासां प्रियालद्रुममंजरीणां। अनिलं प्रति प्रत्यनिलं। कथंभूताः मृ
गाः मदोद्धताः। मदेन उद्धताः मदोद्धताः। कथंभूताः वनस्थलीः मर्मरपत्रमोक्षाः। मर्मरैर्वा हः पत्रमोक्षः पर्णपातो यासां
ताः मर्मरपत्रमोक्षाः॥३०॥ लग्नद्विरेफांजनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य॥ रागेण बालारुणकोमलेन चूत
प्रवालोष्ठमलंचकार॥३१॥ मधुश्रीः वसंतश्रीः मुखे तिलकं प्रकाश्य तिलकनामवृक्षं। प्रकाश्य रागेण लोहित्येन चू
तप्रवालोष्ठमलंचकार। अलंचक्रे भूषयत्॥ चूतस्य प्रवालः पल्लवः स एव ओष्ठः तं चूतप्रवालोष्ठं। कथंभूतेन रागेण बा
लारुणकोमलेन। बालो यः अरुणः तद्वत् कोमलः तेन बालारुणकोमलेन। कथंभूतं तिलकं। लग्नद्विरेफांजनभ
क्तिचित्रं। लग्ना ये द्विरेफाः भ्रमराः ते एव अंजनं भक्तिः॥ कज्जलरचनया चित्रं मनोज्ञं॥ तं लग्नद्विरेफांजनभक्तिचि
त्रं॥३१॥ चूतांकुरास्वादकषायकंठः पुंस्कोकिलो यन्मधुरं चुकूज॥ मनस्विनीमानविघातदक्षं तदेव जातं वचनं

नः कं स्मरस्य॥३२॥ पुंस्कोकिलः यन्मधुरं चुकूज॥ शा॰ इदं चकार॥ पुमांश्चासौ कोकिलश्च पुंस्कोकिलः॥ कथंभूतं तत्पुंस्कोकि
लकर्म॥ चूतांकुरास्वादकषायकंठः॥ चूतानां अंकुराः अंकुराः तेषां आस्वादस्तेन कषायः सुंदरः कंठो यस्य सः चूतांकुर
स्यये स्वादकषायकंठः॥ तु वस्तु कषायोस्त्री मधुरश्च मरः॥ तदेव स्मरस्य कामस्य वचनं जातं॥ तत्पुंसः कथंभूतं वचनं मन
य॰ स्विनीमानविघातदक्षं॥ मनस्विन्याः मानः मनस्विनीमानः तस्य विघातः स्तत्र दक्षं प्रवीणं मनस्विनीमानविघातदक्षं॥ अथ
हिमव्यपायाद्विशदाधराणामापांडुरीभूतमुखच्छवीनां॥ स्वेदोद्गमः किंपुरुषांगनानां चक्रे पदं पत्रविशेषकेषु॥३३॥ स्वेदो
द्गमः किंपुरुषांगनानां पत्रविशेषकेषु पदं चक्रे॥ स्थानं कृतवान्॥ पत्राणां पत्रावलीनां विशेषकाः मंडनानि॥ तेषु पत्रवि
शेषकेषु॥ कथंभूतानां किंपुरुषांगनानां॥ हिमव्यपायात् तुषारनाशात् विशदाधराणां॥ विशदाः अधरा यासां ताः तासां
विशदाधराणां॥ पुनः कथंभूतानां किंपुरुषांगनानां॥ आपांडुरीभूतमुखच्छवीनां॥ आपांडुरा भूता मुखच्छविर्यासां ताः
तासां आपांडुरीभूतमुखच्छवीनां॥ गौरमुखप्रभाणां॥ अथ॥ तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिं॥ ४४

प्रयत्नसंस्तंभितविक्रियाणां कथंचिदीशा मनसां बभूवुः॥३४॥ स्थाणुवनौकसस्तपस्विनः॥ तां आकालिकीं मधुप्रवृत्तिं वीक्ष्य
दृष्ट्वा कथंचित् महता कष्टेन मनसां ईशाः स्वामिनो बभूवुः॥ आसन्॥ कथंभूतानां मनसां ईशाः॥ प्रयत्नसंस्तंभितविक्रियाणां॥
प्रयत्नेन संस्तंभिता विक्रिया विकारो येषां तेतानि तेषां प्रयत्नसंस्तंभितविक्रियाणां॥ स्थाणोरीश्वरस्य वनं तत्र ओको ये
षां ते स्थाणुवनौकसः॥ अकाले भवा आकालिकी तां आकालिकीं॥३४॥ तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रप
न्ने॥ काष्ठागतस्नेहरसानुविद्धं द्वंद्वानि भावं क्रियया विवव्रुः॥३५॥ द्वंद्वानि मिथुनानि क्रियया कर्मणा भावं चित्ताभिप्राय
विवव्रुः॥ प्रकटीचक्रुः॥ स्त्रीपुंसौ मिथुनं द्वंद्वं इत्यमरः॥ कथंभूतं भावं काष्ठागतस्नेहरसानुविद्धं॥ क सति मदने कामे तं दे
शं स्थानं प्रपन्ने प्राप्ते सति॥ कथंभूते मदने आरोपितपुष्पचापे॥ आरोपितं पुष्पचापं येन स आरोपितपुष्पचापः॥ तस्मि
न् आरोपितपुष्पचापे॥ पुनः कथंभूते मदने रतिद्वितीये॥ रतिर्द्वितीया यस्य स रतिद्वितीयः॥ तस्मिन् रतिद्वितीये॥
रंजू वरणे॥ ह्रा॥ विवव्रुः॥ परोक्षा॥ उस्॥ चण् परोक्षा॥ द्विर्वचनोऽच् वर्णस्य आकारः॥ अभ्यासस्य अकारः॥ वारम्

र्णः॥ अयं जनः॥ विवृतः प्रसिद्धो॥३५॥ मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमानः॥ शृंगेण संस्पर्शनिमीलिताक्षीं
मृगीमकंडूयत कृष्णसारः॥३६॥ द्विरेफः भ्रमरः कुसुमैकपात्रे मधु पुष्परसं पपौ॥ कुसुममेव एकपात्रं तस्मिन् कुसुमैकपात्रे॥
कथंभूतः द्विरेफः स्वां प्रियां भ्रमरीमनुवर्त्तमानः॥ कृष्णसारः हरिणः मृगीं हरिणीं शृंगेण अकंडूयत॥ कथंभूतां हरिणीं॥ संस्प
र्शनिमीलिताक्षीं॥ संस्पर्शेन निमीलिते अक्षिणी यया सा संस्पर्शनिमीलिताक्षी॥ तां संस्पर्शनिमीलिताक्षीं॥३६॥ ददौ रस
पंकजरेणुगंधि गजाय गंडूषजलं करेणुः॥ अर्द्धोपभुक्तेन बिसेन जायां संभावयामास रथांगनामा॥३७॥ करेणुः हस्तिनी ग
जाय गंडूषजलं ददौ॥ गंडूषस्य जलं तत् गंडूषजलं॥ कथंभूतं गंडूषजलं॥ सरःपंकजरेणुगंधि॥ सरसिजानि पंकजानि
तेषां रेणवः तेषां गंधि यत्र तत्॥ सरःपंकजरेणुगंधि॥ रथांगनामा चक्रवाकः अर्द्धोपभुक्तेन बिसेन जायां पत्नीं संभा
वयामास॥ आवर्जयामास॥ अर्द्धं च तत् उपभुक्तं च अर्द्धोपभुक्तं तेन अर्द्धोपभुक्तेन॥३७॥ गीतांतरेषु श्रमवारिलेशैः किं
चित्समुच्छ्वसितपत्रलेखं॥ पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुंब॥३८॥ किंपुरुषः किंनरः प्रिय ४५

यामुखं॥ गीतांतरेषु॥ गीतमध्येषु॥ प्रियामुखं चुचुंब॥ पपौ॥ गीतस्य अंतराणि तेषु गीतांतरेषु॥ प्रियामुखं॥ तत् प्रियामुखं॥
कथंभूतं प्रियामुखं॥ श्रमवारिलेशैः किंचित्समुच्छ्वसितपत्रलेखं॥ श्रमवारीणां लेशाः कणाः तैः केचित्॥ स्तोकतरं समुच्छ्व
सितास्फारीकृता पत्रलेखा पत्रवल्ली यस्य तत्॥ किंचित्समुच्छ्वसितपत्रलेखं॥ पुनः कथंभूतं प्रियामुखं॥ पुष्पासवाघूर्णितनेत्र
शोभि॥ पुष्पवासितेन आसवेन आघूर्णितनयने ये ताभ्यां शोभा तेन शोभते इति पुष्पासवाघूर्णितनेत्रशोभि॥ अथवा पुष्पाणां आसवः
ति वा॥३८॥ पर्याप्तपुष्पस्तबकस्तनीभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः॥ लतावधूभ्यस्तरवोप्यवापुर्विनम्रशाखाभुजबंधना
नि॥३९॥ तरवोपि वृक्षाः अपि लतावधूभ्यः विनम्रशाखाभुजबंधनानि अवापुः प्रापुः॥ लता एव वध्वः ताभ्यः लतावधूभ्यः॥
विनम्राः नम्रीभूताः शाखाः ता एव भुजाः बाहवः॥ तेषां बंधनानि तानि विनम्रशाखाभुजबंधनानि॥ कथं लता
वधूभ्यः॥ पर्याप्ताः प्राप्ताः पुष्पस्तबकाः कुसुमगुच्छा एव स्तनाः यासां ताः॥ पर्याप्तपुष्प
स्तबकस्तन्यः ताभ्यः लतावधूभ्यः पर्याप्तपुष्पस्तबकस्तनीभ्यः॥ स्फुरत्प्रवालोष्ठमनोहराभ्यः॥ स्फु
कस्तनाः ताभ्यः पर्याप्तपुष्पस्तबकस्तनीभ्यः॥ पुनः कथंभूताभ्यः लतावधूभ्यः॥ स्फुरत्प्रवालोष्ठमनोहराभ्यः

हृत्तं हृद्यं संतोये प्रवालाः तत्पुरुषोष्ठैः मनोहराः ॥ मनोज्ञाः ॥ तान्यः स्फुरत्प्रवालोष्ठमनोहरान्यः ॥३९॥ श्रुत्वाप्सरोगीतिरपि
क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव ॥ आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवंति ॥४०॥ अस्मिन् प्रस्तावे हरः
प्रसंख्यानपरो ध्यानपरो बभूव ॥ प्रसंख्यानेन मंत्रगणेन परः प्रसंख्यानपरः कथंभूतो हरः अप्सरोगीतिरपि ॥ श्रुत्वा अ-
प्सरसां गीतिर्येन स श्रुताप्सरोगीतिः ॥ हीति स्फुटं विघ्नाः आत्मेश्वराणां जातु कदाचिदपि समाधिभेदप्रभवो न भवंति
समाधेर्भेदः तस्य प्रभवः स्वामिनः ॥ आत्मा न ईश्वराः तेषां आत्मेश्वराणां योगिनां ॥४०॥ लतागृहद्वारगतोऽथ नंदी वामप्रको-
ष्ठार्पितहेमवेत्रः ॥ मुखार्पितैकांगुलिसंज्ञयैव मा चापलायेति गणान् व्यनैषीत् ॥४१॥ अथ अनंतरं लतागृहद्वारगतो नं-
दी गणान् व्यनैषीत् शिक्षितवान् ॥ णीञ् प्रापणे ॥ णो नः ॥ नी ॥ वि पूर्वः ॥ अद्यतनी ति ॥ अड् चादि सिजव्यां प्र ॥ स्तिचः
इट् ॥ सिचि परस्मै स्वरांतानां वृद्धिः ॥ वैनिमित्तात् वा व्यनैषीत् सिद्धं ॥ इति किं तेन गणाः ॥ यूयं चापलाय मा स्वत ॥ कया
मुखार्पितैकांगुलिसंज्ञया ॥ मुखे अर्पिता दत्ता या एकांगुलिः ॥ तस्याः संज्ञा तया ॥ मुखार्पितैकांगुलिसंज्ञा तया ॥ चपलस्य भा-

४६

वः ॥ चापलं तस्मै चापलाय ॥ लताप्रवरगृहं ॥ तस्य द्वारं तत्र गतः प्राप्तः ॥ लतागृहद्वारगतः ॥ प्राप्तः ॥ लतागृहद्वारगतः ॥ पुनः कथं-
भूतः ॥ नंदी वामप्रकोष्ठार्पितहेमवेत्रः ॥ प्रकोष्ठे विस्तृतकरे हस्तस्य मुष्ट्या तु बद्धया ॥ इत्यमरः ॥ स रत्निः स्यादरत्निस्तु निष्कनिष्ठे-
न मुष्टिना ॥४१॥ निष्कंपवृक्षं निभृतद्विरेफं मूकांडजं शांतमृगप्रचारं ॥ तच्छासनात् काननमेव सर्वं चित्रार्पितारंभमिवावतस्थे
॥४२॥ सर्वमेव काननं तच्छासनात् चित्रार्पितारंभमिव अवतस्थे ॥ अतिष्ठत् ॥ तस्य नंदिनः ॥ तस्य शासनं तस्मात् तच्छासनात् ॥ चि-
त्रे अर्पितः आरंभो यस्य तत् चित्रार्पितारंभं ॥ आलेख्य आरोपितसंस्थानमिव ॥ कथंभूतं काननं ॥ निष्कंपवृक्षं ॥ निष्कंपा वृ-
क्षा यत्र तत् निष्कंपवृक्षं ॥ कंपरहितमित्यर्थः ॥ पुनः कथंभूतं काननं ॥ निभृतद्विरेफं ॥ निभृता द्विरेफाः भ्रमरा यत्र तत् निभृ-
तद्विरेफं ॥ कथंभूतं काननं शांतमृगप्रचारं ॥ शांतः निवृत्तः मृगप्रचारो गमनं यत्र तत् ॥ निष्कंपवृक्षं ॥ कंपरहितमित्य-
र्थः ॥ मूकांडजं ॥ पुनः कथंभूतं काननं ॥ शांतमृगप्रचारं ॥ शांतः निवृत्तः मृगप्रचारो यत्र तत् शांतमृगप्रचारं ॥४२॥ दृष्टिप्र-
पातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे ॥ प्रांतेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥४३॥

कामः॥ इत्य एते ईश्वरस्य ध्यानास्पदं॥ ध्यानं स्थाने विवेश॥ किं कृत्वा॥ तस्य ईश्वरस्य दृष्टिप्रपातं परिहृत्य॥ त्यक्त्वा॥ दृष्टे
पातः तं दृष्टिप्रपातं॥ कमिव॥ प्रयाणेगमने पुरस्थरन्ध्रमिव॥ कथंभूतं ध्यानास्पदं॥ प्रतिष्ठाइवाताने संसक्तं न
मेरुशाखं॥ संसक्ता लग्ना नमेरुशाखा यत्र तत् संसक्तनमेरुशाखं॥ ४३॥ स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधान
वत्यां॥ आसीनमासन्नशरीरपातं त्रिलोचनं संयमिनं ददर्श॥ ४४॥ सकामः संयमिनं त्रिलोचनं॥ कथंभूतं देवदारुद्रुमवेदि
कायां आसीनं उपविष्टं॥ देवदारुद्रुमस्य वेदिका तस्यां देवदारुद्रुमवेदिकायां॥ किं विशिष्टायां॥ देवदारुद्रुवेदिका॥ आ
सीनं॥ शार्दूलचर्मव्यवधानवत्यां॥ शार्दूलचर्मणः व्यवधानं आच्छादनं विद्यते यस्याः सा शार्दूलचर्मव्यवधानवत्यां॥ कथंभू ४१
तः॥ कामः आसन्नशरीरपातं॥ आसन्नः शरीरस्य नाशो शरीरविनाशो यस्य सः आसन्नशरीरपातः॥ ४४॥ पर्यंकबंधस्थिरपूर्व
कायमृज्वायतं सन्नमितोभयांसं॥ उत्तानपाणिद्वयसंनिवेशात्प्रफुल्लराजीवमिवांकमध्ये॥ ४५॥ सकामस्त्रिलोचनं द
दर्श॥ कथंभूतं त्रिलोचनं॥ पर्यंकबंधस्थिरपूर्वकायं॥ पर्यंकबंधेन आसनविशेषेण स्थिरः पूर्वकायो यस्य स तं पर्यंकबं

धस्थिरपूर्वकायं॥ तं पर्यंकबंधस्थिरपूर्वकायं॥ पुनः कथंभूतं त्रिलोचनं॥ ऋज्वायतासंनमितोभयांसं॥ ऋजू प्रांजलौ
आयतौ विस्तीर्णौ संनमितौ नम्रीकृतौ उभयेअंसौ स्कंधौ यस्य स तं ऋज्वायतासंनमितोभयांसः तं॥ पुनः कथंभूतं त्रि
लोचनं॥ उत्प्रेक्षते॥ उत्तानपाणिद्वयसन्निवेशात् अंकमध्ये उत्संगमध्ये प्रफुल्लराजीवमिव॥ विकसितकमलमिव॥ उत्ता
नंयत् पाणिद्वयं तस्य निवेशनं तस्मात् उत्तानपाणिद्वयसंनिवेशात्॥ प्रफुल्लं राजीवं यस्य सः प्रफुल्लराजीवं॥ ४५॥ भु
जंगमाबद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रं॥ कंठप्रभासंगविशेषनीलां कृष्णत्वचं ग्रंथिमतीं दधानं॥ ४६॥ सका
मस्त्रिलोचनं ददर्श॥ कथंभूतं त्रिलोचनं॥ भुजंगमाबद्धजटाकलापं॥ भुजंगमेन सर्पेण आबद्धः जटाकलापो जटासमू
हो येन॥ स तं भुजंगमाबद्धजटाकलापं॥ पुनः कथंभूतं त्रिलोचनं॥ कर्णावसक्तद्विगुणाक्षसूत्रं॥ कर्णे अवसक्तं निहितं
द्विगुणं अक्षसूत्रं जपमालिका येन स तं कर्णावसक्तद्विगुणाक्षसूत्रं॥ पुनः किं कुर्वाणं त्रिलोचनं॥ स्पर्शवतीं मृगत्वचं
दधानं॥ धारयंतं॥ मृगस्य कृष्णसारस्य त्वचं मृगत्वचं॥ स्पर्शो विद्यते यस्याः सा स्पर्शवती॥ तां॥ पुनः कथंभूतां॥ मृगत्वचं॥ कंठप्र

सामंगविशेषनीलौ॥कंठस्यप्रभासा॥तस्याःसंगःतेनविशेषनीलौ॥कंठप्रभासंगविशेषनीलौ॥४६॥किंचित्प्रकाशस्तिमितो
ग्रतारैः॥भ्रूविक्रियायांविगतप्रसंगैः॥नेत्रैरविस्पंदितपक्ष्ममालैर्लक्षीकृतघ्राणमधोमयूखैः॥४७॥सकामः॥त्रिलोच
नंददर्श॥कथंभूतंत्रिलोचनं॥नेत्रैःलक्षीकृतघ्राणं॥लक्षीकृतंघ्राणंनासायेनसलक्षीकृतघ्राणस्तं॥कथंभूतैस्त्रिलोच
नेत्रैः॥किंचित्प्रकाशस्तिमितोग्रतारैः॥ईषद्विमेषितेननिस्पंदावेडाकनीनिकायेषांतानितैः॥पुनःकथंभूतैः॥नेत्रैः भ्रू
विक्रियायांभ्रूविकारेविगतप्रसंगैः॥विगतःप्रसंगोयेषांतानितैः॥विगतप्रसंगैः॥निवृत्तसंसर्गैः॥पुनःकथंभूतैः॥नेत्रैः॥अ
विस्पंदितपक्ष्ममालैः॥नविस्पंदिताचलितापक्ष्ममालारोमपंक्तिर्येषांतानितैः॥अविस्पंदितपक्ष्ममालैः॥मीलनोन्मील
नरहितपक्ष्मपंक्तिभिः॥पुनःकथंभूतैः॥नेत्रैः॥अधोमयूखैः॥अधःअधोमयूखानामयूखारश्मयोयेषांतेषांतानितैः॥अधो ४८
मयूखैः॥४७॥अवृष्टिसंरंभमिवांबुवाहमपामिवाधारमनुत्तरंगं॥अंतश्चराणांमरुतांनिरोधान्निवातनिष्कंपमिवप्रदी
पं॥४८॥सकामःत्रिलोचनंददर्श॥कथंभूतंत्रिलोचनं॥उत्प्रेक्ष्यते॥अवृष्टिसंरंभंअंबुवाहमिव॥नविद्यतेवृष्टिसंरंभोय

स्य॥सअवृष्टिसंरंभः॥तं॥अवृष्टिसंरंभं॥कस्मात्॥अंतश्चराणांमरुतांवायूनांनिरोधात्॥अंतर्मध्येचरंतीतिअंतश्चरा
स्तेषां॥अंतश्चराणां॥पुनरुत्प्रेक्ष्यते॥अनुत्तरंगंतरंगरहितं॥अपांआधारमिव॥समुद्रमिव॥नउत्कटास्तरंगाःयस्यसः॥अ
नुत्तरंगस्तं॥अनुत्तरंगं॥कस्मात्॥अंतश्चराणांमरुतांनिरोधात्॥पुनरुत्प्रेक्ष्यते॥निवातनिष्कंपंप्रदीपमिव॥निवातेननिष्कं
पःनिवातनिष्कंपःतंनिवातनिष्कंपं॥कस्मात्॥अंतश्चराणांमरुतांनिरोधात्॥४८॥कपालनेत्रांतरलब्धमार्गैर्ज्योतिः
प्ररोहैरुदितैःशिरस्तः॥मृणालसूत्राधिकसौकुमार्यांबालस्यलक्ष्मींग्लपयंतमिंदोः॥४९॥सकामःत्रिलोचनंदद
र्श॥किंकुर्वंतं॥त्रिलोचनं॥बालस्यकलामात्रस्य॥इंदोश्चंद्रमसःलक्ष्मींशोभांग्लपयंतं॥ग्लापयंतं॥क्षेपयंतं॥कैः॥ज्यो
तिःप्ररोहैः॥ज्योतिषांतेजसांप्ररोहाःअंकुराःतैःज्योतिःप्ररोहैः॥कथंभूतैः॥शिरस्तःउत्तमांगात्॥उदितैः॥निःसृतैः॥पुनः
कथंभूतैर्ज्योतिःप्ररोहैः॥कपालनेत्रांतरलब्धमार्गैः॥कपालानांब्रह्मशिरसांनेत्राणितेषांअंतराणिमध्यानितेषु॥
लब्धमार्गायैस्तेज्योतिःप्ररोहाः॥तैर्ज्योतिःप्ररोहैः॥कथंभूतांलक्ष्मीं॥मृणालसूत्राधिकसौकुमार्यां॥मृणालानां

णाणि तेभ्यो ऽधिकं सौकुमार्यं यस्याः सा मृणालसूत्राधिकसौकुमार्या। तां मृणालसूत्राधिकसौकुमार्यां विशतं तं च यो ऽ
...कोमलामित्यर्थः॥४९॥ मनो नवद्वारनिषिद्धवृत्ति हृदि प्रवस्थाप्य समाधिवश्यं। यमक्षरं वेदविदो विदुस्तमात्मानमा
...न्यवलोकयंतं॥५०॥ कुलकं॥ ॥सकामः त्रिलोचनं ददर्श। किं कुर्वंतं त्रिलोचनं। आत्मानं आत्मनि अवलोकयंतं। वेदविदः
यं आत्मानं अक्षरं विदुः जानंति॥ अक्षरं अविनश्वरं। ब्रह्मस्वरूपं। किं कृत्वा। मनः हृदि प्रवस्थाप्य। आरोप्य। कथंभूतं मनः नव
द्वारनिषिद्धवृत्ति। नवद्वारेभ्यो निषिद्धा वृत्तिर्यस्य। तत्र नवद्वारनिषिद्धवृत्ति। पुनः कथंभूतं मनः। समाधिवश्यं। समाधिना वश्यं ५९
तत् समाधिवश्यं॥५०॥ कुलकं॥ ॥स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यं। नालक्षयत्साध्वससन्नहस्तः स्र
स्तं शरं चापमपि स्वहस्तात्॥५१॥ स्मरः कामः तथाभूतं ध्यानस्थं महादेवं अयुग्मनेत्रं त्रिनेत्रं अदूरात्समीपात् पश्यन् दूर
...स्वहस्तात्॥ स्रस्तं शरं। पतितं वाणं। शिथिलमित्यर्थः। चापमपि न अलक्षयत् नाज्ञासीत्। कथंभूतः सकामः स्मरः सा
ध्वससन्नहस्तः। साध्वसेन भयेन सन्नौ कंपमानौ हस्तौ यस्य स साध्वससन्नहस्तः। कथंभूतं तं अयुग्मनेत्रं। मनसापि अधृष्यं।

अपरासवनीयं॥ अयुग्मानि नेत्राणि यस्य स तं अयुग्मनेत्रं। त्रिनेत्रं॥५१॥ निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयंतीव वपुर्गु
णेन। अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या॥५२॥ अथ अनंतरं स्थावरराजकन्या अदृश्यत। कथंभूता स्था
वरराजकन्या। वनदेवताभ्यां विजयाविजयाभ्यां अनुप्रयाता। अनुगता। पुनः कथंभूता स्थावरराजकन्या। वपुर्गुणेन अस्य
कामस्य निर्वाणभूयिष्ठं वीर्यं संधुक्षयंतीव। उद्दीपयंतीव॥ अतिशयेन बहुलं भूयिष्ठं। निर्वाणं च तत् भूयिष्ठं च निर्वाणभूयि
ष्ठं शांतमतिशयेन इत्यर्थः॥५२॥ अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारं। मुक्ताकलापीकृतसिंदुवारं
वसंतपुष्पाभरणं वहंती॥५३॥ अथ अनंतरं स्थावरराजकन्या अदृश्यत। किं कुर्वंती। वसंतपुष्पाभरणं वहंती। वसंतपु
ष्पाणि तेषामाभरणं तत्। वसंतपुष्पाभरणं। किं विशिष्टं वसंतपुष्पाभरणं। अशोकनिर्भर्त्सितपद्मरागं। अशोकेन अ
...कुसुमेन निर्भर्त्सितः निराकृतः पद्मरागो मणिविशेषो यत्र तत् अशोकनिर्भर्त्सितपद्मरागं। पुनः किं विशिष्टं वसं
...पुष्पाभरणं। आकृष्टहेमद्युतिकर्णिकारं। आकृष्टा हेमद्युतिर्येन तत् आकृष्टहेमद्युतिकर्णिकारं। पुनः किं विशिष्टं।

[illegible]संनपुष्पा[illegible]रतां॥ मुक्ताकलापीकृतसिंदुवारं॥ अमुक्ताकलापं मुक्ताकलापं क्रियते मुक्ताकलापीकृतं मुक्ताकला
[illegible]कृतं सिंदुवारं निर्गुंडीपुष्पं यत्र तत्॥ मुक्ताकलापीकृतसिंदुवारं॥ इति मुक्ता०॥ ४३॥ आवर्जिता किंचिदिव स्तनाभ्यां
वासो वसाना तरुणार्करागं॥ सुजातपुष्पस्तबकावनम्रा संचारिणी पल्लविनी लतेव॥ ४४॥ अथ अनंतरं स्थावरराजक
न्या अदृश्यत॥ कथंभूता स्थावरराजकन्या॥ उत्प्रेक्ष्यते स्तनाभ्यां किंचित् कियन्मात्रं आवर्जिता इव॥ नम्रीकृता इव॥ पुन॰
किं कुर्वाणा॥ तरुणार्करागं वासः वसाना॥ दधाना॥ तरुणोयः अर्कः तद्वत् रागो यस्य तत् तरुणार्करागं कौसुंभवर्णं पु ५०
नः पुनः कथंभूता सुजातपुष्पस्तबकावनम्रा॥ सुजाता ये पुष्पस्तबकाः तैरवनम्रा॥ नम्रीभूता सुजातपुष्पस्तबका
वनम्रा॥ ४४॥ स्रस्तां नितंबादवलंबमानां पुनः पुनः केसरपुष्पकांचीं॥ न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौ
र्वीमिव कार्मुकस्य॥ ४५॥ अथ अनंतरं स्थावरराजकन्या अदृश्यत॥ कथंभूता स्थावरराजकन्या॥ नितंबात् कटिप्रदे
शात् स्रस्तां पतितां केसरपुष्पकांचीं मेखलां पुनः पुनः वारंवारं अवलंबमाना धारयंती॥ केसरपुष्पकांचीं तां केसरपु

ष्पकांचीं तां केसरपुष्पकांचीं॥ कथंभूतां केसरपुष्पकांचीं॥ उत्प्रेक्ष्यते॥ कार्मुकस्य धनुषः द्वितीयमौर्वीमिव॥ कथंभूतां द्वि
तीयमौर्वीं॥ स्थानविदा स्मरेण न्यासीकृतां॥ अन्यासः न्यासः क्रियते न्यासीकृता तां न्यासीकृतां॥ स्थानं वेत्ति तिस्थानवित् तेन
स्थानविदा स्मरेण॥ द्वितीया चासौ मौर्वी च तां द्वितीयमौर्वीं॥ ४५॥ सुगंधिनिश्वासविवृद्धतृष्णं बिंबाधरासन्नचरं द्विरेफं॥ प्रति
क्षणं संभ्रमलोलदृष्टि लीलारविंदेन निवारयंती॥ ४६॥ कुलकं॥ ॥ अथ अनंतरं स्थावरराजकन्या अदृश्यत॥ किं कुर्व
ती॥ लीलारविंदेन द्विरेफं भ्रमरं निवारयंती॥ कथं यथा भवति तथा॥ प्रतिक्षणं यथा भवति॥ क्षणं क्षणं प्रति प्रतिक्षणं॥ ली
लायाः क्रीडायाः अरविंदं तेन लीलारविंदेन॥ पुनः कथंभूता सा संभ्रमलोलदृष्टिः॥ संभ्रमेण लोला दृष्टिर्यस्याः सा सं
भ्रमलोलदृष्टिः॥ कथंभूतं द्विरेफं॥ सुगंधिनिश्वासविवृद्धतृष्णं॥ सुगंधीयो निश्वासः तेन विवृद्धा तृष्णा यस्य स सुगंधिनिश्वा
सविवृद्धतृष्णस्तं॥ सुगंधिनिश्वासविवृद्धतृष्णं॥ कथंभूतं द्विरेफं॥ बिंबाधरासन्नचरं॥ बिंबाधरस्य आसन्नं चरतीति बिंबाधरास
न्नचरस्तं॥ बिंबाधरासन्नचरं॥ कुलकं॥ ४६॥ तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानां॥ जितेंद्रियः शूलिनि पु

ष्पकेतुः स्वकर्मसिद्धिं पुनराशशंस ॥ ५७ ॥ पुष्पकेतुः कामः जितेन्द्रिये शूलिनि ईश्वरे पुनः स्वकर्मसिद्धिं निजकार्यनिष्पत्तिं आ
शशंस ॥ संभावयामास ॥ किं कृत्वा सर्वावयवानवद्यां तां पार्वतीं वीक्ष्य अवलोक्य ॥ सर्वैः अवयवैः अनवद्या ॥ सर्वावयवानवद्या ॥
रूपवती ॥ तां सर्वावयवानवद्यां ॥ पुनः किं कुर्वाणः तां सर्वावयवानवद्यां पार्वतीं रतेरपि कामस्त्रियाः अपि पदं लज्जास्थानं आ
दधानां ॥ धारयन्तीं ॥ रतिः पार्वतीं वीक्ष्य लज्जां करोति ॥ सज्जाकाशात् उद्यद्रूपवतीति ॥ ५७ ॥ स विष्णुतः प्रकाशमावृत्तगोरा
सासमाद प्रतिहारभूमिं ॥ योगात्स वांतःपरमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपाररामा ॥ ५८ ॥ स पुनः उमापार्वतीशंभोः ईश्वर
स्य प्रतिहारभूमिं द्वारप्रदेशं समाससाद ॥ प्राप कथं स्तुतस्य शंभोः न विष्णुतः प्रकाशनवदुनः सः ईश्वरः योगात् ॥ परमात्म ५२
संज्ञं परमात्मानमपरं ज्योतिः दृष्ट्वा उपाररामा ॥ व्यवर्त्तत ॥ ५९ ॥ ततो भुजंगाधिपतेः फणाग्रैः अधः कथंचिद् धृत
भूमिभागां ॥ शनैः कृतप्राणविमुक्तिरीशः पर्यंकबंधं निबिडं बिभेद ॥ ६० ॥ ततोऽनंतरं ईश्वरः निबिडं दृढं पर्यंकबंधं
कष्टं बिभेद मुमोच ॥ कथंभूतः ईशः शनैर्यथा स्यात् तथा कृतप्राणविमुक्तिः कृता प्राणानां वायूनां

विमुक्तिर्येन सः कृतप्राणविमुक्तिः ॥ कथंभूतं यथा भवति भुजंगाधिपतेः फणाग्रैः अधः पाताले ॥ कथंचित् धृते भूमिभागे यथा
भवति ॥ फणानां अग्राणि तैः फणाग्रैः ॥ धृतः भूमिभागो यत्र कर्मणि तत् ॥ धृतभूमिभागं ॥ ६१ ॥ तस्मै शशंस प्रणिपत्य नंदी
शुश्रूषया शैलसुतामुपेतां ॥ प्रवेशयामास च भर्त्तुरेनां भ्रूक्षेपमात्रानुमितप्रवेशां ॥ ६२ ॥ नंदी तस्मै ईश्वराय प्रणिपत्य शुश्रू
षयाउपेतां ॥ प्राप्तां शैलसुतां पार्वतीं शशंस ॥ कथयामास ॥ च पुनः एनां पार्वतीं प्रवेशयामास ॥ कथंभूतां एनां पार्वतीं भर्तुः
ईश्वरस्य भ्रूक्षेपमात्रानुमितप्रवेशां ॥ भ्रूक्षेपमात्रेण अनुमितः अनुमानीकृतः प्रवेशो यस्याः सा भ्रूक्षेपमात्रानु
मितप्रवेशा तां भ्रूक्षेपमात्रानुमितप्रवेशां ॥ ६२ ॥ तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य ॥ विकी
र्णस्त्र्यंबकपादमूले पुष्पोच्चयः पल्लवभंगभिन्नः ॥ ६३ ॥ तस्याः पार्वत्याः सखीभ्यां कर्तृ जयाविजयाभ्यां शिशिरात्य
यवसंतपुष्पोच्चयः कर्म त्र्यंबकपादमूले विकीर्यत ॥ अमुच्यत ॥ कथं यथा भवति प्रणिपातपूर्वं यथा भवति प्र
णिपातः पूर्वो यत्र कर्मणि तत् ॥ प्रणिपातपूर्वं ॥ त्रीणि अंबकानि लोचनानि यस्य सः त्र्यंबकः ॥ तस्य पादमूलं त

श्चर्वैरिन्यूः॥त्र्यंबकपादमूले॥पुष्पाणांउच्चयः ससृद्धः। शिशिरस्य हिमस्य अत्यये विनाशः तस्य शिशिरात्ययस्य॥ कथंभू
तः पुष्पोच्चयः स्वहस्तलूनः स्वहस्तेन लूनः स्वहस्तलूनः पुनः कथंभूतः पुष्पोच्चयः पल्लवभंगभिन्नः॥ पल्लवानां भं
गस्तेन भिन्नः। किसलयखंड मिश्रः॥६३॥ उमापि नीलालकमध्यशोभि विश्रंसयंती नवकर्णिकारं॥ चकार कर्णच्यु
तपल्लवेन सद्यः प्रणामं वृषभध्वजाय॥६३॥ उमापि वृषभध्वजाय सद्यः प्रणामं चकार॥ कथंभूतेन सद्यः। कर्णच्युतपल्ल
वेन॥ कर्णात् च्युतः पल्लवो यस्य कर्णच्युतपल्लवः तेन कर्णच्युतपल्लवेन॥ किं कुर्वती। उमापि नवकर्णिकारं विश्रंस
यंती॥ पातयंती। कथंभूतं नवकर्णिकारं नीलालकमध्यशोभि॥ नीलाः कृष्णाये अलकाः केशाः तेषां मध्ये शोभतइति ५२
नीलालकमध्यशोभि॥६४॥ अनन्यभाजं पतिमाप्नुहीति सातथ्यमेवाभिहिता भवेन॥ नहीश्वरव्याहृतयः कदा
चित्पुष्यंति लोके विपरीतमर्थं॥६५॥ भवेन ईश्वरेण सा पार्वती इति तथ्यमेव अभिहिता उक्ता इति किं हे पार्वति
अनन्यभाजं पतिं आप्नुहि। न अन्यं भजते अनन्यभाक् तं अनन्यभाजं॥ हि यस्मात् कारणात् ईश्वरस्य व्याहृतयः

ईश्वरवचनानि कदाचित् लोके संसारे विपरीतं अर्थं अन्यथार्थं न पुष्यंति॥६६॥ कामस्तु बाणावसरं प्रतीक्ष्य पतंगवद्वह्
निमुखं विविक्षुः॥ उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श॥६७॥ कामः तु पुनः बाणावसरं प्रतीक्ष्य विलोक्य।
मुहुर्वारं २ शरासनज्यां आममर्श। ममार्ज॥ मृशु आमर्शने॥ कथंभूतः कामः। पतंगवत् वह्निमुखं विविक्षुः॥ वेष्टुमिच्छुः
विविक्षुः॥ विश प्रवेशने॥ विश॥ पुनः कथंभूतः कामः। उमासमक्षं यथा भवति तथा हरबद्धलक्ष्यः॥ उमायाः समक्षं प्रत्यक्षं।
सन्मुखं यत्र कर्मणि तत्॥ उमासमक्षं॥ हरे ईश्वरे बद्धं लक्ष्यं येन स हरबद्धलक्ष्यः॥६७॥ अथोपनिन्ये गिरिशाय गौरी तप
स्विने ताम्ररुचा करेण॥ विशोषितां भानुमतो मयूखैर्मंदाकिनीपुष्करबीजमालां॥६८॥ अथ अनंतरं। गौरी पार्वती
ताम्ररुचा करेण॥ मंदाकिनीपुष्करबीजमालां गंगायाः पद्माक्षमालां॥ गिरिशाय उपनिन्ये अर्पयामास॥ कथंभूता
य तपस्विने। तपो विद्यते यस्यासौ तपस्वी। तस्मै॥ तपस्विने॥ कथंभूतां मंदाकिनीपुष्करबीजमालां। भानुमतः सूर्य
स्य मयूखैः किरणैः विशोषितां॥ पुष्कराणां कमलानां बीजानि तेषां माला तां पुष्करबीजमालां॥६९॥ प्रतिग्रहीतुं प्र

...गाय प्रियवाञ्छिलोचनस्यासुपचक्रमे च॥ संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणं॥६६॥ स पुनः त्रिलोच
...नतां पुष्करबीजमालां प्रतिग्रहीतुं उपचक्रमे। प्रारेभे। कस्मात्। प्रणयिप्रियत्वात्। प्रणयिषु याचकेषु प्रियत्वं वात्सल्य
...गाय प्रियत्वं तस्मात्। प्रणयप्रियत्वात्। पुष्पधन्वा कामश्च पुनः संमोहनं नाम अमोघं सफलं बाणं धनुषि समध
त्त संदधे॥ प्रथमं उन्मादनं मदनं संमोहनं संतापनं संशोषणं ... पंच बाणाः कामस्य॥६६॥ हरस्तु किंचित्परि
वृत्तधैर्यः चंद्रोदयारंभ इवांबुराशिः॥ उमामुखे बिंबफलाधरोष्ठे व्यापारयामास विलोचनानि॥६७॥ तु पुनः हरः
उमामुखे विलोचनानि व्यापारयामास॥ कथंभूते उमामुखे॥ बिंबफलाधरोष्ठे॥ बिंबफलवत् अधरोष्ठो यस्य तत् तस्मिन् बि
बफलाधरोष्ठे तस्मिन्॥ बिंबफलाधरोष्ठे॥ कथंभूतो हरः किंचित्परिवृत्तधैर्यः॥ किंचित् मनाक् परिवृत्तं धैर्यं यस्य सः
किंचित्परिवृत्तधैर्यः॥ कस्मिन् क इव। चंद्रोदयारंभे अंबुराशिरिव॥ यथा चंद्रोदयारंभे अंबुराशिः समुद्रः कि
ंचित्परिवृत्तधैर्यो भवति। तथा चंद्रोदयस्य आरंभः। तस्मिन् ... ॥६७॥ विवृण्वती शैलसुतापि भावं

...रैः स्फुरद्बालकदंबकल्पैः॥ साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन॥६८॥ शैलसुतापि साचीकृता
...वेन तस्थौ। किंकुर्वती। अंगैः शरीरावयवैः भावं चित्ताभिप्रायं विवृण्वती॥ प्रकटयंती॥ कथंभूतैः अंगैः स्फुरद्बा
लकदंबकल्पैः॥ स्फुटंति विकसंति यानि बालकदंबानि। बालकदंबकुसुमानि तैः कल्पानि समानानि तैः स्फुरद्बा
लकदंबकल्पैः॥ कथंभूतेन मुखेन चारुतरेण मनोहरेण॥ पुनः कथंभूतेन मुखेन। पर्यस्तविलोचनेन। पर्यस्ते अध
पतिते विलोचने यस्य तत् पर्यस्तविलोचनं॥ तेन पर्यस्तविलोचनेन॥६८॥ अथेंद्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद्बलवन्निगृह्य॥ हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपांतेषु ससर्ज दृष्टिं॥६९॥ अथ अनंतरं अयु
ग्मनेत्रः ईश्वरः बलवत् यथा स्यात्तथा वशित्वात्। जितेंद्रियत्वात्। इंद्रियक्षोभं पुनः निगृह्य दिशां उपांतेषु प्रांतेषु
दृष्टिं ससर्ज। कः अयुग्मनेत्रः। स्वचेतोविकृतेः स्वचेतोविकारस्य हेतुं कारणं दिदृक्षुः द्रष्टुमिच्छुः दिदृक्षुः
न युग्मे नेत्रे यस्य सः अयुग्मनेत्रः। त्रिनेत्रः। बलं विद्यते यस्य कर्मणि तु बलवत्॥ स्वचेतसो विकृतिः तस्याः स्वचे

ऽविकृते॥६९॥ स दक्षिणापांगनिविष्टमुष्टिं नतांसमाकुंचितसव्यपादं॥ ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमा
त्मयोनिं॥७०॥ स ईश्वरः प्रहर्तुमभ्युद्यतं आत्मयोनिं कामं ददर्श॥ कथंभूतं आत्मयोनिं॥ दक्षिणापांगनिविष्टमुष्टिं॥
दक्षिणेऽपांगे निविष्टा लग्ना मुष्टिर्यस्य स दक्षिणापांगनिविष्टमुष्टिस्तं दक्षिणापांगनिविष्टमुष्टिं॥ पुनः कथंभूतं
आत्मयोनिं नतांसं॥ नतौ अंसौ यस्य स नतांसस्तं नतांसं॥ पुनः कथंभूतं आत्मयोनिं॥ आकुंचितसव्यपादं॥ आकुं
चितः सव्यपादो येन स आकुंचितसव्यपादस्तं आकुंचितसव्यपादं॥ पुनः किंविशिष्टं आत्मयोनिं॥ चक्रीकृतचारु ५४
चापं॥ चक्रीकृतं चारुचापं येन स चक्रीकृतचारुचापस्तं चक्रीकृतचारुचापं॥ प्रहरणाय प्रहर्तुं॥ आत्मनः योनि
रुत्पत्तिर्यस्य स आत्मयोनिस्तं आत्मयोनिं॥७०॥ तपःपरामर्शविवृद्धमन्योर्भ्रूभंगदुःप्रेक्ष्यमुखस्य तस्य॥ स्फुरन्नुद
र्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात॥७१॥ तस्य ईश्वरस्य तृतीयात् अक्ष्णः किल इति श्रूयते कृशानु
रग्निः स्फुरन् सन् सहसा वेगेन॥ निःपपात॥ कथंभूतस्य तस्य ईश्वरस्य॥ तपःपरामर्शविवृद्धमन्योः॥ तपसः

परामर्शेन स्पर्शेन विवृद्धो मन्युर्यस्य सः तपःपरामर्शविवृद्धमन्युः तस्य मन्योः॥ पुनः किंविशिष्टस्य तस्य ई॰ भ्रूभंगदुः
प्रेक्ष्यमुखस्य॥ भ्रूभंगेन दुःप्रेक्ष्यं मुखं यस्य स भ्रूभंगदुःप्रेक्ष्यमुखः तस्य भ्रूभंगदुःप्रेक्ष्यमुखस्य॥ पुनः कथंभूतस्य॥
स्फुरन् उदर्चिः॥ उत्कटा निःसृता अर्चिर्यस्य स उदर्चिः॥७१॥ क्रोधं प्रभो संहर संहरेति। यावद्गिरः खे मरुतां चरंति।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥७२॥ मरुतां देवानां गिरः खे आकाशे यावच्चरंति॥ इतीति किं हे प्र
भो त्वं क्रोधं संहर संहरेति॥ तावत् स भवनेत्रजन्मा वह्निः मदनं भस्मावशेषं चकार॥ भस्म एव अवशेषो यस्य सः भस्माव
शेषस्तं भस्मावशेषं॥ भवनेत्राज्जन्म यस्य स भवनेत्रजन्मा॥७२॥ तीव्राभिषंगप्रभवेन वृत्तिं मोहेन संस्तंभयतेंद्रिया
णां॥ अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव॥७३॥ रतिर्मुहूर्तं यावत् कृतोपकारेव बभूव॥ कृतः उप
कारो यस्याः सा॥ कृतोपकारा॥ कथंभूता रतिः॥ मोहेन अज्ञातभर्तृव्यसना॥ न ज्ञातं भर्तृव्यसनं यया सा अज्ञातभ
र्तृव्यसना॥ कथंभूतेन मोहेन॥ इंद्रियाणां वृत्तिं व्यापारं संस्तंभयिता॥ संस्तंभयतीति संस्तंभयिता तेन संस्तंभयता॥ प्र

नः कथं तत्ते [illegible]ऽदेहेन। तीव्रातिवेगप्रस्तवेन। तीव्रोयं अतिवेगः [illegible] प्रस्तवतीति तेन तीव्रातिवेगप्रस्तवेन। स्रू
ध्यौ कामभस्मकरणे रत्या नष्टा तं। अप्रवसा रतिः मोदेन कृतोपकारः॥[illegible]॥ आद मास्तु विघ्नं तपस तापसी वनस्पतिं वृक्षाश्वा
वसज्य॥ स्त्रीसंनिकर्षं परिहर्तुमिच्छन्नूतिरोदधे स्त तयति [illegible]॥ तपस्वी सिद्धृतः। हृतयतिः ईश्वरः तिरोदधे। अव
र्यावरुद्धा किं कृत्वा। तपसः विघ्नं विघ्नरूपं कामं आत्मशरीरप्रवसज्य। तं कामं। अवसंजयं पूर्वं प्रवसज्य। कं कमिव। वृक्ष
वनस्पतिमिव। किं कुर्वन् स्त्रीसंनिकर्षं परिहर्तुं इच्छन्। त्यक्तुमिच्छन्। स्त्रियः संनिकर्षः समीपं स्त्रीसंनिकर्षं॥ [illegible]
तूबन्नं तो सत्त्वं॥७४॥ शैलात्मजापि पितुरुच्छिरसोभिलाषं व्यर्थं समर्थ्य ललितं वपुरात्मनश्च। सख्योः समक्षमिति [illegible] ५५
धिकजातलज्जा शून्या जगाम भुवनाभिमुखी कथंचित्॥७५॥ शैलात्मजापि शून्या सती अयेतनासती कथंचिन्मह
ताकष्टेन स्ववनाभिमुखी जगाम। स्वं वेश्म स्वं गृहं अभिमुखी। स्ववनाभिमुखी। किं कृत्वा। उच्छिरसः पितुः अभिलाषं मनो
रथं व्यर्थं समर्थ्य। निष्फलं कृत्वा। उच्चकैः [illegible] शिरो यस्यासौ उच्छिराः तस्य उच्छिरसः। च पुनः आत्मनः [illegible] ललितं वपु

मनोहरं शरीरं व्यर्थं समर्थ्य। समर्थनं हर्षं समर्थ्य। कथंभूता शैलात्मजा। [illegible] अधिकजातलज्जा। अधिका जाता लज्जा यस्याः
अधिकजातलज्जा॥ क्व सति। सख्योः जया विजययोः समक्षं प्रत्यक्षमिति॥७५॥ सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्यां। सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां प्रतिपथगतिरासीद्वेगदीर्घीकृतात्मा॥७६॥
[illegible] हिमाद्रिः [illegible] दुहितरं कन्यां दोर्भ्यां आदाय ग्रहीत्वा प्रतिपथगतिरासीत्। क इव। दन्तलग्नां पद्मिनीं बिभ्रत् धारयन्
सुरगज इव। यथा सुरगजः दन्तलग्नां पद्मिनीं बिभ्रत् धारयन् प्रतिपथगतिर्भवति तथा। प्रतिपथं गतिर्गमनं यस्य
[illegible] प्रतिपथगतिः। कथंभूतः सुरगजः। कथं वेगदीर्घीकृतात्मा। वेगेन दीर्घीकृतांगः॥ वेगेन दीर्घीकृतः आत्मा शरीरं ये
[illegible] वेगदीर्घीकृतात्मा। दन्तयोर्लग्ना दन्तलग्ना तां दन्तलग्नां। कथंभूतां दुहितरं। रुद्रसंरम्भभीत्या सपदि संतत्क्षणे मुकु
[illegible] रुद्रस्य संरम्भः कोपः तस्माद्भयात् भीतिः। भयं तया रुद्रसंरम्भभीत्या। पुनः कथंभूतां दुहितरं अनुकम्प्यां॥
[illegible] अनुकंपयितुं योग्या अनुकम्प्या तां अनुकम्प्यां॥७७॥ ॥इति श्रीकुमारसंभवमहाकाव्ये [illegible] टीकायां काम

ऽोनाम तृतीयः सर्गः॥ ॥३॥ ॥अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता॥ विधिना प्रतिपादयिष्यता नववै
ऽसह्यवेदने॥१॥ अथ अनंतरं॥ विधिना दैवेन कर्ई कामवधूः कर्म्मी मोहपरायणा सती॥ विबोधिता प्राप्तचेतना कृता
व परायणा॥ मोहपरायणा॥ पुनः कथं भूता॥ कामवधूः॥ विवशा॥ अवशा॥ कथं भूतेन विधिना॥ नववैधव्यं प्रतिपादयिष्य
प्रतिपादयिष्यतीति प्रतिपादयिष्यन् तेन प्रतिपादयिष्यता॥ नवं च तत् वैधव्यं च नववैधव्यं॥ कथं भूतं नववैधव्यं
ह्यवेदने॥ असह्या वेदना यस्य तत् असह्यवेदनं॥ १॥ अवधानपरेचकार सा प्रलयांतोन्मिषिते विलोचने॥ न विवेद तयोर
तयोः प्रियमत्यंतनिमग्नदर्शनं॥ २॥ सा रतिः विलोचने अवधानपरे चकार प्रकाशे अकरोत्॥ कथं भूते विलोचने प्रलयां
न्मिषिते॥ प्रलयांते मोहांते उन्मिषिते विकाशिते सा रतिः अतृप्तयोः तयोः लोचनयोः प्रियं कामं अत्यंतनिमग्नदर्शनं
न विवेद अत्यंतं निमग्नं दर्शनं यस्य स अत्यंतनिमग्नदर्शनः तं अत्यंतनिमग्नदर्शनं॥ तयोः लोचनयोः अत्र संबंधे षष्ठी
अथवा अनादरे षष्ठी॥ कामस्य दर्शने अतृप्ते लोचने अनादृत्य अत्यंतनिमग्नदर्शनो कामं न विवेद॥ यथा रुदंतमनादृत्य प्राव्र ५८

ति पा क

जीत रुदंतं वित्युक्तं अनादृत्य पिता प्रव्रजितः इत्यर्थः॥ अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरो ददृशे पु
रुषाकृतिः क्षितौ हरकोपानलभस्म केवलं॥ ३॥ तया रत्या क्षितौ पृथिव्यां केवलं हरकोपानलभस्म ददृशे॥ हरस्य कोपः
तस्य अनलः तस्य भस्म हरकोपानलभस्म॥ कथं भूतं हरकोपानलभस्म॥ पुरुषाकृति पुरुषवत् आकृतिर्यस्य तत् पु
रुषाकृति॥ दग्धस्य तस्य कामस्य आकारेण न दृष्टं॥ ददृशे अत्र कर्म्मणि क्रिः॥ कथं भूतया तया॥ इति अभिधाय उक्त्वा उत्थितया॥ इ
ति किं॥ अयीति कोमलामंत्रणे हे जीवितनाथ हे जीव वसीति॥ ३॥ अथ सा पुनरेव विह्वला वसुधालिंगनधूसरस्तनी॥
विललाप विकीर्णमूर्द्धजा समदुःखामिव कुर्वती स्थलीं॥ ४॥ अथ अनंतरं सा रतिः पुनरेव विललाप॥ कथं भूता सा रतिः वसु
धालिंगनधूसरस्तनी॥ वसुधायाः आलिंगनं तेन धूसरौ शेमलिनौ स्तनौ यस्याः सा वसुधालिंगनधूसरस्तनी॥ पुनः कथं भूता॥ वि
ह्वला॥ पुनः कथं भूता सा रतिः॥ विकीर्णमूर्द्धजा॥ विकीर्णा विलुलिता मूर्द्धजा यस्याः सा विकीर्णमूर्द्धजा॥ उत्प्रेक्ष्यते स्थलीं प्र
देशं समदुःखामिव कुर्वतीव॥ समं दुःखं यस्याः सा समदुःखा॥ तां समदुःखां॥ ४॥ उपमानमभूद्विलासिनां करणं यत्तव कांतिम

सा॥तदिदंगतमीदृशींदशांनविदीर्येतकठिनाःखलुस्त्रियः॥५॥हेकामयत्नूतनकारणंशरीरंविलासिनांकुरुप्राणांअप
ंअवस्तू।कामदेवसदृशोयमिति।कथ्याकोतिमत्त्वा॥कोतिमतोसावःकोतिमन्ना।तया॥कोतिमन्नया॥यतइदंकरणं
ांशरीरंईदृशींदशांगतं।तत्स्मरूपंदर्शायांनं॥यत्रअदंनविदीर्येतनूखलुविवादेकविना॥अदंअत्रकर्मवतूकर्मक
।५॥कलुमांवदधीनजीवितांविनिकीर्यक्षणसिन्नसौहृदः॥नलिनींक्षतसेतुबंधनोजलसंघातइवासिविद्रुतः॥६॥कृतवान
सिविप्रियंनमे॥हेकामत्वंमांविनिकीर्यत्यक्त्वाकविद्रुतोसि।कथंभूतंमां।त्वदधीनजीवितां।तवअधीजीवितंयस्याःसात्वदधीन ५७
जीविता।तां।त्वदधीनजीवितां॥नुइतिवितर्के॥कथंभूतस्त्वं।क्षणात्सिन्नसौहृदः॥क्षणेनसिन्नंत्यक्तंसौहृदंप्रीतिर्येनसक्षण
सिन्नसौहृदः॥कांकइव॥नलिनींविनिकीर्यत्यक्त्वाजलसंघातइव॥जलस्यसंघातः।जलसंघातः॥कथंभूतोजलसंघातः॥क्ष
तसेतुबंधनः॥क्षतंस्फोटितंसेतुबंधनंयस्यसःक्षतसेतुबंधनः॥यथासेतुद्रपायित्व॥पद्मिनीपरित्यज्यते॥यत्रद्रोविद्रवति
तथात्वंसौहृदंत्यक्त्वामांपरित्यज्यकपलायितोसि॥सौहृदस्यसेतुरूपमानं॥कामस्यतउपमानं॥सुहृदःकर्मसौहृदं॥रा

गानरुत्रयोगःत्वाअणप्रत्ययः॥कचिद्धुसय्यपदवृद्धिः॥सौहृदं॥अनइत्युत्तिपिदिक्षेरितिपूर्वपदस्यवृद्धिंप्राप्तौउत्तरपदस्यवे
सनाव॥संज्ञापूर्वकोविधिरनित्यः॥अतएवसौहृदं॥प्रीतिं॥विनिकीर्यति॥अत्रक्त्वाविधेयो॥६॥कृतवानसिविप्रियंनमेप्र
तिकूलंदनतेमयाकृतं॥किमकारणमेवदर्शनंविलपंत्यैरतयेनदीयते॥७॥हेकामत्वंमेममविप्रियंनकृतवानसि॥त्वयु
नःमयातेतवप्रतिकूलेविरुद्धंनकृतं॥हेकामत्वयाविलपंतीरतयेकिमितिअकारणमेवकारणंविनाएवदर्शने
नदीयते॥७॥स्मरसिस्मरमेखलागुणैरुतगोत्रस्खलितेषुबंधनं॥च्युतकेसरदूषितेक्षणान्यवतंसोत्पलताडनानिवा॥८॥
स्तगोत्रस्मरउतअथवागोत्रस्खलितेषुनामविपर्ययेषुबंधनंस्मरसि॥कैःमेखलागुणैःरसनातंतुभिः॥वाअथवाहेस्मर
त्वंतेअवतंसोत्पलताडनानिस्मरसि॥कथंभूतानिअवतंसोत्पलताडनानि॥च्युतकेसरदूषितेक्षणानि॥अवतंसेयत्
तरौत्पलंतेनयानिताडनानि॥तानिच्युतकेसरदूषितेक्षणानि॥८॥हृदयेवससीतिमत्प्रियंयदवोचस्तदवैमिकैतवं॥
उपचारपदंनचेदिदंत्वमनंगःकथमक्षतारतिः॥९॥हेकामयत्त्वंइतिमत्प्रियंअवोचः।इतीतिकिं।हेरतेत्वंमम

...दयेऽवसि॥ तत्र अहं कैतवं व्याजं अवैमि॥ विद्य दिहृदं तव पवारय पदं न॥ अनुनय पदं न तदानीं त्वं कथं अनेग॥ अंगरहित॥
...अथ अत्र नाश्रद्दग्धा॥ आश्रयस्य नाशे सति॥ आधेयस्यापि नाशो न्याय्यः॥ ९॥ परलोकनवप्रवासिनः प्रतिपद्यो पदवीमहं
...विधिना जन एव वंचितः त्वदधीनं खलु देहिनां सुखं॥ १०॥ हे काम अहं तव पदवीं मार्गं प्रतिपद्ये॥ कथं भूतस्य तव परलो
...नवप्रवासिनः॥ परलोकेन वः प्रवासो यस्यासीति परलोकनवप्रवासी तस्य॥ परलोकनवप्रवासिनः॥ विधिना प्रजनः
...वंचितः खलु यस्मात् कारणात् देहिनां सुखं च दधीनं॥ ११॥ रजनीतिमिरावगुंठिते पुरमार्गे घनशब्दविक्लवा॥ वसतिं
प्रियकामिनां प्रियां त्वदृते प्रापयितुं क ईश्वरः॥ १२॥ हे प्रिय त्वदृते त्वद्विना प्रियायां कर्म॥ कामिनां वल्लभानां वसतिं प्रापयि ५७
तुं क ईश्वरः समर्थः॥ अपि तु न कोपि॥ कथं भूतां ताः॥ प्रियाः॥ घनशब्दविक्लवाः॥ घनशब्देन विक्लवा ताः घनशब्दविक्लवाः॥
वसति॥ पुरमार्गे रजनीतिमिरावगुंठिते सति॥ पुरस्य मार्गः तस्मिन् पुरमार्गे॥ रजन्यास्तिमिरं तेन अवगुंठिता आच्छा
दिता॥ तस्मिन् रजनीतिमिरावगुंठिते॥ १३॥ नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन् पदे पदे॥ असति त्वयि वा

...णीमदः प्रमदानामधुना विडंबना॥ १४॥ हे काम अधुना सांप्रतं वारुणीमदः सुराकृता क्षीबता प्रमदानां विडंबना ज
...ता॥ उपहासो जातः॥ क सति॥ त्वयि असति असति॥ किं कुर्वन्॥ अरुणानि नयनानि घूर्णयन् सन्॥ पुनः किं कुर्वन्॥ पदे पदे
५८ वचनानि पदं वचांसि स्खलयन्॥ १५॥ हे काम अधुना सांप्रतं वारुणीमदः॥ अवगम्य कथीकृतं वपुः प्रियवेक्षो सव निष्फ
...लोदयः॥ बहुलेपि गते निशाकरस्तनुतां दुःखमनंग मोक्ष्यति॥ १६॥ हे अनंग निशाकरः चंद्रः बहुलेपि गते सति वि
नशाकरः॥ कृष्णपक्षेपि अतिक्रांते सति तनुतां कृशत्वं॥ दुर्बलत्वं दुःखं यथा लवति तथा॥ मोक्ष्यति॥ त्यक्ष्यति॥ किंभूतं
...प्रियबंधो प्रियसुहृदः तव वपुः कथीकृतं अवगम्य ज्ञात्वा॥ अकथा कथा कृतं कथीकृतं॥ कथामात्रशेषं॥ कथं भूतः
...निशाकरः॥ निष्फलोदयः॥ निष्फलः उदयो यस्यासौ निष्फलोदयः॥ कामनाशात्॥ १७॥ हरितारुणचारु... बंधकलपुं
...किल राहुः सविता॥ वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति॥ १८॥ हे काम नवचूतप्रसवः संप्रति कस्य बा
...णतां गमिष्यति॥ तत्त्वं वद॥ नवो यश्चूतस्याम्रस्य प्रसवः कुसुमं नवचूतप्रसवः॥ कथं भूतः॥ नवचूतप्रसवः॥ हरितारुणः

दा बंधनः॥ हरितं नीलं अरुणं वा कमनोज्ञं बंधनं यस्याः सा हरितारुणचारुबंधनः॥ पुनः कथंभूतः नवकृतप्रसवः क
अस्तु कोकिलरवाद्र्दसूचितः॥ कलो मनोज्ञो यः पुंस्कोकिलरवादिसूचितः तेन सूचितः कथितः॥१४॥ अलिपंक्तिरनेकश
विधया गुणरूपया धनुषि नियोजिता॥ विरुतैः करुणस्वरैरियं गुरुशोकामनुरोदितीव मां॥१५॥ हे काम इयं अलिपंक्तिः अ
नेकरपंक्तिः गुरुशोकां मां अनुरोदितीव॥ अनुपश्चात् रोदितीव॥ गुरुः शोको यस्याः सा गुरुशोका तां गुरुशोकां॥ कैः विरु
तैः शब्दैः कथंभूतैः विरुतैः करुणस्वरैः॥ (करुणं) स्वरा येषां तानि तैः॥ करुणस्वरैः कथंभूता अलिपंक्तिः॥ तया अनेकश
अनेकवारान् धनुषि गुणरूपया अर्थं वा येनियोजिता॥ अवस्थापिता॥१५॥ प्रतिपद्य मनोहरं वपुः पुनरप्यादिशतात ५९
दुच्छितः॥ रतिदूतपदेषु कोकिलां मधुरालापनिसर्गकोविदां॥१६॥ हे काम त्वं मनोहरं वपुः पुनः प्रतिपद्य प्राप्य अत
च्छितः॥ सन् तावत् आदौ रतिदूतपदेषु॥ कोकिलां आदिश॥ कथंभूतां कोकिलां॥ मधुरालापनिसर्गकोविदां॥ मधु
रो यः आलापः तत्र निसर्गेण स्वभावेन कोविदा तां॥ मधुरालापनिसर्गकोविदां॥ इति पदे अत्र याकारांत्री किते

कचितः॥ अतो इतीपदे कृष्णः॥१६॥ शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च॥ सुरतानि च तानि ते रहः स्म
रसंस्मृत्य न शांतिरस्ति मे॥१७॥ हे स्मर ते तव उपगूढानि आलिंगनानि संस्मृत्य च पुनः रहः एकांते तानि सुरतानि मे ह
नानि॥ मे मम मनः शांतिं नास्ति॥ कथंभूतानि उपगूढानि॥ शिरसा प्रणिपत्य याचितानि॥ पुनः कथंभूतानि उपगू
पगूढानि॥ सवेपथूनि॥ सह वेपथुना वर्त्तंते यानि तानि सवेपथूनि॥१७॥ रचितं रतिपंडित त्वया स्वयमंगेषु म
मेदमार्त्तवं॥ म्रियते कुसुमप्रसाधनं॥ तव तत् आरुवपुर्न दृश्यते॥१८॥ हे रतिपंडित त्वया मम अंगेषु स्वयं रचितं
गेषु यत् इदं आर्त्तवं वासंतिकं कुसुमप्रसाधनं मंडनं॥ मया म्रियते॥ तव तत् आरुवपुर्न दृश्यते॥ कुसुमानां प्रसाधनं मंड
स्मृते येन कुसुमप्रसाधनं॥१८॥ विबुधैरसि यस्य दारुणैरसमाप्तप्रतिकर्म्मणि स्मृतः॥ तमिमं कुरु दक्षिणेतरं चरणं नि
तरस्मर निरागमेहि मे॥१९॥ हे काम दारुणैः विबुधैः देवैः॥ यस्य चरणस्य प्रतिकर्म्मणि॥ असमाप्ते सति मंडने॥ असमाप्ते
कर्मणि त्वं स्मृतो सि॥ दक्षिणेतरं वामं इदं मम चरणं निर्मितरागं कुरु॥ निर्मितः रागो यस्य स निर्मितरागस्तं निर्मित

दर्शं ॥ प्रतिकर्मप्रसाधनं ॥ इत्यमरः ॥ हे काम त्वं प्रतिगच्छ ॥ १९ ॥ अहमेत्य पतंगवर्त्मना पुनरंकाश्रयणी भवामि ते ॥ चतु
रैः सुरकामिनीजनैः प्रिय यावन्न विलुभ्यसे दिवि ॥ २० ॥ हे काम इयं अहं पतंगवर्त्मना ॥ अग्निमार्गेण अत्र आगत्य ते त
व प्रिय पुनः अंकाश्रयणी भवामि ॥ अंकं आश्रयते अंकाश्रयणी ॥ यावत् त्वं हे प्रिय चतुरैः दक्षैः सुरकामिनीजनैः कर्तृभिः दि
वि न विलोभ्यसे ॥ न वशीक्रियसे ॥ २० ॥ मदनेन विना कृता रतिः क्षणमात्रं किल जीवितेति मे ॥ वचनीयमिदं व्यवस्थित
रमण त्वामनुयामि यद्यपि ॥ २१ ॥ हे रमण यद्यपि अहं त्वां अनुयामि ॥ अनुगच्छामि तथापि मे मम इदं वचनीयं व्यव
स्थितमिति ॥ उच्यत इति वचनीयं वाच्यं ॥ निंदा इतीति किं ॥ रतिः मदनेन विना कृता अदृश्या सती क्षणमात्रं जीवि ६७
ता इति ॥ २१ ॥ क्रियतां कथमंत्यमंडनं परलोकांतरितस्य ते मया ॥ सममेव गतोस्यतर्कितां गतिमंगेन च जीवितेन च ॥ २२ ॥
हे काम परलोकांतरितस्य ते तव अंत्यमंडनं ॥ अवसानभूषणं कर्म मया कर्त्री कथं क्रियतां ॥ परलोकेन अंतरितः व्य
वहितः ॥ तस्य परलोकांतरितस्य ॥ हे काम त्वं अंगेन देहेन च पुनः जीवितेन अतर्क्यतां अविचारितां गतिं सममेव यु
लो

काले
कं वंगतोसि ॥ अन्यथा तु मृतेपि शरीरमात्रेण तिष्ठति ॥ २२ ॥ ऋजुतां नयतः स्मरामि ते ॥ शरमुत्संगनिषक्तधन्विनः ॥ मधुना
सह सस्मितां कथां नयनोपांतविलोकितानि च ॥ २३ ॥ हे काम शरं ऋजुतां नयतः ते तव मधुना वसंतेन सह
सस्मितां सहासां कथां ॥ अहं स्मरामि ॥ कथंभूतस्य ॥ उत्संगनिषक्तधन्विनः ॥ उत्संगे निषक्तं धनुर्यस्य स उत्संगनिषक्तध
न्वा ॥ तस्य उत्संगनिषक्तधन्वनः ॥ च पुनः अहं नयनोपांतविलोकनानि स्मरामि ॥ नयनयोः उपांतौ नयनोपांतौ ॥ तयोर्वि
लोकितानि ॥ तानि नयनोपांतविलोकितानि ॥ २३ ॥ क्व नु ते हृदयंगमः सखा कुसुमायोजितकार्मुको मधुः ॥ न खलु
उग्ररुषा पिनाकिना गमितः सोपि सुहृद्गतां गतिं ॥ २४ ॥ हे काम ते तव हृदयंगमः सखा मधुः ॥ हृदयंगच्छतीति हृदयंगमः ॥
[illegible] सखा कुसुमायोजितकार्मुकः ॥ कुसुमैः आयोजितं विरचितं कार्मुकं चापं येन स कुसुमायोजितकार्मुकः ॥
खलु विषादे उग्ररुषा ॥ उग्रा रुट् यस्य स उग्ररुट् ॥ तेन उग्ररुषा पिनाकिना ॥ सोपि मधुरपि सुहृद्गतां गतिं ॥ तावकीं
[illegible] न खलु गमितः प्रापितः ॥ सुहृदा कामेन गता प्राप्ता सुहृद्गता ॥ तां सुहृद्गतां ॥ नासौ पिनाकिना रुद्रेण दग्ध इत्यर्थः ॥

हृदये ॥२४॥ अथ तैः परिदेविताक्षरैः हृदये दिग्धशरैरिवार्दिता हितैः॥ रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः॥२५॥ अ
भ्युपपत्तुं नंतरः अलभ्यसंकेता॥ आतुरां दुःखितां रतिं अभ्युपपत्तुं आश्वासयितुं आत्मानं पुरो अग्रे अदर्शयत्॥ तदग्रतः अग्रो
दर्शितवान्॥ कथंभूतो मधुः तैः परिदेविताक्षरैः प्रलापवचोभिः हृदये अर्दितः पीडितः परिदेवितानि दीनानि यानि
अक्षराणि तैः परिदेविताक्षरैः॥ कथंभूतैः परिदेविताक्षरैः दिग्धशरैरिव विषलिप्तशरैरिव हृदये अर्दि
तः॥२५॥ ... वेक्ष्य सरोदसा स्तनसंबाधमुरो जघान चात्मनः स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते॥२६॥ सा रति
तं वसंतं अवेक्ष्य दृष्ट्वा भृशं अत्यर्थं रुरोद। च पुनः स्तनसंबाधं उरः जघान आत्मनः संबाधमयीडाय तु स्तनसंबाधं वि
यस्मात्कारणात् स्वजनस्य अग्रतः पुरः दुःखं विवृतद्वारमिव उद्घाटितद्वारमिव उपजायते॥ संपद्यते॥२६॥ इति चैनमु
वाच दुःखिता सुहृदः पश्य वसंत किं स्थितं यदिदं कणशो विप्रकीर्यते पवनैर्भस्म कपोतपांडुरं॥२७॥ सा रतिः दुःखिता स
ती एनं वसंतं प्रति इति उवाच॥ इति किं उवाच। हे वसंत सुहृदः कामस्य किं स्थितं। किं तव मित्रस्य संपन्नं। ननु हे वसंत त्वं पश्य। प

पवनैः यदिदं भस्म कणशः प्रकीर्यते विक्षिप्यते॥ अनेकान् कणान् कणशः॥ कथंभूतं भस्म कपोतपांडुरं॥ कपो
तवत् पांडुरं कपोतपांडुरं॥२७॥ अयि संप्रति देहि दर्शनं स्मर पर्युत्सुक एष माधवः॥ दयितासु अनवस्थितं नृणां
न खलु प्रेम चलं सुहृज्जने॥२८॥ हे स्मर अयि इति कोमलालापे॥ संप्रति इदानीं दर्शनं देहि॥ हे काम एष माधवः वसंतः
पर्युत्सुकः॥ नृणां प्रेम स्नेहः दयितासु वल्लभासु अनवस्थितं॥ चलं खलु इति निश्चितं॥ सुहृज्जने प्रेम चलं न॥२८॥
अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव॥ बिसतंतुगुणस्य कारितं धनुषः कोमलपुष्पपत्रिणः॥२९॥ हे का
म अमुना पार्श्ववर्तिना निकटस्थेन वसंतेन ससुरासुरं जगत् तव धनुषः आज्ञां कारितं निर्देशं ग्राहितं॥ वशीकृतमित्यर्थः॥ क
थंभूतं जगत्॥ ससुरासुरं॥ सह सुरासुरैर्वर्तते यत्तत् ससुरासुरं॥ कथंभूतस्य धनुषः॥ बिसतंतुगुणस्य॥ बिसतंतु
र्लोकायस्य तत् बिसतंतुगुणं तस्य बिसतंतुगुणस्य॥ पुनः कथंभूतस्य धनुषः॥ कोमलपुष्पपत्रिणः॥ कोमलानि या
नि पुष्पाणि तान्येव पत्रिणो यस्य तत् कोमलपुष्पपत्रिणः॥ ननु हा हः अमर्षेण दीनोवा॥२९॥ गत एव न ते निवर्तते॥ स

ना व
ति॥
प्रतिद
त्व वर
वनवप
स्तगेन
स्मतेन
तस्व
ऊ रा॰

रेखा दीपइवानिलाहता ॥ अहमस्य हृच्छोषपत्यमां मविषह्यव्यसनप्रशमितां ॥ ३० ॥ देवसंतातेन वसंतखामित्रं …के
॥ अनिलाहतो दीपइव ॥ अस्याकामरीपस्यतन्वेश्वतेश्च हृदंहृच्छोषवर्द्धितन्या ॥ कस्मात् ॥ परिच्छोषवात् ॥ देवसंतत्वंमांपस्य ॥
यं हृतं मा ॥ …विषह्यव्यसनप्रशमितां ॥ अविलंघ्य असहनीय ॥ यत्र व्यसनं दुःखं तेन प्रशमितां तां ॥ ३१ ॥ विधिनाकृतमेध्वे
सिंनतुमां कामवध्येविसुंचता ॥ अद्यतापि हि संश्रितां तु मां गजनमयपतनाय वल्लरी ॥ ३२ ॥ देवसंतान्तुडति वितर्के । कामव
ध्येकामदहने मां विसुंचता ॥ विधिना ॥ अथ वैरासेन हंसेन कृतं । द्वियस्मात् कारणात् ॥ अद्यतापि अश्चिताणापि वल्लरीगजस्त ६२
न्नेसंश्रिता ॥ आश्रितासती पतनाय त्सवति ॥ ३३ ॥ तदिदं क्रियतामनंतरं सवताबंधुजनप्रयोजनं । विधुरां ज्वलनातिस
र्जनात् तु मां प्रापय सहु हैतिकः ॥ ३४ ॥ देवसंततत्सात् कारणात् त्सवता द्यया अनंतरं पश्चात् ॥ इदं बंधुजनप्र
योजनं किं तज्जायाकार्यं क्रियतां ॥ विधीयतां ननु इति वितर्के ॥ ज्वलनातिसर्जनात् ॥ अग्निनादानात् ॥ मां नतुं अंति
के निकटं प्रापय ॥ ज्वलनस्य अतिसर्जनं दानं तस्मात् ज्वलनातिसर्जनात् ॥ ३५ ॥ शशिना सहयाति कौमुदी ॥ सहमेघे

ना तडिद्विलीयते ॥ प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥ ३६ ॥ देवसंतकौमुदी चंद्रज्योत्स्ना शशिना सहया
ति ॥ प्रलीयते तातडित् विद्युत् मेघेन सह विलीयते ॥ देवसंत इति विचेतनैरपि प्रतिपन्नं अनुष्टितं ॥ इतीति किं प्रमदा
पतिवर्त्मगा इति पतिवर्त्म यच्छंतीति पतिवर्त्मगाः ॥ ३७ ॥ अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना ॥ नवप
ल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ॥ ३८ ॥ देवसंत अहं विभावसौ अग्नौ तनुं रचयिष्यामि ॥ कस्मिन् इ
व नवपल्लवसंस्तरे इव ॥ यथा रागह्रुवार्थी नवाः ये पल्लवा तैर्मांसंस्तरः तस्मिन् नवपल्लवसंस्तरे ॥ कथंभूता अहं अमुना
प्रत्यगेनच्युतिव्हत्सेन ॥ प्रियगात्रभस्मना तज्जुवतत्तत्लिप्त चंदनेना कषायितस्तनी ॥ अनुलिप्तकुचा ॥ प्रियस्य गात्रं तस्य
भस्म तेन प्रियगात्रभस्मना ॥ कषायितौ स्तनौ यस्याः सा कषायितस्तनी ॥ ३९ ॥ कुसुमास्तरणे सहायतां बहुशः सौ
तस्त्वमावयोः ॥ कुरु संप्रतितावदाशु मे प्रणिपातांजलियाचितस्तितां ॥ ४० ॥ हे सौम्य त्वं आवयोः कुसुमास्तर
कृत्वाः सहायतां गतः ॥ कुसुमानां आस्तरणं तस्मिन् कुसुमास्तरणे ॥ देवसंत त्वं संप्रतिइदानीं प्रणिपातांजलि:

वितः॥ समनुयी वतु आदौ॥ आशु शीघ्रं मम चितीकृत्य॥ सौमङ्गव सौख्या॥ सखा दित्यो यतु॥ चीयते इति चिता॥ काष्ठर
ण॥ ३५॥ तदनु ज्वलनं मदर्पितं त्वरयेर्दक्षिणवातवीजनैः॥ विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां वि
ना॥ ३६॥ देवसंता तदनु पश्चात् त्वं मदर्पितं मया अर्पितं दत्तं मदर्पितं ज्वलनं अग्निं दक्षिणवातवीजनैः मलयपवन
व्यजनैः त्वरयेः संधुक्षयेः॥ हे वसंत खलु निश्चितं तेन तव विदितं ज्ञातं यथा स्मरो मां विना क्षणमपि न उत्सहते॥ ३६॥
इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ॥ अविभज्य परत्र यं मया सहितः पास्यति ते स बान्धवः॥ ३७॥ दे ६३
व संत वसुनः इति पूर्वोक्तं विधाय कृत्वा नौ आवयोः एक एव सलिलस्याञ्जलिर्दीयतां॥ यत् यस्मात्कारणात्
स ते तव बान्धवः मया सहितः सन् अविभज्य विभागं अकृत्वा परत्र परलोके सलिलाञ्जलिं पास्यति॥ ३७॥ परलो
कविधौ च माधव स्मरमुद्दिश्य विलोलपल्लवाः॥ निवपेः सहकारमञ्जरीः प्रियचूतप्रसवो हि ते सखा॥ ३८॥ हे वसं
त हे माधव त्वं परलोकविधौ और्ध्वदेहिके स्मरं उद्दिश्य विलोलपल्लवाः चंचलपल्लवाः दियस्मात् कारण

त्ते तव सखा॥ कामः॥ प्रियचूतप्रसवः॥ प्रियाः चूतप्रसवा यस्य सः प्रियचूतप्रसवः॥ यत् अन्यच्च प्रियत्वे अयचख दा
नतु अयुक्तं॥ अयं चूतप्रसवप्रियः॥ कामः दुवपुर्बीजलं तं संताने॥ वपुसि समीयात्॥ निर्वपेः॥ अर्चितः याशब्दस्य
म्याहो नेइकारः॥ अवलोपे॥ निवपेः सिद्धं॥ ३८॥ इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती॥ सफरी
ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकंपयत्॥ ३९॥ आकाशात् भवा सरस्वती॥ वाणी इति देहविमुक्तये स्थितां रतिं
अन्वकंपयत्॥ अरक्षत्॥ देहस्य विमुक्तिः तस्यै देहविमुक्तये॥ आकाशात् भवतीति आकाशभवा॥ कामिव॥ प्रथ
मा वृष्टिः सफरीमिव॥ कथं भूतां सफरीं॥ ह्रदशोषविक्लवां॥ ह्रदस्य शोषेण विक्लवा॥ तां ह्रदशोषविक्लवां॥ ३९॥ कु
सुमायुधपत्नि दुर्लभस्तव भर्ता न चिराद्भविष्यति॥ शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि॥ ४०॥ तामेव
विशेषमाह॥ हे रते देहं मा त्याक्षीः॥ हे कुसुमायुधपत्नि तव भर्ता चिरात् चिरकालं दुर्लभो न भविष्यति॥ हे रते
येन कर्मणा स कामः हरलोचनार्चिषि शलभत्वं गतः॥ तत् त्वं शृणु॥ ४०॥ अभिलाषमुदीरितेन्द्रियः स्वसुतायाम

ऽयं प्रजापतिः॥ अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्॥ ४१॥ प्रजापतिर्ब्रह्मा आत्मसुतायां अभिलाषं अकरो
त्। इत्थंभूतः प्रजापतिः उदीरितेंद्रियः॥ उदीरितानि इंद्रियाणि येन स उदीरितेंद्रियः॥ चलेंद्रिय इत्यर्थः॥ अथ अनंतरं
तेन ब्रह्मणा विक्रियां निगृह्य अभिशप्तः सन् कामः एतत् फलं अन्वभूत्॥ देहदाहलक्षणमनुबभूवेत्यर्थः॥ ४१॥ परिणे
ष्यति पार्वतीं यदा॥ तपसा तत्प्रवणीकृतो हरः॥ उपलब्धसुखस्तदा स्मरं वपुषा स्वेन नियोजयिष्यति॥ ४२॥ हरः यदा पार्व
तीं परिणेष्यति कथंभूतः हरः तपसा तत्प्रवणीकृतः॥ स ईश्वरः तदा तस्याः प्रवण आयत्तः तत्प्रवणीकृतः तत्प्रवणः अतत्प्र
वणः कृतः तत्प्रवणीकृतः स ईश्वरः तदा स्मरं कामं स्वेन वपुषा स्वशरीरेण योजयिष्यति॥ ४२॥ इति चाह स धर्मयाचि ६४
तः स्मरशापावधिदां सरस्वतीं॥ अशनेरमृतस्य चोभयोर्वशिनश्चांबुधराश्च योनयः॥ ४३॥ स ब्रह्मा धर्मयाचितः स्म
रशापावधिदां सरस्वतीं इति चाह॥ उवाच स्मरस्य शापः तस्य अवधिः अंतः तं ददातीति स्मरशापावधिदा तां स्मरशापावधि
दां॥ धर्मेण याचितः धर्मयाचितः वशिनः जितेंद्रियाः प्रसन्नाः च अंबुधराः अशनेः वज्रस्य च अमृतस्य

रुभयोः योनयो भवंति॥ तत्र [illegible]॥ यथा मेघाः कदाचित् अशनिं क्षिपंति॥ कदाचित् तोयं क्षिपंति एवं
ईश्वराः कदाचित् निग्रहं कुर्वंति कदाचित् प्रसादं कुर्वंति॥ ४३॥ युग्मं॥ ॥ तदिदं परिरक्ष शोभने भवितव्यप्रियसंगमं
वपुः॥ रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी॥ ४४॥ हे शोभने तत्र तस्मात् कारणात् त्वं इदं वपुः परिरक्ष क
थंभूतं वपुः भवितव्यप्रियसंगमं॥ भवितव्यः भावी प्रियसंगमो यस्मिन् तत् भवितव्यप्रियसंगमं॥ कस्मात् तपात्यये
ग्रीष्मे रविपीतजला नदी ओघेन पुनः युज्यते॥ रविणा पीतं जलं यस्याः सा रविपीतजला॥ ४४॥ इत्थं रतेः किमपि भूत
मदृश्यरूपं मंदीचकार मरणव्यवसायबुद्धिं॥ तत्प्रत्ययाच्च कुसुमायुधबंधुरेनामाश्वासयत्सुचरितार्थपदैर्व
चोभिः॥ ४५॥ इत्थं अमुना प्रकारेण किमपि अदृश्यरूपं भूतं कोपि सत्त्वो रतेः मरणाय बुद्धिं व्यवसायबुद्धिं मंदीचका
र शिथिलयत्॥ कुसुमायुधबंधुः वसंतः पुनः रतिं तत्प्रत्ययात् वचोभिः वाक्यैः आश्वासयत्॥ कथंभूतैर्व
चोभिः सुचरितार्थपदैः सुचरितानि अर्थपदानि येषां तानि सुचरितार्थपदानि तैः सुचरितार्थपदैः॥ ४५॥

...स्य मदनवधूरुपप्लवांतं व्यसनकृशा परिपालयांबभूव ॥ शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्र-
दोषं ॥४६॥ अथ अनंतरं मदनवधूः उपप्लवांतं अनर्थावसानं वैक्ष्यं परिपालयांबभूव ॥ परिपालयामास ॥
...विषय अंतः उपप्लवांतस्तं उपप्लवांतं ॥ कथंभूता मदनवधूः व्यसनकृशा ॥ व्यसनेन कृशा व्यसनकृशा ॥ का इव
यथा दिवातनस्य दिवसस्तवस्य शशिनः लेखा प्रदोषमिव ॥ यथा दिवातनस्य दिवसस्तवस्य इंदोः लेखा प्रदोषं पा-
लयति ॥ प्रतीक्षते ॥ कथंभूता लेखा ॥ किरणपरिक्षयधूसरा ॥ किरणानां परिक्षयः तेन धूसरा ॥ दिवातनः दिवातन-
॥४६॥ ॥ इति श्रीकुमारसंभवे महाकाव्ये कालिदासकृतौ रतिप्रलापो नाम चतुर्थः सर्गः ॥ ॥४॥ ॥श्री॥ ॥तथा ६॥
समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती ॥ निनिंद रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि
चारुता ॥१॥ कठिनकामकथां आस्यायेदानीं पार्वत्याः वृत्तांतं निरूपयिष्यन्नाह ॥ पार्वती हृदयेन रूपं नि-
निंद ॥ कथंभूता पार्वती ॥ पिनाकिना ईश्वरेण भग्नमनोरथा सती ॥ भग्नः मनोरथो यस्याः सा भग्नमनोरथा ॥ दि-

...कथंभूता पिनाकिना ॥ तथा तेनैव प्रकारेण समक्षं प्रत्यक्षं ॥ मनोभवं कामं दहता ॥ हि यस्मात्कारणात् चारुता मनो-
हरता प्रियेषु वल्लभेषु सौभाग्यफला ॥ सौभाग्यमेव वाल्लभ्यमेव फलं यस्याः सा सौभाग्यफला ॥२॥ इयेष सा कर्तु-
मवंध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ॥ अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥२॥ सा
पार्वती तपोभिः आत्मनः अवंध्यरूपतां सफलतां कर्तुं इयेष ॥ ऐच्छत् ॥ किं कृत्वा ॥ समाधिं नियमं आस्थाय ॥
आश्रित्य ॥ वा अथवा अन्यथा तपसा विना द्वयं कथं अवाप्यते ॥ आसाद्यते ॥ किं तद्द्वयं एकं तथाविधं प्रेम ॥ तादृशो ईदृ-
...नादिदानेन खेदः ॥ द्वितीये वपुनस्याहरणः पतिस्समस्तभुवनाधिपतिः ॥२॥ निशम्य चैनां तपसे कृतोद्यमां सु-
तां गिरीशप्रतिसक्तमानसां ॥ उवाच मेना परिरभ्य वक्षसा निवारयंती महतो मुनिव्रतात् ॥३॥ मेना माता एनां पा-
र्वतीं वक्षसा वक्षःस्थलेन परिरभ्य आलिंग्य उवाच ॥ किं कृत्वा ॥ तां पार्वतीं तपसे कृतोद्यमां निशम्य श्रुत्वा ॥ कृत उद्य-
मो यस्याः सा कृतोद्यमा तां कृतोद्यमां ॥ कथंभूतां सुतां गिरीशे महादेवे प्रतिसक्तमानसां ॥ कथंभूता मेना ॥ महतः

रिष्टा तु तु नि त्रता तु निवारयंती॥ सत्कं मानसं यस्याः सा सत्कमानसा तां सत्कमानसां॥३॥ मनीषिताः संति गृहेपि देव
तपः क्व वपुः क्व तावकं वपुः॥ पदं सहेत भ्रमरस्य कोमलं शिरीषपुष्पं न पुनः पतत्रिणः॥४॥ देवसे मनीषिता मनो
कीता देवताः गृहेपि संतिविद्यंते॥ देवसे केचात्मकं तपः क्व च पुनः सुकुमारं तावकं वपुः क्वापेशलं कोमलं शि
रीषपुष्पं भ्रमरस्य पदं सहेत न पुनः पतत्रिणः शुकादेः पदं न सहेत॥४॥ इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न
नियंतुमुद्यमात्॥ क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥५॥ मेना माता इति पूर्वोक्तप्रका
रेण ध्रुवेच्छां सुतां अनुशासती शिक्षयंती सती सुतां कथां उद्यमात् तपःकरणात् नियंतुं निषेधयितुं न शशाक।
न समर्था बभूव॥ तपो विषये ध्रुवा निश्चला इच्छा यस्याः सा ध्रुवेच्छा तां ध्रुवेच्छां॥ तदेव युक्तोयमर्थः॥ कः पुरुषः ईप्सि
तार्थस्थिरनिश्चयं मनः प्रतीपयेत् आवर्तयेत्॥ च पुनः कः पुरुषः निम्नाभिमुखं पयः प्रतीपयेत्॥ व्यावर्तयेत्
अपि तु न कोपि॥ ईप्सिते वांछिते अर्थे स्थिरः दृढः निश्चयो व्यवसायो यस्य तत् ईप्सितार्थस्थिरनिश्चयं॥ निम्नं अभिमु

त्र र वै ता नरे

खं निम्नाभिमुखं तत् निम्नाभिमुखं॥ अथ प्रस्तुतं तोयं॥५॥ कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्वि
नी॥ अयाचतारण्यनिवासमात्मनः फलोदयांताय तपःसमाधये॥६॥ सा मनस्विनी पार्वती कदाचित् आसन्नसखीमु
खेन मनोरथज्ञं पितरं आत्मनः अरण्यनिवासं अयाचत॥ कस्मै तपःसमाधये समाधिर्ना धर्मचिंता इत्यमरः॥ आ
सन्नायाः सख्याः तस्याः मुखं तेन॥ मनोरथं जानातीति मनोरथज्ञः तं मनोरथज्ञं॥ अरण्ये निवासः अरण्यनिवा
सः तं अरण्यनिवासं॥ तपसः समाधिः तपःसमाधिः तस्मै तपःसमाधये॥ कथंभूताय तपःसमाधये॥ फलोदयांता
य॥ फलस्य उदयः फलोदयः फलोदयः अंते यस्य सः फलोदयांतः तस्मै फलोदयांताय॥६॥ अथानुरूपाभिनि
वेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा॥ प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरीशिखरं शिखंडिमत्॥७॥
क्रिया अथ अनंतरं सा गौरी पार्वती शिखंडिमच्छिखरं जगाम॥ कथंभूता सा गौरी गुरुणा हिमाचलेन कृताभ्यनुज्ञा॥ कृ
ता अभ्यनुज्ञा यस्याः सा कृताभ्यनुज्ञा॥ कथंभूतेन गुरुणा अनुरूपाभिनिवेशतोषिणा॥ अनुरूपो योग्यो यो

त्रिवेशः॥ आयद्दः आराधनं तेन तृष्यतीति॥ अनुरूपा सन्निवेश तोषी तेन॥ अनुरूपात् सन्निवेशात् तोषिणा॥ अन
पार्वत्या ईश्वरस्य आराधनं क्रियते॥ अत एव हिमाचलस्य परितोषः॥ पुनः कथंभूतेन गुरुणा॥ गरीयसा गरि
ना॥ कथंभूतं शिखरं॥ तदाख्यया॥ प्रजासु लोकेषु॥ पश्चात् प्रथितं प्रसिद्धं गौरीशिखरमिति॥ तस्याः गौर्या आ
ख्या तया तदाख्यया॥ शिखंडिनो विहितं येन यत्र तत् शिखंडिमत्॥ ७॥ विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलु ६७
प्तचंदनं॥ बबंध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति॥ ८॥ सा बाला पार्वती हारं विमुच्य मुक्त्वा हारं अपास्य
तदास्पदं वस्त्रं च अपास्य वल्कलं बबंध॥ कथंभूता सा बाला अहार्यनिश्चया॥ तपसि अहार्यो हर्तुं अशक्यो निश्च
यो यस्याः सा॥ अहार्यनिश्चया॥ कथंभूतं हारं॥ विलोलयष्टिप्रविलुप्तचंदनं॥ विलोला चंचला या यष्टिः अंगलता
तया प्रविलुप्तं चंदनं येन स तं॥ विलोलयष्टिप्रविलुप्तचंदनं॥ कथंभूतं वल्कलं॥ बालारुणबभ्रु॥ बालोऽरुणः तं
योः अरुणः सूर्यः सारथिः तद्वद्बभ्रु कपिलं तत् बालारुणबभ्रु पुनः कथंभूतं वल्कलं॥ पयोधरोत्सेधविशीर्णसंहति॥

पयोधरयोः स्तनयोः उत्सेधः उच्छ्रायः तेन विशीर्णा संहतिर्यस्य तत्॥ पयोधरोत्सेधविशीर्णसंहति॥ तदास्पदं वस्त्रं हा
राधारस्य स्थानं वस्त्रं कंचुकं॥ अपास्य कंचुकबंधस्य अर्थः॥ ८॥ यथा प्रसिद्धैर्मधुरैः शिरोरुहैः जटाभिरप्येवमभूत्तदा
ननं॥ न षट्पदश्रेणिभिरेव पंकजं सशैवलासंगमपि प्रकाशते॥ ९॥ तदाननं॥ यथा प्रसिद्धैः अलंकृतैः शिरोरुहैः॥
केशैः समधुरं मनोज्ञं॥ अपि तु जटाभिः शुशुभे तथैव च यथा॥ पंकजं कमलं केवलं षट्पदश्रेणिभिः न प्रकाशते॥ न चोस
तामसैवलासंगमपि कमलं प्रकाशते॥ सह सैवलासंगेन स्पर्शेण वर्त्तते यत् तत् सशैवलासंगं॥ ९॥ प्रतिक्षणं सा कृ
तरोमविक्रियां व्रताय मौंजीं त्रिगुणां बभार यां॥ अकारि तत्पूर्वनिबद्धया तया सरागमस्या रसनागुणास्पदं॥ १०॥ सा पा
र्वती व्रताय तपसे यां त्रिगुणां मौंजीं बभार दधार॥ कथंभूतां मौंजीं॥ प्रतिक्षणं वारं वारं॥ कृतरोमविक्रियां॥ कृता रोमवि
क्रिया यया सा॥ कृतरोमविक्रिया तां कृतरोमविक्रियां॥ मौंज्या मेखलया पार्वत्या रोमविकारो जातः॥ तत्पूर्वनिब
द्धया तया मौंज्या अस्याः पार्वत्याः रसनागुणास्पदं कांचीगुणस्थानं अकारि॥ सलोहितं अकारि॥ तत्पूर्वं तदादि तत्प्र

यं॥निबद्धा।तत्पूर्वंनिबद्धा।तयातत्पूर्वंनिबद्धया॥रसनेयं॥गुण॥तस्यआस्पदं॥स्थानंकटिप्रदेशः॥सद्रागेणव
येयत्॥नवंसरागं॥पार्वत्यामौंजीविधनेपूर्वंनकृतं॥संप्रतिमौंजीबंधनेनसुकुमारेकोमलेनितंबेरक्तताजाता॥
॥विसृष्टरागादधरान्निवर्तितःस्तनांगरागारुणिताच्चकंदुकात्॥कुशांकुरादानपरिक्षतांगुलिःकृतोक्षसूत्रप्रणयी
तयाकरः॥११॥तयापार्वत्याकरः॥अक्षसूत्रप्रणयीकृतः॥अक्षसूत्रेजपमालिकायां॥प्रणयोस्यास्तीतिअक्षसू
त्रप्रणयी॥पुनःकथंभूतःकरः॥विसृष्टरागात्अधरात्निवर्तितः॥विसृष्टःत्यक्तोरागोअलक्तकादिर्येनस
विसृष्टरागस्तस्मात्॥विसृष्टरागात्॥रक्तताअनेनेतिरागः॥अधरोओष्ठोसौकरः॥रागोत्पादनार्थंहेरकः॥आसीत्॥ ६५
क्रीडार्थंचकंदुके॥पुनःकथंभूतःकरः॥स्तनांगरागारुणिताच्चकंदुकात्॥निवर्तितः॥व्याघुटितः॥स्तनयोःअंगराग
कुंकुमादिः॥तेनअरुणितः॥तस्मात्॥स्तनांगरागारुणितात्॥पुनःकथंभूतःकरः॥कुशांकुरादानपरिक्षतांगुलिः
अंकुराणांअंकुराः॥कुशांकुराः॥तेषांआदानंग्रहणं॥तेनपरिक्षताः॥घाटिताःअंगुलयोयस्यसकुशांकुरादानपरिक्षतां

गुलिः॥११॥महार्हशय्यापरिवर्तनच्युतैःस्वकेशपुष्पैरपियास्मदूयते॥अशेतसाबाहुलतोपधायिनीनिषेदुषीस्थं
डिलएवकेवले॥१२॥यापार्वतीस्वकेशपुष्पैरपिदूयतेस्म॥अपीडयत॥स्वकेशानांपुष्पाणितैःस्वकेशपुष्पैः॥कथंभूतैःस्व
केशपुष्पैः॥महार्हशय्यापरिवर्तनच्युतैः॥महार्हाउत्कृष्टायाशय्यातस्यांयानिपरिवर्तनानि॥वलनानि॥तैःच्युतानि
पतितानितैः॥महार्हशय्यापरिवर्तनच्युतैः॥सापार्वतीकेवलेएकस्मिन्स्थंडिलेनिषेदुषी॥सतीनिषण्णाउपविष्टास
तीअशेत॥सुष्वाप॥कथंभूतासा॥बाहुलतोपधायिनी॥बाहुलतांउपदधातीतिबाहुलतोपधायिनी॥१२॥पुन
र्ग्रहीतुंनियमस्थयातयाद्वयेऽपिनिक्षेपइवार्पितंद्वयं॥लतासुतन्वीषुविलासचेष्टितंविलोलदृष्टंहरिणांगनासु
च॥१३॥नियमस्थयाव्रतस्थयातयाद्वयेषुद्वयंनिक्षेपइव॥स्थापनिकाइवअर्पितंदत्तं॥किंकर्तुं॥पुनःग्रहीतुं॥
वेतद्गुणायग्रहीतुं॥आदातुं॥केषुकेषु॥किमित्याह॥तन्वीषुकोमलासुलतासुविलासचेष्टितंअर्पितं॥विलासस्य
विभ्रमस्यपरिभ्रमणस्यचेष्टितं॥विलासचेष्टितं॥चपुनःहरिणांगनासुविलोलदृष्टिःचलदृष्टिः॥अर्पिता॥१

तंड्डितासाद्वयमेव हस्तकानूषटस्तनप्रस्रवनैर्यद्वर्द्धयत् अनुरोपियेषां प्रथमामजन्मनां पुत्रवात्सल्यम पाकरिष्य
१४॥ सा पार्वती अतंड्रिता अनलसा सती स्वयमेव हस्तकानूषार्द्धयत् अल्पाः हस्ता हस्तकाः सान्परस्तकानू॥ के
स्तनप्रस्रवनेः॥ घटावेवस्तनौ घटस्तनौ॥ तयोः प्रस्रवनानि॥ तैः घटस्तनप्रस्रवनैः॥ पुनः सुघटस्तनप्रस्रवनेन यो
ने॥ गुहोपि कार्त्तिकेयोपि प्रथमाजन्मनां येषां घटानां वृक्षाणां पुत्रवात्सल्यं नप्याकरिष्यति॥ नजिराकरि
ष्यति॥ प्रथममादौ जन्म येषां ते प्रथमजन्मानस्तेषां आत्मजन्मनां॥ पुत्रस्य वात्सल्यं तत्पुत्रवात्सल्यं॥ १४॥ अरण्य ६९
वीजांजलिदानलालितास्तथा च तस्यां हरिणा विसश्वसुः॥ यथा यदीयैर्नयनैः कुतूहलात्पुरःसखीनाममिमीत लो
चने॥ १५॥ हरिणाः तस्यां पार्वत्यां तथा विसश्वसुः विश्वासं प्रापुः कथं नु वा हरिणाः अरण्यबीजांजलिदानला
लिताः॥ अरण्यबीजानि नीवाराणि दिव्रीहयः ते षां अंजलयः तेषां दानं तेन लालिताः पोषिताः॥ अरण्य॰ यथा
सा पार्वती तदीयैर्नयनैः कुतूहलात् सखीनां लोचने पुरः अग्रतः अमिमीत तेषां मृगाणां इमानि तदीयानि॥

तदीयैः॥ माङ्माने॥ मास्यसनी॥ तन॥ अप्याद्यादि॥ अडागमः॥ अच्चिः॥ अदादेः॥ जुहोत्यादीनां सार्वधातुके॥ माद्विर्वच
चनं॥ भृञामित्॥ अभ्यासस्य इकारः॥ मान्त्रमीद्॥ माङ् मितु॥ मितस्य ईकारः॥ अनादावदः॥ मा ईमी॥ अमिमीत सिद्धं॥
सखीनां जयाविजयादीनां हरनेत्रयोः प्रमाणं प्रमाणमकरोदित्यर्थः॥ कस्य नेत्राणि विशालानि स्त्रीजनस्य अ
श्व वा मृगस्य॥ अत्र सखीनेत्राणां मानं नत्वात्मनः॥ तपस्याया अनौचित्यात्॥ १५॥ कृताभिषेकां हुतजातवेदसां त्व
गुत्तरासंगमतीमधीतिनीं॥ दिदृक्षवस्तामृषयोभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते॥ १६॥ तां गौरीं दिदृक्षवः द्र
ष्टुमिच्छवः ऋषयो मुनयः अभ्युपागमन् आययुः॥ कीदृशीं तां॥ गौरीं॥ कृताभिषेकां कृतः अभिषेकः स्नानं यया सा कृता भि
षेका तां कृताभिषेकां॥ पुनः कीदृशीं तां गौरीं हुतजातवेदसां हुतः जातवेदा यया सा हुतजातवेदाः तां हुतज
तवेदसं॥ कृताग्निकार्यां॥ पुनः कीदृशीं तां गौरीं त्वगुत्तरासंगमतीं॥ तां त्वगुत्तरासंगमतीं॥ अथवा उत्तरासंगं विद्य
ते यस्याः सा उत्तरासंगमती॥ त्वचा उत्तरासंगवती॥ त्वगुत्तरासंगवती तां त्वगुत्तरासंगवतीं॥ पुनः कीदृशीं तां॥ गौरीं

अधीतिनीं॥ अधीतं विद्यते यस्याः सा अधीतिनी तां अधीतिनीं॥ क तच्चाश्रमं॥ चिरंतनाः कश्यप्यस्तां द्रष्टुं कथं अध्ययुः
...हाउ जनैः लोकैः धर्म हेतुः वयो न समीक्ष्यते॥ वन्दिवार्यते॥ तदुक्तं॥ न तेन वृद्धो भवति येन...पलितं शिरः॥ यो
वाप्य धीयानः तं देवाः स्थविरं विदुः॥ १॥ १६॥ विरोधिसत्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि॥ नवोटजा
तरसंभृतानलं तपोवनं तच्च बभूव पावनं॥ १७॥ तत् देवी तपोवनं च पुनः पावनं बभूव॥ किंविशिष्टं तपोवनं॥
विरोधिसत्वोज्झितपूर्वमत्सरं॥ विरोधीनि यानि सत्वानि तैरुज्झितस्त्यक्तः पूर्वमत्सरो वैरं यत्र तत्॥ विरोधिसत्वोज्झितपूर्वम ७०
त्सरं॥ अहिमयूरादिभिः विरोधिभिः॥ श्येनकपोतादिभिः॥ विरोधिभिः॥ गोव्याघ्रादिभिः॥ विरोधिभिः॥ सर्वे स्वकं वैरं त
त्यक्तवन्तः॥ यदुक्तं॥ तत्संनिधौ वैरत्यागः इति॥ पुनः किंविशिष्टं देवीतपोवनं॥ द्रुमैरभीष्टप्रसवार्चितातिथि॥ इष्टप्रसवैः
पुष्पफलैः अर्चिताः पूजिताः अतिथयो यत्र तत्॥ इष्टप्रसवार्चितातिथि॥ पुनः किंविशिष्टं देवीतपोवनं नवोटजा
भ्यंतरसंभृतानलं॥ नवोटजस्य अभ्यंतरे पर्णगृहमध्ये संभृतः संचितः अनलो अग्निर्यत्र तत्॥ नवोटजाभ्यंतरसंभृता

नलं॥ १७॥ यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस कांक्षितं॥ यदा तदा पेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्र
चक्रमे॥ १८॥ सा पार्वती यदा तावता परिमितेन पूर्वेन तपःसमाधिना प्रथमतपःसमाधिना एवं यत्तपःसमाधिः कांक्षि
तं फलं लब्धुं प्राप्यं न अमंस्त न अज्ञासीत्॥ पूर्वतपःसमाधिः तेन पूर्वतःसमाधिना॥ सा पार्वती तदा महत्तुतपश्च
रितुं प्रचक्रमे प्रारेभे॥ किं कृत्वा॥ स्वशरीरमार्दवं अनपेक्ष्य॥ स्वशरीरमार्दवं सौकुमार्यं स्वशरीरमार्दवं॥ १८॥ क्लमं य
यौ कंदुकलीलयापि या तया मुनीनां तं यां मुनीनां च रिते व्यगाह्यत॥ ध्रुवं वपुः कांचनपद्मनिर्मितं मृदु प्रकृत्या
च ससारमेव च॥ १९॥ सा पार्वती कंदुककलीलया पि क्लमं खेदं ययौ॥ गता॥ कंदुककलीलया तया॥ कंदुककलीलया।
पि पार्वत्या मुनीनां ऋषीणां चरितं व्यगाह्यत॥ अकारि॥ ध्रुवं निश्चितं॥ काञ्चनपद्मनिर्मितं वपुः प्रकृत्या स्वभावेन मृदु
वैनावेन मृदुर्भवति॥ च पुनः ससारं भवति॥ सुदृढसारेण वर्तते यत्तु न तु ससारं दृढं॥ कनकवात्॥ ससारो पद्मवात्॥ मृ
कोमलं॥ १९॥ शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा॥ विजित्य नेत्रप्रतिघातिनीं प्रभां अनन्यदृष्टि
न

...तारमैरूत॥२०॥सासुमध्यमापार्वती।चन्तुर्लोदविर्तुजां अमीनां मध्यगतासती।मध्यस्थासतीसवितारसूर्यंप्रे
...अज्ञाञ्जीहूकिंकृत्वानेत्रप्रतिघातिनींप्रत्तीविजित्यानेत्रयोःप्रतिघातिनींतांनेत्रप्रतिघातिनीं।कस्तुचौ।आ
...थंत्वतासासुमध्यमा।अनन्यदृष्टिः।नअन्यस्मिन्दृष्टिर्यस्याःसा अनन्यदृष्टिः॥२०॥तथापितस्मैसवितुर्गभस्ति
...मुखंतदीयंकमलश्रियंदधौ॥अपांगयोःकेवलमस्यदीर्घयोःशनैःशनैःश्यामिकयाकृतंपदं॥२१॥तदीयंमुखं
तथापिकमलश्रियंदधौ॥खकार।कथंत्वतंमुखं।सवितुःसूर्यस्यगभस्तिलिःकिरणैःतप्तं॥केवलंअस्यमुखस्यदीर्घ ७१
योःअपांगयोर्नेत्रप्रांतयोःश्यामिकया।कालिमापदंस्थानंकृतं॥अतिसौकुमार्यात्॥२१॥अयाचितोपस्थितमंबु
केवलंरसात्मकस्योडुपतेश्चरश्मयः॥बभूवतस्याःकिलपारणाविधिर्नवृक्षवृत्तिव्यतिरिक्तसाधनः॥२२॥तस्याः
पार्वत्याअंबुकेवलंअयाचितोपस्थितंबभूव॥आचितंचनतूपस्थितंच।अयाचितोपस्थितं॥चडुनः रसात्म
कस्यउडुपतेरश्मयः।अयाचितोपस्थिताःबभूवुः॥रसआत्मायस्यासौरसात्मा॥कः तस्यरसात्मकस्य।तस्याःपार्व

...त्याःपारणाविधिःवृक्षवृत्तिव्यतिरिक्तसाधनोनबभूव।किंतुवृक्षादिजातंकंदफलादिसाधनोबभूव॥पारणायाःविधिः॥वृक्ष
वृत्तेर्व्यतिरिक्तंभिन्नंसाधनंकरणंयस्यसवृक्षवृत्तिव्यतिरिक्तसाधनः॥वृक्षवृत्तेर्व्यतिरिक्तंअन्नंसाधनंनबभूव।किंतु
वृक्षादिजातकंदफलादिसाधनंबभूव॥इतितात्पर्यार्थः॥२२॥निकामतप्ताविविधेनवह्निनानभश्चरेणेंधनसंभृतेनच॥
तपात्ययेवारिभिरुक्षितानवैर्भुवासहोष्माणममुंचदूर्ध्वगं॥२३॥सापार्वतीभुवःपृथिव्यासहऊर्ध्वगंकष्मा।णंवाष्पंअमुं
चत।कथंभूतासापार्वती।द्विविधेनवह्निनानिकामंअत्यर्थंतप्ता।कथंद्विविधेनवह्निना।तदाह।एकेननभश्चरेणद्वि
तीयेनइंधनेनसंभृतेन।नभसिचरतीतिनभश्चरः।तेननभश्चरेणसूर्येण।इंधनेनसंभृतः।तेनइंधनसंभृतेन।कथंभू
ता पार्वती।तपात्ययेनवैर्वारिभिःउक्षिता।सिक्ता॥तपस्यग्रीष्मस्यअत्ययःनाशःतस्मिन्वर्षाकाले॥२३॥स्थि
ताःक्षणंपक्ष्मसुताडिताधराःपयोधरोत्सेधनिपातचूर्णिताः॥वलीषुतस्याःस्खलिताःप्रपेदिरेचिरेणनाभिं
प्रथमोदविंदवः॥२४॥प्रथमोदविंदवःतस्यानाभिंचिरेणप्रपेदिरे॥प्राप्ताः॥उदकस्यबिंदवः।उदबिंदवः।प्रथमाश्च

दविंदवश्च प्रथमोदविंदवः॥कथंभूताः प्रथमोदविंदवः॥क्षणंक्षणमात्रं।पक्ष्मसुनेत्ररोमसुस्थिताः।पुनःकथंभू
प्रथमोदविंदवः॥ताडिताधराः॥ताडितअधरोयैस्तेताडिताधराः॥पुनःकथंभूताः प्रथमोदविंदवः॥पयोधरो
निपातचूर्णिताः॥पयोधरयोःउत्सेधः पयोधरोत्सेधः तत्रनिपातःतेनचूर्णिताः॥पुनःकथंभूताः प्रथमोदविंद
वलीषु स्खलिताः क्रमात्॥२४॥शिलाशयांतामनिकेतवासिनींनिरंतरास्वंतरवातवृष्टिषु॥व्यलोकयन्नुन्मिषि
तैस्तडिन्मयैर्महातपःसाक्ष्यइवस्थिताःक्षपाः॥२५॥क्षपारात्रयः तां पार्वतीं तडिन्मयैःउन्मिषितैःअवलोकितैःव्य ७२
लोकयन्‌।ददृशुः॥कथंभूताः क्षपाः उत्प्रेक्ष्यंते।महातपःसाक्ष्येस्थिताइव।महातपसःसाक्ष्यं तस्मिन्‌महातपःसा
क्ष्ये।कथंभूतांपार्वतीं।शिलाशयां।शिलासुशेतेशिलाशयातां।शिलाशयां।पुनःकथंभूतां तां पार्वतीं।अनिके
तवासिनीं।निकेतेगृहेवसतीतिनिकेतवासिनी।ननिकेतवासिनी।अनिकेतवासिनी।अरण्यवासिनी।तांअनि
केतवासिनीं॥२५॥निनायसात्यंतहिमोत्करानिलाःसहस्यरात्रीरुदवासतत्पराः॥परस्पराक्रंदिनिचक्रवाकयोः

पुरोवियुक्तेमिथुनेकृपावती॥२६॥सापार्वतीःसहस्यरात्रीर्निनाय।निरगमयत्‌।सहस्यस्यपौषस्यरात्रयः॥ताः
सहस्यरात्रीः॥कथंभूतासापार्वती।उदवासतत्परा।उदकेवासःउदवासः।उदवासेतत्परा।सावधाना।कथंभूताः
रात्रीः।अत्यर्थंहिमोत्करानिलाः॥अत्यर्थंअतिशयेनहिमाधिकशीतानिलानतुहिनेनउत्कराःअधिकाःअनिलावाय
वोयासुताः।हिमोत्करानिलाः।अतिशयेनहिमाधिकशीतलाः।पुनःकथंभूतासापार्वती।चक्रवाकयोःमिथुनेकृपावती
कृपायुक्ता।स्वयंवियोगव्यवस्थानुभवात्‌।कथंभूतेमिथुने।परस्पराक्रंदिनि।परस्परंआक्रंदतेपरस्पराक्रंदि
तस्मिन्‌परस्पराक्रंदिनि।पुनःकथंभूतेमिथुने।पुरःअग्रेवियोगिनि।वियुक्ते॥२६॥मुखेनसापद्मसुगंधिनानि
शि।प्रवेपमानाधरपत्रशोभिना।तुषारवृष्टिक्षतपद्मसंपदांसरोजसंधानमिवाकरोदपां॥२७॥सापार्वती
मुखेनअपांपानीयानांसरोजसंधानमिवअकरोत्‌॥कमलरचनामिवअकरोत्‌।क्व।निशिरात्रौ।कथंभूतानां
अपांतुषारवृष्टिक्षतपद्मसंपदां।तुषारवृष्ट्या।क्षताःनाशंनीताःपद्मसंपदोयस्यांतासांतुषारवृष्टिक्षतपद्मसंप

पदः॥ तासोऽडुषारदृष्टिहितपद्मसंपदां॥ कथंभूते नमुखेन प्रवेपमानाधरपत्रशोभिना॥ प्रवेपमानो यो धरः स एव
पत्रं तेन शोभते॥ इति प्रवेपमानाधरपत्रशोभितेन॥२७॥ स्वयं विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया
पुनः॥ तदप्यपाकीर्णमतः प्रियंवदां वदंत्यपर्णामिति तां पुराविदः॥२८॥ पुराविदः अतः कारणात् तां पार्वतीं प्रियं-
वदां इति वदंति॥ इतीति किं॥ अपर्णामिति॥ इति न॥ प्रातिपदिकार्थमात्रवसासनात्॥ पदार्थमात्रप्रकाशनात् द्वि-
तीयायाः अभावः अतएव अपर्णा इति॥ प्रथमा सत्ताति॥ यथा क्रमादमुना रदस्तु दुष्यबोधि समः॥ अपर्णामिति मत्त-
के विसर्गयुक्ता वा॥ प्रथमार्थे द्वितीया॥ न पुनः पूर्णं यया सा॥ अपर्णा तां॥ अपर्णा तपसः परा काष्ठा सा या स्वयं ७२
विशीर्णद्रुमपर्णवृत्तिता॥ स्वयं विशीर्णानि पर्णानि यानि तानि द्रुमपर्णानि तेषां वृत्तिः वर्तनं जीवनोपायस्त-
स्या भावः स्वयं विशीर्णद्रुमपर्णवृत्तिता॥ तया पार्वत्या पुनः तदपि पर्णमपि अपाकीर्णं त्यक्तं॥२८॥ मृणा-
लिकाकोमलमेवमादिभिः व्रतैः स्वमंगं ग्लपयंत्यहर्निशं॥ तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चका-

र सा॥२९॥ सा पार्वती तपस्विनां तपः दूरं अत्यर्थं अधश्चकार न्यूनं चक्रे॥ किं कुर्वती॥ एवमादिभिः पंचाग्निप्रभृतिभि-
र्व्रतैः अहर्निशं स्वं अंगं ग्लपयंती॥ क्लेशयंती॥ कथंभूतं अंगं॥ मृणालिकापेलवं मृणालिकावत्पेलवं॥ मृणालिका-
कोमलं॥ कथंभूतं तपः कठिनैः शरीरैरुपार्जितं॥२९॥ सुरासमुद्वीक्ष्य नगेंद्रकन्यया कृतं तपः शंभुवशक्रियाक्षमं॥
ययाचिरे तं प्रणिपत्य दुःखिता पतिं पशूनां सुतमाजिहेतवे॥३०॥ सुरास्तं ईश्वरं प्रणिपत्य पशूनां पतिं मेनानाम्याः
सुतं प्रति॥ ययाचिरे॥ किं कृत्वा नगेंद्रकन्यया कृतं तपः उद्वीक्ष्य॥ कथंभूतं तपः शंभुवशक्रियाक्षमं॥ शंभोर्वश-
क्रिया शंभुवशक्रिया॥ तया वशीकृतौ न क्षमं॥ समर्थं तत्॥ शंभुवशक्रियाक्षमं॥ कस्मै ययाचिरे॥ आजिहेतवे॥
आजिः संग्रामस्य हेतुः तस्मै आजिहेतवे॥ कथंभूताः सुराः दुःखिताः॥३०॥ अथाजिनाषाढधरः प्रगल्भवाक् ज्वलन्
इव ब्रह्ममयेन तेजसा॥ विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा॥३१॥ अथ अनंतरं कश्चिज्ज-
टिलो विप्रः तपोवनं गौर्याश्रमं विवेश प्राविशत्॥ कथंभूतः जटिलः अजिनाषाढधरः॥ अजिनं च आषाढश्च अ

जिनाषाढौ चर्मपालाशदंडौ धरतीति॥ अजिनाषाढधरः॥ पालाशो दंड आषाढ इत्यमरः॥ पुनः कथंभूतः जटिलः
गल्भवाक्॥ प्रगल्भा वाक् यस्य स प्रगल्भवाक्॥ समर्थवाक्॥ उत्प्रेक्ष्यते ब्रह्ममयेन तेजसा ज्वलन्निव॥ पुनः उत्प्रेक्ष्यते॥ शा
रबद्धः प्रथमाश्रम इव॥ शरीरेण बद्धः शरीरबद्धः शरीरवान्॥ प्रथमश्चासौ आश्रमश्च प्रथमाश्रमः इव॥ ब्रह्मचर्य॥ यथाश
ब्द इवार्थे॥३०॥ तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती॥ भवंति साम्येपि निविष्टचेतसां वपुर्विशेषेष्वति
गौरवाः क्रियाः॥३१॥ आतिथेयी पार्वती बहुमानपूर्वया सपर्यया॥ तं ब्रह्मचारिणं प्रत्युदियाय॥ प्रत्युद्ययौ।
सन्मुखं बभूवेत्यर्थः॥ अतिथिभ्यो हिता॥ आतिथेयी॥ बहुमानः पूर्वो यस्याः सा बहुमानपूर्वा॥ तया बहुमानपूर्वया॥ ७४
निविष्टचेतसां॥ प्रशांतमनसां साम्येपि सति वपुर्विशेषेषु अतिगौरवाः बहुमानाः क्रियाः आसनाद्यादिकाः भवं
ति॥ निविष्टं चेतो येषां तेषां निविष्टचेतसां॥ अर्थात् धर्मे निविष्टचेतसां॥ समस्य भावः साम्यं तस्मिन् साम्ये साम्येपि
सति॥ सा पार्वती॥ तपस्विनी जटिलोपि तपस्वी अत एव साम्यं॥ वपुषां शरीराणां विशेषाः आधिक्यानि तेषु वपुर्विशेषे

षु॥ स च अजिनादियुक्तत्वात् विशेषवान् जटिलः॥ अतिथिषु लिख्यते॥ अतिथिभ्यो हिता इयं आतिथेयी॥ देवतेदमर्थे॥ ढञ्
यस्य लोपः॥ इकारलोपः॥ स्वरहीनं णकाररजाई॥ आदिस्वरस्य ञ्णिति वृद्धिः॥ आन आदाढः॥ ई प्रत्ययो ऽणगतो ईप्
निडन्तपूर्वः॥ परोक्षे अट्॥ णप्॥ इति द्विर्वचनं॥ अस्योपधायाः॥ दीर्घो वृद्धिर्नामिनिचा स्वलक्ष्मुकाइकारे दे॥ ऐअ
यंजनमः॥ अस्यासस्यावर्णे॥ व्यंजनमः॥३१॥ विधिप्रयुक्तां प्रतिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणं॥ उमां
पश्यन् ऋजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः॥३२॥ स बटुः वक्तुं भाषितुं उपचक्रमे॥ प्रारेभे॥ किं कुर्वन् उ
मां पश्यन्॥ ऋजुनैव चक्षुषा उमां पश्यन् सन्॥ किं कृत्वा॥ विधिप्रयुक्तां सत्क्रियां पूजां प्रतिगृह्य॥ विधिना प्रयुक्ता विधिप्र
युक्ता दत्ता तां विधिप्रयुक्तां॥ वटुना नाम इति प्रसिद्धौ परिश्रमं॥ विनीय॥ विश्रम्य॥ विनयनं विनीय॥ कथंभूतः सः बटुः
अनुज्झितक्रमः॥ न उज्झितस्त्यक्तः क्रमो येन स अनुज्झितक्रमः॥३२॥ अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्ना
नविधिक्षमाणि ते॥ अपि स्वशक्त्या तपसि प्रवर्तसे॥ शरीरमाद्यं खलु धर्मसाधनं॥३४॥ अयीति कोमलामंत्रणे॥ दे पा

ति।समित्कुशांक्रियार्थं होमार्थं समूलसंवर्त्तितो हे पार्वति जलान्यपि तेन वस्नानविधिक्षमाणि वर्त्तन्ते।समिधः कुशाश्च
पि कुशास्नानविधिं तस्मिन्नुक्रमाणि योग्यानि स्नानविधेः क्षमाणि वर्त्तन्ते।अयि तिकोमलालापे।पार्वति त्वं स्वशक्त्या
सि प्रवर्त्तसे।स्वस्य आत्मनः शक्तितया स्वशक्त्या।खलु यस्मात्कारणात् शरीरं आद्यं धर्मसाधनं।आदौ भवं आद्यं
मस्य साधनं धर्मसाधनं॥३४॥अयि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधां।चिरोज्झितालक्तकपाटले
न तुल्यां यदारोहति दंतवाससा॥३५॥अयीति कोमलालापे हे पार्वति।आसां वीरुधां वल्लीनां प्रवालं पल्लवं अनुबन्धि
नतो अनुबध्नाति त्यनुबन्धि।अथवा अनुबन्धो विद्यते यस्य स तत्र अनुबन्धि वर्द्धमानो पल्लवानां पुष्पफलादिकं।क
थं भूतं प्रवालं।त्वदावर्जितवारिसंभृतं त्वया आवर्जितं त्वदावर्जितं दत्तं त्वदावर्जितं वारि पानीयं येन संभृतं भृतं
त्वदावर्जितवारिसंभृतं।यत्तु प्रवालं किसलयं तव दंतवाससा।सदा तुल्यां साम्यं आरोहति।स्पृशति।दंतानां वासः
तेन वर्त्तते चा।दंतवाससा।अधरेण ओष्ठेन।कथं भूतेन दंतवाससा।चिरोज्झितालक्तकपाटलेन।चिरं चिरकाले

यावदुज्झितो त्यक्तः अलक्तकः यावकः तेन पाटलो तेन चिरोज्झितालक्तकपाटलेन।श्वेतरक्तस्तु पाटलः।इत्यमरः।यावो लक्तो
द्रुमामयः।इत्यमरः॥३५॥अयि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु।य उत्पलाक्षि प्रचलैर्विलोच
नैस्तवाक्षिसादृश्यमिव प्रयुंजते॥३६॥अयीति कोमलामंत्रणे हे पार्वति तेतव मनः हरिणेषु प्रसन्नं प्रीतिमगमत्
वर्त्तते।कथं भूतेषु हरिणेषु।करस्थदर्भप्रणयापहारिषु।करस्थदर्भान् प्रणयेन स्नेहेन अपहरंतीति तानि।करे
दर्भप्रणयापहारिणः।तेषु।करस्थदर्भप्रणयापहारिषु।हे उत्पलाक्षि कमलाक्षि।ये हरिणाः प्रचलैः चंचलैः
लोचनैर्नेत्रैः अक्षिसापत्न्यमिव प्रयुंजते॥उर्वंतो सपत्नस्य भावः सापत्न्यं स्पर्द्धा॥३६॥यदुच्यते पार्वति पापवृ
त्तये न रूपमित्यव्यभिचारितद्वचः।तथा हि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतं॥३७॥हे पार्वति रूपा
दि यत्तदुच्यते।इदं किं।रूपं यापवृत्तये न रूपं पापाचाराय न भवति यत्र आकृतिस्तत्र गुणा वसंति।तत्र वच
।तद्वारि स्वच्छं नव्यभिचरति।अन्यथा न भवतीति अव्यभिचारितं यथा स्यात्तथा हि यस्मात् हे उदारदर्शने।ते तव।शीलं

७५

त्रिलोतपस्विनामप्युपदेशतां गतां ॥ शिक्षकत्वं प्राप्तां ॥ धर्मिष्ठा अपि मुनयोपि त्वदीयं चरितं आचरणं शिक्षंते ॥ ३७ ॥
...र्णसप्तर्षिबलिप्रवाहितैस्तथानगांगैः सलिलैर्दिवस्पतेः यथास्त्वदीयैश्चरितैरनाविलैर्महीधरः पावितप्रस्त
...॥ २५ ॥ हे पार्वति गांगैः सलिलैः अयमहीधरः तथा न पावितः अगंगभायाः क्षमा निर्गोणानितैः एवमनुपावनः पावोजाने
...तिपावितः पवित्रीकृतः ॥ अथ व्याख्यायते अस्य इति पाविनः ॥ कथंभूतैर्गांगैः सलिलैः ॥ विकीर्णसप्तर्षिबलिप्रवा
...हितैः ॥ पुनः कथंभूतैः ॥ गांगैः सलिलैः दिवस्पतेः ॥ अथा अनाविलैः निर्मलैस्त्वदीयैः चरितैरयमहीधरो हिमवा ७६
न् सान्वयः पावितः सह अन्वयेन वर्त्तते यः सान्वयः ॥ सवंशः ॥ २५ ॥ अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति
भामिनि ॥ त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते ॥ २६ ॥ हे भामिनि ॥ अनेन तव चरितेन अयं धर्मः
सविशेषं उत्कृष्टं यथा भवति तथा मे मम प्रतिभाति ॥ शोभते ॥ सह विशेषेण वर्त्तते ॥ यत्र कर्मणि तत् ॥ सविशेषं (क
थंभूतो धर्मः ॥ त्रिवर्गसारः ॥ त्रिवर्गसारः त्रिवर्गस्य धर्मार्थकामस्य सारः ॥ त्रिवर्गसारः ॥ अथवा ॥ त्रयः अवनवर्गाः त्रिवर्गः

तेषां मध्ये सारः श्रेष्ठः ॥ यद्यस्मात् कारणात् त्वया एक एव धर्मः प्रतिगृह्य अंगीकृत्य सेव्यते ॥ कथंभूतया ॥ मनोनिर्विषयार्थ
कामया ॥ मनस्त्रिनिर्विषयो निर्विषयो निःसारो अर्थकामौ यस्याः सा निर्विषयार्थकामा तया निर्विषयार्थकामया ॥ ३९ ॥
प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ॥ यतः सतां सन्नतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते ॥ ४० ॥
हे सन्नतगात्रि त्वं मां परं अन्यं संप्रतिपत्तुं नार्हसि ॥ कथंभूतं मां ॥ आत्मनात्वयैव प्रयुक्तसत्कारविशेषं ॥ नत्र अन्यमु
...न प्रयुक्तः कृतः सत्कारविशेषः पूजा तिवायो यस्य स प्रयुक्तसत्कारविशेषस्तं प्रयुक्तसत्कारविशेषं ॥ हे पार्वति
...मनीषिभिः विद्वद्भिः सतां साधूनां संगतं सख्यं साप्तपदीनं उच्यते ॥ सप्तपदेषु साधु साप्तपदीनं ॥ ४० ॥ अतोत्र किंचिद्भ
...वतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ॥ अयं जनः प्रष्टुमनास्तपोधने न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४१ ॥ हे तपो
धने अतः सखित्वात् ॥ अयं जनः अत्र भवतीं इच्छां वा किंचित् ॥ प्रष्टुमनाः ॥ प्रष्टुं मनो यस्याः सा प्रष्टुमनाः ॥ किं विशिष्टां
...तीं बहुक्षमां ॥ बहुक्षमते बहुक्षमा तां बहुक्षमां कथंभूतो यं जनः द्विजातिभावादुपपन्नचापलः ॥ बहुकौतुकात्
उपपन्नचापलं यस्य सा सोउपपन्नचापलः ॥ बहुकौतुकात् ॥ अदं ... इत्यर्थः ॥ हे पार्वति चेत् यदि वरहस्यं गोप्यं

॰गोचुमर्हसि॥ प्रतीपं कथयितुं नार्हसि॥४१॥ कुले प्रसूतिः प्रथमस्य वेधसः त्रिलोकसौंदर्यमिवोदितं वपुः
॰ग्यमैश्वर्यसुखं नवं वयः तपःफलं स्यात्किमतः परं वद॥४२॥ हे पार्वति प्रथमस्य वेधसः ब्रह्मणः कुले तव प्रसूति
॰ः॥ तव वपुः त्रिलोकसौंदर्यमिव उदितं उदितं त्रिलोकस्य सौंदर्यं त्रिलोकसौंदर्यं हे पार्वति तव ऐश्वर्यसुखं अ
॰न्वेष्यं नकेनापि मृग्यते। अमृग्यं अप्रार्थनीयं। पर्वतराजपुत्रीत्वात्॥ हे पार्वति नवं वयः नवं नूतनं हे पार्वति अतः परं तपःफ
॰लं किं स्यात् अपितु न किमपि॥४२॥ भवत्यनिष्टादपि नाम दुःसहात् मनस्विनीनां प्रतिपत्तिरीदृशी॥ विचारमार्गप्रहितेन
॰चेतसा न दृश्यते तच्च कृशोदरि त्वयि॥४३॥ हे पार्वति नाम दुःसहात् दुःखदादनिष्टात् वैधव्यात् मनस्विनीनां ईदृशी प्रतिप
॰त्तिर्भवति। हे कृशोदरि मम विचारमार्गप्रहितेन चेतसा कदापि तत् वैधव्यं कर्म अपि त्वयि न दृश्यते। विचारस्य मार्गः
विवेकस्य पंथाः। विचारमार्गे प्रहितं प्रेरितं विचारमार्गप्रहितं तेन विचारमार्गप्रहितेन। विवेकपदवीनिक्षिप्तेन॥४३॥
अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे। पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्न
सूचये॥४४॥ हे पार्वति इयं आकृतिः स्वरूपं अलभ्यशोकाभिभवा न लभ्यः प्राप्यः शोकाभिभवो दुःखपराभ ७७

वो यया सा। अलभ्यशोकाभिभवा। हे सुभ्रु तव पराभिमर्शो नास्ति॥ परस्य अजितेन्द्रियस्य अभिमर्शः॥ संस्पर्शः
॰ते। अनेन तव शीलविध्वंसो न भवेदिति॥ तात्पर्यार्थः॥ हे सुभ्रु पितुः हिमाचलस्य गृहे तव विमानना कुतः यस्मा
॰त् कः कारणात् पन्नगरत्नसूचये करं संप्रसारयेत्॥ प्रेरयेत्॥ अपितु न कोपि॥ पन्नगस्य सर्पस्य रत्नं शिरोमणिः
॰स्तस्य सूचिशलाकाग्रे पन्नगरत्नसूचये॥४४॥ किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्क
॰लं। वद प्रदोषे स्फुटचंद्रतारका विभावरी यद्यरुणाय कल्पते॥४५॥ हे पार्वति त्वया यौवने वल्कलं किमिति धृतं॥
॰गृहीतं। किं कृत्वा॥ आभरणानि अपास्य॥ त्यक्त्वा॥ किंविशिष्टं वल्कलं वार्धकशोभि॥ वार्धके शोभते इति वार्धकशो
॰भि विरोधि चिह्नं। हे पार्वति प्रदोषे रात्रिमुखे स्फुटचंद्रतारका विभावरी रात्रिः यदि अरुणाय कल्पते। अरुणोद
॰ये भवति। स्फुटाः प्रकटाश्चंद्रतारका यस्यां सा स्फुटचंद्रतारका। विकसितचंद्रतारकायुक्ता रात्रिः प्रदोषका
॰ले अरुणः उदयं करोति तत्तु अनुचितं॥ यथा भवति तथा यौवने सति अलंकरणान्यपहाय वृद्धकाले

ल्कलादिधारणं त्वया। असदृशं इति वल्कलस्य रक्तत्वात्। अरुणाय कल्पते। अरुणः प्रभाते भवति। न तु रात्रि
प्रस्तरणानां चंद्रतारकोपमानां। कल्पते इत्यस्य कृपे डोनेः कर्मणि चतुर्थी। विभावरी भवति। वृद्धस्य भावो वार्द्धकं अ
वुण्।। वार्द्धमेव वार्द्धकं स्वार्थे कः।।४४।। दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः।। अथोपयं
तारं समाधिना न रत्नमन्विष्यति मृग्यते हि तत्।।४५।। हे पार्वति यदि त्वं दिवं प्रार्थयसे। तदानीं तव श्रमः वृथा
निरर्थकः। यतः देवभूमयः देवस्थानानि तव पितुः हिमालयस्य प्रदेशाः। अथ अथवा त्वं उपयन्तारं प्रार्थयसे।
ण्य यच्छतीति उपयन्ता। तं उपयन्तारं। तर्हि समाधिना अलं। श्रूयते। हि यस्मात् कारणात् रत्नं ग्राहकं। न अन्वि
ष्यति। प्रदीतारं।। न कामयति।। ---- अन्वेषयामहे। तत्तु रत्नं मृग्यते। वाञ्छ्यते। मृगादिलोकान्मृग्या। वन्ने
तिसार्वधातुके यक्।। ध्यंजनमः।।४६।। निवेदितं निश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते। न दृश्यते प्रार्थ
यितव्य एव ते न भविष्यति प्रार्थितदुर्लभः कथं।।४६।। हे पार्वति मे मम मनः संशयं गाहते। एवं निश्चितं। कथं तु तं म ७८

नः। पार्वत्याः सोष्मणा निश्वसितेन निवेदितं। हे पार्वति त्वं पतिं अभिलषसि। इति मे चेतः कथयति। हे पार्वति मया
ते तव प्रार्थयितव्यः न दृश्यते।। ते तव कोप्येव कोपि नास्ति।। प्रार्थ्यते याच्यते प्रार्थयितव्यः। वरयाय(?) च याच्यते। सा का
पि नास्ति।। इति तावत्।। हे पार्वति चेत् यदि तव कोपि प्रार्थयितव्यो न विष्यति। तदानीं तव प्रार्थितदुर्लभः कथं भ
विष्यति। अपि तु न भविष्यति। प्रार्थितेन दुर्लभः।।४६।। अहो स्थिरः कोपि तवेप्सितो युवा चिराय कर्णोत्पलशून्य
तां गते। उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिंगलाः।।४७।। हे पार्वति तव कोपि ईप्सितः वांछितः
तरुणः। अहो इति आश्चर्ये। स्थिरः कठिनः सविलं नो वर्त्मे। यः युवा तव कपोलदेशे जटाः उपेक्षते। न मानय
ति। कथंभूताः जटाः श्लथलम्बिनीः। श्लथं लम्बनं यासां ताः श्लथलम्बिन्यः। पुनः कथंभूताः जटाः कलमाग्रपिंगलाः। क
लमा शालयः। तासां अग्रं तद्वत् पिंगलाः। स्वाः कलमाग्रपिंगलाः। स्वेच्छानावात्र कपिलाः। कथंभूते कपोलदेशे
त्पलशून्यतां गते। प्राप्ते। कर्णोत्पलेन कर्णावतंसेन या शून्यता रहितत्वं तां कर्णोत्पलशून्यतां। कथं चिराय य

...वन्ति चिरकालं यथा न त्रि॥४८॥ मुनिव्रतैस्त्वामतिमात्रकर्शितां दिवाकराक्लिष्टविभूषणास्पदां॥ शशांकलेखामि
...त तो दिवा सचेतसः कस्य मनो न दूयते॥४९॥ दूयत्विति सचेतसः कस्य पुरुषस्य मनो न दूयते। न स्फुटति। मनः दूय
ते। नूकर्मकर्त्ता॥ कर्मचासौ कर्त्ता च कर्मकर्त्ता। कर्मवद्भवति। कस्य पुरुषस्य मनसा न दूयते। एतस्य स्थाने कस्य मे
...यते॥ इति ज्ञातं। किं कुर्वतः त्वां पश्यतः। कामिवां दिवा दिने ... कथंभूतां त्वां मुनिव्रतैः अतिमात्रकर्शि
...मुनीनां व्रतानि तैः मुनिव्रतैः अतिमात्रं अधिकं कर्शिता॥ तां अतिमात्रकर्शितां। पुनः कथंभूतां त्वां दिवाकराक्लि
ष्टविभूषणास्पदां। दिवाकरेण सूर्येण आक्लिष्टानि दग्धानि विभूषणानि आस्पदानि स्थानानि यस्याः सा दिवाकरा ७९
क्लिष्टविभूषणास्पदा। तां दिवाकराक्लिष्टविभूषणास्पदां। ... इति सौकुमार्यानुभवपदादे॥५०॥ अवैमि सौभाग्यमदेन
...चितं तव प्रियो यश्चतुरावलोकिनः॥ करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः॥५१॥ हे पार्व
ति। अहं तव प्रियं वल्लभं सौभाग्यमदेन वंचितं अवैमि। यः तव चक्षुषः ... लक्ष्यं वेध्यं न करोति। कथं यथा

भवति। चिरं चिरकालं यथा भवति। कथंभूतस्य चक्षुषः चतुरावलोकिनः। चतुरं अवलोक्यते चतुरावलोकि। तस्य चतु
रावलोकिनः। पुनः कथंभूतस्य चक्षुषः अरालपक्ष्मणः। अरालानि वक्राणि पक्ष्माणि यस्य तत्। अरालपक्ष्मं तस्य
...स्य अरालपक्ष्मणः॥५२॥ कियच्चिरं श्राम्यसि गौरि विद्यते ममापि पूर्वाश्रमसंचितं तपः। तदर्द्धभागेन लभस्व कांक्षितं व
रं तमिच्छामि च साधु वेदितुं॥५३॥ हे गौरि त्वं कियत् किं परिमाणं चिरं बहुकालं यावत् श्राम्यसि तपस्यसि। कियत् अधि
कं कालं तपस्यसीत्यर्थः। ... मम पूर्वाश्रमसंचितं तपः विद्यते। पूर्वाश्रमे ब्रह्मचर्ये संचितं पूर्वाश्रमसंचितं।
हे पार्वति त्वं तदर्द्धभागेन। कांक्षितं वांछितं वरं लभस्व। तस्य तपसः अर्द्धभागेन तदर्द्धभागेन। तं पुनः साधु यथा भवति तथा
...हं तं वरं वेदितुं ज्ञातुं इच्छामि॥५३॥ इति प्रविश्य ... द्विजन्मना मनोगतं सा न शशाक शंसितुं। अतो वयस्यां
परिपार्श्ववर्त्तिनीं विवर्त्तितानंजननेत्रमैक्षत॥५४॥ सा पार्वती मनोगतं ... न शशाक। न समर्था बभूव। कथं
...भाषा। द्विजन्मना बहुना इति पूर्वोक्तप्रकारेण प्रविश्य अन्तर्दूय। तपोऽर्द्धभागेन कांक्षितं फलं लभस्वेति। पार्वत्या म

सि प्रवेशं विघ्नय ॥ असि हितात्मका ॥ अथानंतरं सा पार्वती । परिराश्ववर्णिनी । निकटस्थां वयस्यां सखीं प्रेरितवत्य
स्यत् ॥ वयसा तुल्या वयस्या । तां वयस्यां । नाव सार्यं विसात्रवाध्येतु लया संनिते पिच्छः तन्न संबोधनः । कथं यथा नवति
वर्त्तिता नंजननेत्रं । यथा स्यात्तथा । विवर्त्तिते चलिते अंजने नेत्रे । अंजनरहिते नेत्रे यस्य । कर्मणि । तत् विवर्तिता
ञ्जननेत्रं ॥५१॥ सखी तदीया तमुवाच वर्णिनं निबोध साधो तव चेत्कुतूहलं । यदर्थमंभोजमिवोष्णवारणं कृतं तपः
साधनमेतया वपुः ॥५१॥ तदीया सखी तं वर्णिनं ब्रह्मचारिणं उवाच । हे साधो वेदादि । तव कुतूहलं वर्त्तते । तदानीं त्वं
निबोध शृणु । एतया पार्वत्या । यदर्थं वपुः तपः साधनं कृतं । तपसः साधनीय स्ववयस्या । अर्थं यदर्थं । कथंभूतं वपुः । उ ८०
च्यते । अंभोजं कमलं उष्णवारणमिव । यथा अंभोजं कमलं उष्णवारणं क्रियते । तथा तया पार्वत्या वपुः तपःसाध
नं कृतं । अकृष्ण धर्मवारणात् । कदर्थना यथा । तथैव वपुष्यः तपश्चरणात् कदर्थना ॥५१॥ इयं महेंद्रप्रभृतीनधि
श्रियश्चतुर्दिगीशानवमत्य मानिनी । अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति ॥५२॥ इयं मानि

नी पार्वती पिनाकपाणिं ईश्वरं पतिं आप्तुं प्राप्तुं इच्छति । किं कृत्वा । महेंद्रप्रभृतीन् चतुर्दिगीशान् अवमत्य । अवमाननं
कृत्वा अवमत्य । अवगणय्य । कथंभूतान् चतुर्दिगीशान् अधिश्रियः । अधिका श्रीः येषां ते अधिश्रियः तान् अधिश्रि
यः । कथंभूतं पिनाकपाणिं । मदनस्य निग्रहात् दमनात् अरूपहार्यं । न रूपेण हार्यः अरूपहार्यः तं अरूपहार्यं ॥५२॥
असह्यहुंकारविदर्त्तितः पुरा स्मरारिमप्राप्तमुखः शिलीमुखः । इमां हृदि व्यायतपातमक्षिणोद्विशीर्णमूर्तेरपि पुष्प
धन्विनः ॥५३॥ हे वटो पुष्पधन्वनः कामस्य शिलीमुखः बाणः इमां पार्वतीं हृदि हृदये अक्षिणोत् हिनस्ति स्म । हिणु
हिंसायां कथं यथा स्यात् । व्यायतपातं यथा स्यात्तथा । दीर्घपतनं यथा स्यात् । विशेषेण आयतः दीर्घः पातो यस्मिन् हिंसायां
कर्मणि तत् व्यायतपातं । कथंभूतस्य पुष्पधन्वनः । विशीर्णमूर्तेरपि । विशीर्णा भस्मीकृता मूर्तिर्देहो यस्य स विशीर्णमूर्तिः
स्य विशीर्णमूर्तेः ॥ मूर्तिः काठिन्यकाययोः इत्यमरः । शरीररहितस्य बाणः शत्रुं न प्राप्नोति । अतनुः । अतनु पार्वत्यां प्राप्न
तीति । अपि शब्देन आश्चर्यं । महादेवं प्रति प्रेरितः बाणः गौरीं कथं प्रासदात् इति अपिशब्देन आश्चर्यं त्यक्ताद । किंवि

...णे बाण॥ असह्यहुंकारनिवर्त्तितः॥ असह्यः सोढुमशक्यो हुंकारः तेन निवर्त्तितः पराङ्मुखीकृतः॥ पुनः कथंभूतस्त्व
र्वं स्मरारिं ईश्वरं अप्राप्तसुखः॥ न प्राप्तं सुखं यस्य सः अप्राप्तसुखः॥ ५५॥ तदा प्रभृत्युन्मदना पितुर्गृहे ललाटिकाचं
दनधूसरालका॥ न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि॥ ५६॥ हे वटो बाला पार्वती जातु कदाचि
न्निर्वृतिं सुखं न लभते स्म॥ न प्राप केष्वपि तुषारसंघातशिलातलेष्वपि तुषाराणां हिमानां संघातः मेलनं तस्य
शिलातलानि तुषारसंघातशिलातलानि तेषु तुषारसंघातशिलातलेषु किंविशिष्टा बाला तदा प्रभृति॥ बाणयात्म
स्वपितुर्हिमवतः गृहे उन्मदना॥ प्रादुर्भूतकंदर्पा॥ उत्कटः मदनो यस्याः सा उन्मदना पुनः किंविशिष्टा बाला॥ ल
लाटिकाचंदनधूसरालका॥ ललाटस्य अलंकारभूतं ललाटिका ललाटिकायां यत् चंदनं ललाटिकाचंदनं लला
...प्रतिकर्म चक्रुः॥ कस्मिन् मैत्रे मुहूर्ते॥ प्रश्ने सति॥ कासु सत्सु॥ उत्तरफाल्गुनीषु॥ शशलक्षणेन चंद्रमसा सह योगं गतासु सु
सु॥ यतयाः स्वपुत्राश्च पतिपुत्राः विद्यंते यासां पतिपुत्रवत्यः॥ ७॥ सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्न

...रागं॥ निर्नाभिकौशेयमुपात्तबाणमभ्यंगनेपथ्यमलंचकार॥ ७॥ सा पार्वती अभ्यंगनेपथ्यं अलंचकार॥ अभ्यंगस्य ने
पथ्यं वेषं अभ्यंगनेपथ्यं कथंभूतं अभ्यंगनेपथ्यं दूर्वाप्रवालैः प्रतिभिन्नरागं॥ दूर्वायाः प्रवालाः पल्लवाः तैर्दूर्वाप्रवालैः
प्रतिभिन्नरागो यस्य तत् प्रतिभिन्नरागं॥ कथंभूतैः दूर्वाप्रवालैः गौरसिद्धार्थनिवेशवद्भिः॥ गौरसिद्धार्थानां निवेशो वि
न्यासो येषु ते गौरसिद्धार्थनिवेशवंतः तैः गौरसिद्धार्थनिवेशवद्भिः॥ पुनः कथंभूतं अभ्यंगनेपथ्यं निर्नाभिकौशेयं नि
...नि घ्नता नाभिर्यत्र तत् निर्नाभिकौशेयं॥ पुनः कथंभूतं अभ्यंगनेपथ्यं उपात्तबाणं॥ उपात्तः गृहीतः बाणो यत्र तत्
...त्तबाणं॥ धृतसायकं॥ इत्यर्थः॥ एवं विधो देशकुलाचारः॥ ८॥ बभौ च संपर्कमुपेत्य बाला नवेन दीक्षाविधि
...ना॥ करेण भानोर्बहुलावसाने संधुक्ष्यमाणेव शशांकलेखा॥ ९॥ सा बाला पार्वती दीक्षाविधिसायकेन स
...परं प्राप्य बभौ॥ केन का इव॥ भानोः करेण संधुक्ष्यमाणा वर्द्धमाना शशांकलेखा इव॥ बहुलावसाने॥ बहुल
...पक्षस्य अवसानं बहुलावसानं॥ तस्मिन् बहुलावसाने॥ कृष्णपक्षप्रांते॥ कथंभूतेन दीक्षाविधिसायके

...वृतनेन॥७॥ तां रोध्रकल्केन कृतांगतैलाम् आख्यानकालेयकृतांगरागां॥ वासो वसानाम् अभिषेकयोग्यं नार्य
...श्चतुष्काभिमुखीं व्यनैषुः॥८॥ नार्यः तां पार्वतीं चतुष्काभिमुखीं व्यनैषुः॥ नयंति स्म॥ कथंभूतां तां पार्वतीं
...कल्केन। कृतांगतैलां॥ रोध्रस्य कल्कः तेन कृतं अंगतैलं यस्याः सा रोध्रकल्केन कृतांगतैला। तां। कृतांग
...नेरस्वेदस्वेदां॥ पुनः कथंभूतां तां॥ आख्यानकालेयकृतांगरागां॥ आख्यानं शुष्कं यत् कालेयं कुंकुमागरु
...कृतः अनुरागो अनुलेपनं यस्याः सा आख्यानकालेयकृतांगरागा। तां॥ पुनः कथंभूतां अभिषेकयोग्यं वासः
...नां॥ दधानां॥ अभिषेकस्नाने योग्यं॥ चतुष्कवासवेश्म ― ― ― । अनैषुः॥ णीञ् प्रापणे॥ णी नू॥ णो नः॥ नी॥ अव १०७
...नी को अट्॥ अद्भुत्॥ चादि॥ अडागमः॥ सिज् द्यतन्यां॥ सू॥ आगमः॥ सिचि परस्मैपदे स्वरांतानां॥ वृद्धिः॥ नी कौ नै॥ अनतः
सिजस्त्यस्तविदादिभ्यो भुवः॥ अनुष्ठाने उस्॥ आदेशः॥ स्वरहीनं॥ सोर्विसर्गः॥ अनैषुः सिद्धं॥ ९॥ विन्यस्तवैडूर्यशिलव
...स्मिन् अविद्धमुक्ताफलभक्तिचित्रे॥ आवर्जिताष्टापदकुंभतोयैः सतूर्यम् एनां स्नपयांबभूवुः॥१०॥ च पुनः नार्यः आ

...वर्जिताष्टापदकुंभतोयैः पुनः तां पार्वतीं सतूर्यं यथा स्यात् तथा स्नपयांबभूवुः॥ कस्मिन्॥ तस्मिन् चतुष्के॥ कथंभूते
...स्मिन्॥ विन्यस्तवैडूर्यशिलातले॥ पुनः कथंभूते चतुष्के अविद्धमुक्ताफलभक्तिचित्रे॥ अविद्धानि यानि मुक्ताफलानि ते
...षां भक्तिः रचना तया चित्रं॥ तस्मिन् मुक्ताफलभक्तिचित्रे॥ आवर्जितानि नम्रीकृतानि अष्टापदकुंभानां सुवर्णक
...शानां तोयानि॥ यस्मिन् ...तैः अष्टापदकुंभतोयैः॥ विन्यस्तवैडूर्यशिलातलानि यस्मिन् तत् विन्यस्तवैडूर्य
...लं तस्मिन्॥ विन्यस्तवैडूर्यशिलातले॥ स्नानकर्मनिवारणार्थं वैडूर्यशिलातले॥ ८॥ सा मंगलस्नानविशुद्ध
...गृहीतपत्युद्गमनीयवस्त्रा॥ निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे॥११॥ सा पार्वती रेजे शुशुभे
...ते॥ प्रफुल्लकाशा वसुधा इव॥ प्रफुल्लाः काशा यस्यां सा प्रफुल्लकाशा॥ कथंभूता सा पार्वती॥ मंगलस्नानवि
...शुद्धगात्री॥ मंगलस्नानेन विशुद्धानि गात्राणि यस्याः सा मंगलस्नानविशुद्धगात्री॥ पुनः कथंभूता सा पार्वती॥ गृही
...तपत्युद्गमनीयवस्त्रा॥ गृहीतं पत्युद्गमनीयं वस्त्रं यया सा गृहीतपत्युद्गमनीयवस्त्रा॥ परिधानीकृतधवलवस्त्रा॥

मनीयवस्त्रेति पाठः॥ पुनः कथंभूता सा॥ पार्वती॥ निवृत्तपर्जन्यजलाभिषेका निवृत्तः पर्जन्यजलस्य अ
गः सा निवृत्तपर्जन्यजलाभिषेका॥ ७॥ तस्मात्प्रदेशात् वितानवंतं तं मणिस्तंभचतुष्टयेन॥ पतिव्रताभिः
नेयं कुशासने कौतुकवेदिमध्ये॥ ८॥ तस्मात्प्रदेशात् बंधुस्त्रीभिः आयतिव्रताभिः सा पार्वती प्रतिगृह्य कौतुक
नेया॥ कथंभूतं कौतुकवेदिमध्यं वितानवंतं॥ वितानवंतं॥ वितानं विद्यते यस्यासौ वितानवान्॥ तं वितानवं
नः कथंभूतं कौतुकवेदिमध्यं मणिस्तंभचतुष्टयेन युक्तं॥ मणिस्तंभानां चतुष्टयं मणिस्तंभचतुष्टयं तेन मणिस्तं १०८
तुष्टयेन॥ पुनः कथंभूतं कौतुकवेदिमध्यं कुशासनं कुशैरचितं आसनं यत्र कुशासने॥ कौतुकवेदिमध्ये॥ ८॥ तां प्रा
मुखीं तत्र निवेश्य तन्वीं क्षणं विलंबं तत्पुरो निषण्णाः हृतार्थशोभाक्रियमाणनेत्राः प्रसाधने संनिहितेपि नार्यः॥ १३॥
नार्यस्तत्र कौतुकवेदिमध्ये तां तन्वीं पार्वतीं पराङ्मुखीं निवेश्य क्षणं क्षणमात्रं प्रलंबं ता॥ अवलंबतुः॥ कस्मात् प्रसाध
मंडनद्रव्ये संनिहिते समीपवर्तिनि सति॥ लंबि अवलंबसने॥ लंबि अतः अवलंबना लंबं॥ विशेषेण॥ नीकाशे ता अ

॥ संध्यक्षरयोरस्य तोतस्त्रोपश्च॥ प्रलंबितं सिद्धं॥ कथंभूता सा तन्वी पुरो निषण्णा॥ निषीदंति स्म इति निषण्णाः॥ पुरः अग्रे
षण्णाः॥ पुनः कथंभूता सा तन्वी॥ हृतार्थशोभाक्रियमाणनेत्रा॥ हृतार्था प्राप्तार्था याः शोभा हृतार्थशोभा॥ अविना
शोभिनी शोभा॥ तया आह्रियमाणे विलोक्यमाने नेत्रे यस्याः सा तादृशी हृतार्थशोभाक्रियमाणनेत्रा॥ ९॥ धूपोष्मणा त्याजित
मार्द्रभावं केशांतमंतःकुसुमं तदीयं॥ पर्याक्षिपत्काचिदुदारबंधं दूर्वावता पांडुमधूकदाम्ना॥ १४॥ काचित्
तदीयं केशांतं पांडुमधूकदाम्ना पर्याक्षिपत्॥ बबंध॥ पांडुमधूकस्य दाम तेन पांडुमधूकदाम्ना॥ कथंभूतं तदी
तं॥ धूपोष्मणा॥ आर्द्रभावं त्याजितं॥ त्याज्यते स्म इति त्याजितः॥ तं त्याजितं॥ पुनः कथंभूतं तदीयं अंतः
अंतःकुसुमं॥ अंतर्मध्ये कुसुमानि यस्य स अंतःकुसुमः तं अंतःकुसुमं॥ पुनः कथंभूतं उदारबंधं उदार
बंधो यस्य स उदारबंधः तं उदारबंधं॥ कथंभूतेन पांडुमधूकदाम्ना॥ दूर्वावता॥ दूर्वा विद्यते यस्य तत् दूर्वावत् तेन
॥ आसक्तकृष्णागुरुचंदनस्या गोरोचनापत्रविभंगमंगं॥ साचक्रवाकांकितसैकतायास्त्रिस्रोतसः कां

क्रो॥ ध॥ नार्यम् अस्याः पार्वत्याः अंगं गोरोचनापत्रविभंगं च कुरु॥ गोरोचनायाः पत्रविभंगः रचनाविशेषः यत्र तत् तु
त्रविभंगं॥ सा पार्वती त्रिस्रोतसः गंगायाः कांतिम् अतीत्य तस्थौ॥ किंविशिष्टायाः त्रिस्रोतसः॥ गंगायाः॥ चक्रवाको
यायाः॥ चक्रवाकैः अंकितं चिह्नितं सैकतं यस्याः सा चक्रवाकांकितसैकता तस्याः चक्रवाकांकितसैकतायाः॥
अंगं॥ आसक्तश्लक्ष्णागरु॥ आसक्तः लग्नः श्लक्ष्णः अगरुः यत्र तत् तु॥ आसक्तश्लक्ष्णागरु॥ ८॥ लग्नद्विरेफं परिचि
ह्नं समेघलेखं शशिनश्च बिंबं॥ तदाननश्रीः अलकैः प्रसिद्धैः चिच्छेद सादृश्यकथाप्रसंगं॥ ९॥ तदाननश्रीः प्र
प्रसाधितैः अलकैः सादृश्यकथाप्रसंगं विच्छेद॥ सदृशा॥ स्वभावः॥ सादृश्यं सादृश्यस्य कथा तस्याः प्रसंगः १०९
अवसरः॥ तं सादृश्यकथाप्रसंगं॥ किं कृत्वा॥ लग्नद्विरेफं पद्मं परिच्छिद्य ज्ञात्वा॥ लग्नाः द्विरेफाः भ्रमराः यत्र तत् लग्न
द्विरेफं॥ पुनः किं वा॥ समेघलेखं शशिनश्चेदस्य बिंबं परिच्छिद्य ज्ञात्वा॥ सह मेघलेखया वर्तते समेघलेखं॥ क॥
सार्पिता रोध्रकषायरूक्षे गोरोचनाभेदनितांतगौरे॥ तस्याः कपोले परभागलाभात् बबंध चक्षूंषि यवप्ररो

संतानः कल्पवृक्षश्च मंदारः पारिजातकः। पंचैते देवतरवः पुंसि वा हरितः स्त्रियां॥ श्री
॥ यवप्ररोहः परभागलाभात् शोभालाभात् तु॥ तस्याः पार्वत्याः कपोले चक्षूंषि बबंध॥ लोकस्य नेत्राणि बबंध॥ विष
तरान्यवर्णयत्॥ किंविशिष्टः यवप्ररोहः॥ कर्णार्पितः॥ कर्णयोः अर्पितः॥ कथंभूते कपोले॥ रोध्रकषायरूक्षे॥ रोध्रक
षायेण रोध्रकल्केन रूक्षः॥ विशदः निर्मलः॥ तस्मिन् रोध्रकषायरूक्षे॥ पुनः कथंभूते कपोले॥ गोरोचनाभेदनितांतगौ
गोरोचनायाः भेदः रंगः॥ तद्वत् गौरः तस्मिन् गोरोचनाभेदनितांतगौरे॥ ८॥ लेखा विलासैश्च विभक्तगात्र्याः किंचि
च्छिष्टविसृष्टरागः॥ कामप्यतिरख्यां स्फुरितैः अपुष्यद् आसन्नलावण्यफलोऽधरोष्ठः॥ १०॥ च पुनः सुविभक्तगात्र्याः
अधरोष्ठः स्फुरितैः कामपि अनिर्वचनीयां अतिरख्यां शोभां अपुष्यत्॥ अवर्धयत्॥ कथंभूतः अधरोष्ठः
लेखया विलासैः॥ विलासीकृतः॥ यौवनेन सुविभक्तानि गात्राणि यस्याः सा सुविभक्तगात्री तस्याः सु
त्र्याः॥ पुनः कथंभूतः अधरोष्ठः किंचित्समुच्छिष्टविसृष्टरागः॥ किं तु थोकं यथा भवति तथा समुच्छिष्टेन
मधूच्छिष्टं मक्षिकानां उच्छिष्टं तेन समुच्छिष्टेन॥ मदनेन विसृष्टः मिलितः रागः यस्य सः समुच्छिष्टविसृष्टरागः॥ पुनः कं

...प्ररोहः॥ आसन्नलावण्यफलः॥ आसन्नं लावण्यफलं यस्य स आसन्नलावण्यफलः॥ ॥ प्रत्यक्षं शिरश्चंद्र
...नेस्पृशेति सख्या परिहासपूर्वं॥ सा रंजयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान॥१९॥ सा पार्व
...तीमालया तां सखीं जघान॥ कथंभूता सती निर्वचनं यथा स्यात्तथेति॥ निर्गतं वचनं यत्र कर्मणि तत्तु नि
...र्वचनं तया सख्या॥ परिहासपूर्वं यथा स्यात् तथा चरणौ रंजयित्वा॥ इति कृताशीः इतीति किं॥ अनेन चर
...णेन पत्युः शिरश्चंद्रकलां स्पृशेति॥ शिरसि स्थाचंद्रस्य कला शिरश्चंद्रकला॥ तां शिरश्चंद्रकलां परिहासपूर्वं य ११०
...र्मणि तत्तु॥ परिहासपूर्वं॥ रंजयित्वा॥ कृताशीः यस्याः सा कृताशीः॥ ॥ तस्याः सुजातोत्पलपत्रकांते प्रसाधि
...तिर्नयने समीक्ष्य॥ न चक्षुषोः कांतिविशेषबुद्ध्या कालांजनं मंगलमित्युपात्तं॥२०॥ प्रसाधिका निर्मंडनकारि
...णीति सख्याः पार्वत्या नयने समीक्ष्य कालांजनं इति उपात्तं॥ इतीति किं॥ मंगलमिति॥ चक्षुषोः कांतिविशेषबुद्ध्या
...उपात्तं॥ न गृहीतं॥ कांतिश्च विशेषश्च कांतिविशेषौ तयोर्बुद्धिः तया कांतिविशेषबुद्ध्या॥ कथंभूते नयने सुजातोत्प

...र्वं लपत्रकांते॥ सुजातानि यानि उत्पलपत्राणि तद्वत्कांते सुजातोत्पलपत्रकांते। ते। सुजातोत्पलपत्रकांते॥ ॥ सा
...तसंनवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा॥ सरिद्विहंगैरिव लीयमानैरामुच्यमानाभरणा चकासे॥२१॥
...सा पार्वती आमुच्यमानाभरणा सती चकासे॥ शुशुभे॥ आमुच्यमानानि बध्यमानानि आभरणानि यस्याः सा आ
...मुच्यमानाभरणा॥ कैः केव॥ संनवद्भिः कुसुमैर्लतेव॥ संनवंतीति संनवंति तैः संनवद्भिः॥ पुनः कैः केव॥ लीयमा
...नैः सरिद्विहंगैः चक्रवाकैः इव॥ लीयंते लीयमाना तैः लीयमानैः श्लिष्यद्भिः सरस्वती इव नदी वा पुनः कैः केव।
...उद्यद्भिः ज्योतिर्भिः त्रियामा इव रात्रिरिव॥ उद्यंतीति उद्यंति तैः उद्यद्भिः॥ ॥ आत्मानमालोक्य च शोभमान
...मादर्शबिंबे स्तिमितायताक्षी॥ हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः॥२२॥ सा पार्वती॥ ह
...रोपयाने त्वरिता सती बभूव॥ किं कृत्वा॥ आदर्शबिंबे मुकुरमंडले आत्मानं शोभमानं॥ अवलोक्य॥ कथंभूता
...स्तिमितायताक्षी॥ स्तिमिते निश्चले आयते दीर्घे अक्षिणी यस्याः सा स्तिमितायताक्षी॥ हरस्य उपायने

...नेतस्मिन्नुदरोपागमने॥ ह्रियस्मात्कारणात्स्त्रीणां वेषः प्रियालोकफलः॥ प्रियस्य वल्लभस्य आलोकः
...वफलं यस्य स प्रियालोकफलः॥ ८॥ अथांगुलिभ्यां हरितालमार्द्रमंगल्यमादाय मनःशिलां च॥ क
...कामलदंतपत्रं माता तदीयं मुखमुन्नमय्य॥ ९॥ उमास्तनोद्भेदमनुप्रवृद्धो मनोरथो यः प्रथमं बभूव॥ तमे
...द्विजः कथंचिद्विवाहदीक्षातिलकं चकार॥ १०॥ युग्मं॥ यः मनोरथः प्रथमं आदावेव बभूव॥ कथंभूतो मनोरथः
...स्तनोद्भेदं अनुलक्षीकृत्य वृद्धः॥ प्रवृद्धः॥ अनुशब्दः तृतीयार्थे उमास्तनोद्भेदसहप्रवृद्धः इत्यर्थः॥ उमास्तनोद्भे
...त्र पदे अनुयोगे द्वितीया॥ कर्मप्रवचनीयैर्युक्त इति सूत्रबलात्॥ उमायाः स्तनौ तयोः उद्भेदः उद्गमः उमास्तनोद्भे
...न् उमास्तनोद्भेदं॥ ७॥ मेना माता तमेव मनोरथं कथंचित् क्लेशेन विवाहदीक्षां यस्याः आनंदाश्रुभिः सह दृष्टिर्बाधा॥ दु
...कन्यायाः विवाहदीक्षातिलकं चकार॥ विवाहदीक्षायास्तिलकं विवाहदीक्षातिलकं॥ किं कृत्वा॥ अथ अनंतरं॥
...अंगुलिभ्यां आर्द्रं हरितालं आदाय गृहीत्वा॥ च पुनः किं कृत्वा॥ तदीयं मुखं उन्नमय्य उन्नमनं पूर्वं उन्नमय्य तस्याः

...र्वत्याः इदं तदीयं॥ कथंभूतं मुखं॥ कर्णावसक्तामलदंतपत्रं॥ कर्णयोः अवसक्तं लग्नं दंतपत्रं हस्तीदशनघटितादंतपत्र
...तापत्रं तत्॥ कर्णावसक्तामलदंतपत्रं॥ ८॥ युग्मं॥ ८॥ बबंध चास्राकुलदृष्टिरस्याः स्थानांतरे कल्पितसंनिवेशं॥
...र्व्यंगुलीनिःप्रतिसार्यमाणमूर्णामयं कौतुकहस्तसूत्रं॥ ११॥ च पुनः सा मेना अस्याः पार्वत्याः ऊर्णामयं कौतुकहस्त
...म् बबंध॥ कौतुकस्य विवाहस्य हस्तसूत्रं कौतुकहस्तसूत्रं॥ कथंभूता सा॥ मेना॥ अस्राकुलदृष्टिः॥ अस्रैः॥ आकुला दृष्टिर्यस्याः
...सा अस्राकुलदृष्टिः कथंभूतं कौतुकहस्तसूत्रं॥ स्थानांतरकल्पितसंनिवेशं॥ ७ कस्मात् स्थानात् अन्यस्थानं स्था
...तस्मिन् स्थानांतरे॥ कल्पितः संनिवेशो यस्य तत्॥ कल्पितसंनिवेशं रचितस्थानं इत्यर्थः॥ पुनः कथंभूतं
...धात्र्यंगुलीभिः प्रतिसार्यमाणं॥ धात्र्याः अंगुल्यस्ताभिः प्रतिसार्यते प्रतिसार्यमाणं॥ ऊर्णाभिः निर्वर्तितं
...ऊर्णानां विकारः ऊर्णामयं॥ ८॥ क्षीरोदवेलेव सफेनपुंजा पर्याप्तचंद्रेव शरत्त्रियामा॥ नवं नवं क्षौमनिवा
...सानवं दूत्याबसो दर्पणमादधाना॥ १२॥ सा पार्वती अयं पुनरपि दर्पणं आदधाना॥ मनीबभौ॥ कथंभूता सा पार्वती

[…]क्षौमनिवासिनी॥ नवं नवं इव तननं इव तननं क्षौमं पट्टवस्त्रं वसु शीलं यस्याः सा क्षौमनिवासिनी उत्प्रेक्षते। सफेनपुं
[…]वेलेव। सद्यः फेनपुंजेन वर्त्तते या सा सफेनपुंजा॥ क्षीरोदस्य समुद्रस्य वेला क्षीरोदवेला॥ पुनरुत्प्रेक्षते। पर्याप्त
[…]रच्छ्रियामेव॥ पर्याप्तश्चंद्रो यस्याः सा पर्याप्तचंद्रा। शारदः श्रियामेव शरच्छ्रियामेव॥ ८॥ तामर्चिताभ्यः कुलदेवता
[…]कुलप्रतिष्ठां प्रणमय्य मेना॥ अकारयत्कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनां॥ ८०॥ माता मेना तां पार्वतीं कु
[…]वताभ्यः प्रणमय्य क्रमेण सतीनां साध्वीनां पादग्रहणं अकारयत्॥ पादवंदनं अचीकरत्॥ प्रणमनं पूर्वं प्रणमय्य।
[…]भूताभ्यः कुलदेवताभ्यः। अर्चिताभ्यः पूजिताभ्यः॥ कथंभूतां पार्वतीं कुलप्रतिष्ठां। कुले प्रतिष्ठा कीर्त्तिर्यस्याः सा ११२
कुलप्रतिष्ठा तां। कुलप्रतिष्ठां कीर्त्तिकरीं। कथंभूता मेना कारयितव्यदक्षा। कार्यते कारयितव्यं। तत्र दक्षा कारयि
तव्यदक्षा। णमप्रह्वत्वे शब्दे णमू णोनः नमु प्रह्वत्वे॥ प्रणमति कश्चित् तमन्यं प्रयुंक्ते। अतो ऽदेताविह॥ इत्यकारस्य
[…]॥ प्रणामि। प्रमेमनं पूर्वं प्रणमय्य। एककर्तृकयोः पूर्वकाले क्त्वा॥ समासे ल्यावेत्यनञ्॥ ल्यो यश॥ नाम्यंतयोर्धातु
ण

[…]विकरणयोर्गुणः॥ गुश्रवू॥ ल्येजनम॥ प्रणमय्य सिद्धं॥ ८१॥ अखंडितं प्रेम लभस्व सिंदं पत्युरित्युच्यते ताभिरुमा
[…]स्म नम्रा॥ तया तु तस्यार्द्धशरीरभाजा पश्चात्कृता बंधुजनाशिषोपि॥ ८२॥ ताभिः स्त्रीभिः नम्रा उमा इति उच्यते स्म
[…]ईति किं। पत्युः अखंडितं प्रेम लभस्व॥ इति॥ तया पार्वत्या तस्य ईश्वरस्य अर्द्धशरीरभाजा॥ बंधुजना॥ शिष्यो विप
[…]श्चात्कृता॥ बंधुजनानां आशिषः बंधुजनाशिषः॥ ८॥ इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा॥ सभ्यः स
[…]भां सुहृदास्थितायां तस्थौ वृषांकागमनप्रतीक्षः॥ ८४॥ कृती अद्रिः तस्याः पार्वत्याः अशेषं कृत्यं अशेषयित्वा सभायां
[…]भायां तस्थौ॥ अशेषं क्रियते॥ अशेषं करोति॥ अशे॥ तदाचष्टे इत्यर्थः इवर्णेव अकोलोप। अशे। णि। अशेषयं ने ष
[…]षयित्वा॥ एककर्तृक क्त्वा प्रत्ययो वेडागमो ऽसार्वधातुकस्यादिड्वंजनादेर्यकारादेरिति इडागमः। नाम्यंतयोः ए
[…]शेषयित्वा सिद्धं। कथंभूतः अद्रिः वृषांकागमनप्रतीक्षः। वृषांकस्य ईश्वरस्य आगमनं प्रतीक्षते वृषांका
[…]गमनप्रतीक्षः। कथंभूतं कृत्यं। इच्छाविभूत्योः अनुरूपं योग्यं। इच्छा च विभूतिश्च इच्छाविभूती तयोः इच्छावि

॥ त्तिलाय विषययोः॥ कथंभूतः अद्रिः स्वच्छः सत्तायां साधुः॥ कथंभूतायां सतायां शुद्धदाक्षितायां॥ शुद्धद्रिः अ
कनंदाक्षिता॥ तस्यां शुद्धदाक्षितायां॥ ८॥ तावद्भरस्यापि कुबेरशैलान स्वर्वपाणिग्रहणानुरूपं॥ प्रसाधनं मह
तिर्यस्त्रिपुरस्यास्मरशासनस्य॥ ३॥ तावत्प्रथमं प्रसिद्धिस्या निर्मातृत्रिः सयत्नान्निस्मरशासनस्य स्तवस्य पुर
ये प्रसाधनं मेदनी न्यस्तं॥ आद्रियं ते आद्रितास्मा॥ आहता निः स्मरस्य कामस्य शासनः॥ स्मरशासनस्तस्य॥
शासनस्य॥ क॥ कुबेरशैले कैलासे॥ कथंभूतं प्रसाधनं तत्स्वर्वपाणिग्रहणानुरूपं॥ तत्र स्वर्वं यस्य तत्र स्वर्वा तत्स्वर्व
पाणिग्रहणं॥ तस्य अनुरूपं योग्यं॥ तत्र तत्स्वर्वपाणिग्रहणानुरूपं॥ ८॥ तत्कौरवात्मंगलमंडनश्रीः सापस्पृशो केवल ११७
वरेण॥ सप्रववेषः परिणेतुरिष्टं तावांतरं तस्य विलोः प्रपेदे॥ ३१॥ ईश्वरेण कर्ता॥ तत्कौरवात्॥ तासां मातॄणां गौरवं तत्कौ
॥ तस्मात्कौरवात्॥ सा मंगलमंडलश्रीः॥ केवलं पस्पृशो॥ अनिनंदिता॥ तस्य विनोः ईश्वरस्य सप्रववेषः॥ इष्टं वल्लभं न
तरं प्रपेदे॥ कथंभूतस्य तस्य विनो॥ परिणेतुः आपरिणयतीति परिणेता॥ तस्य परिणेतुः॥ एकस्मात् अन्योत्तावः॥ साव
ए

वांतरः॥ तेनावांतरं॥ स्पर्शसंस्पर्शिनो॥ स्पृशु॥ परोक्षाको॥ पु॥ वचपरो॥ स्पृशु द्विर्वचनं॥ अलामस्यादिः॥ स्वलोपः॥ असित्यरोध
द्विर्वचनका आदिसकारलोपः॥ पर होः हवर्णस्याकारः॥ पा॥ पस्पृशे॥ सिद्धं॥ ८॥ बभूव तस्मैव सितांगरागकपालम
लशेखरश्रीः॥ उपांतनागेश्वररोचनांकोगजाजिनच्छेदबहुकूलतावा॥ ३२॥ तस्मै व सितांगरागो बभूव॥ कपालम
अमलशेखरश्रीर्बभूव॥ अमलाशेषरस्य सुकल्पश्री॥ अमलशेखरश्रीः॥ चक्षुनः उपांतनागेश्वररोचनांको बभूव
तायां अंकः रोचनांकः॥ गजाजिनस्य गजचर्मणः॥ दुकूलता बभूव॥ दुकूलस्य पट्टकूलस्य भावदुकूलता॥ वः सि
शो अंगरागस्य सितांगरागः॥ श्वेतचंदनानुलेपनं॥ ८॥ शंखांतरज्योतिः विलोचनेयदंतनिर्विष्टामलपिंगतारं॥ सांनि
हरितालमयस्याद्देवजातं तिलकक्रियायां॥ ३३॥ यत्तु विलोचनं शंखांतरज्योतिः गर्भयोः अंतरे मध्ये ज्योत
शंखांतरज्योति॥ कथंभूतं विलोचनं॥ अंतर्निविष्टामलपिंगतारं॥ सांनिध्यतोंऽतर्मध्ये निविष्टस्थिताः अमल
नारायणस्य ततः अंतर्निविष्टामलपिंगतारं॥ तदेव विलोचनं॥ हरितालमयता॥ तिलकक्रियायां॥ सांनिध्यपत

...लां सुंनिधेर्नीवन्मानित्यौ॥सन्निधस्य पदः स्मानि धाय सः॥तस्मिन् सोनिध्यवसे॥८॥यथा प्रदेशं भुजंगेश्वरा
...र्थमाणात्सरणांतरं॥शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणिरत्नशोभाः॥७४॥भुजंगेश्वराणां शरीरमा
...तं प्रपेदे॥आपत्सरणतां प्राप्य॥फणरत्नशोभा स्तथैव तस्थुः॥न रूपांतरं प्राप्तुः रत्नानां सतःएव अलंकारत्वं
...द्भूतानी भुजंगेश्वराणां॥यथा प्रदेशं॥यथास्थानं एव वर्तित॥आसरणांतरत्वं करिष्यती॥एकस्मात् आसरणात्
...न्तु॥आसारणांतरं॥तस्य स्वभावः आसरणांतरत्वं॥करिष्यती निकरिष्यंती तास्तेषां करिष्यतां॥८॥दिवापि निष्ठ्यु ११४
...मरीचिरसामा बाल्यादनाविःकृतलांछनेन॥चंद्रेण नित्यं प्रतिसिद्धमौलौ चूडामणौ किं ग्रहणं हरस्य॥७५॥हरस्य
...हरस्य चूडामणौ किं ग्रहणं॥अपितु न किमपि॥कथंभूतस्य हरस्य॥चंद्रेण नित्यं प्रतिसिद्धमौलेः॥प्रतिसिद्धः मौलि
...र्यस्य प्रतिसिद्धमौलिः॥तस्य प्रतिसिद्धमौलेः॥कथंभूतेन चंद्रेण॥बाल्यात्॥बालत्वात्॥अनाविःकृतलांछनेन॥
...॥आविःकृतं लांछनं येन सः अनाविःकृतलांछनः॥तेन अनाविःकृतलांछनेन॥पुनः कथंभूतेन चंद्रेण दिवा

...तेर दिवसेपि निष्ठ्युतमरीचिरसा॥निष्ठ्युता प्रसृता मरीचिरसाः येन स निष्ठ्युतमरीचिरसः तेन निष्ठ्युतमरीचिरसा॥८॥
...अद्भुतेकप्रस्तवः प्रस्तावो प्रसिद्धनेपथ्यविधिर्विधाता॥आत्मानमासन्नगणोपनीते खड्गे निषक्तप्रतिमं ददर्श॥७६॥प्रसि
...रूप्यविधेः विधाता ईश्वरः आत्मानं खड्गे निषक्तप्रतिमं ददर्श॥निषक्ता लग्ना प्रतिमा प्रतिबिंबं यस्य स निषक्तप्रतिमः
...तं खड्गे कथंभूतः॥प्रसिद्धा योऽनेपथ्यविधिः॥मंडनरचना प्रसिद्ध नेपथ्यविधिः॥तस्य प्रसिद्धनेपथ्यविधेः॥कथंभूते खड्गे
...गणोपनीते॥आसन्नगणेन उपनीतः आनीतः तस्मिन्॥आसन्नगणोपनीते॥कथंभूतः॥विधाता ईश्वरः॥इति सर्वे
...णा प्रस्तावात् अद्भुतेकप्रस्तवः॥अद्भुतस्य आश्चर्यस्य एव प्रसवः निधिः॥८॥सगोपतिं नंदिभुजावलंबी शार्दूलचर्म
...पृष्ठं॥तद्भक्तिसंक्षिप्तबृहत्प्रमाणम् आरुह्य कैलासमिव प्रतस्थे॥७७॥स ईश्वरः गोपतिं आरुह्य प्रतस्थे॥कीम
...॥कथंभूतः स ईश्वरः॥नंदिभुजावलंबी॥नंदिनः भुजं अवलंबते॥नंदिभुजावलंबी॥कथंभूतं गोपतिं॥
...ततचारुपृष्ठं॥शार्दूलचर्मणा आवृतं चारु मनोहरं पृष्ठं यस्य स शार्दूलचर्मावृतचारुपृष्ठः॥पुनः कथंभूतं
...तद्भक्तिसंक्षिप्तबृहत्प्रमाणम्॥तस्मिन् ईश्वरे या भक्तिः॥तया संक्षिप्तं संवर्तं बृहत् प्रमाणं येन॥स तद्भक्तिसं

प॰१

...णाम्स्वं तद्भक्तिसेद्धिसहहत्प्रणामं॥७॥तं मातरो देवमनुव्रजंत्यः स्ववाहनक्षोभचलावतंसाः॥सुरवेश्मभ्रा
...रेः पद्माकरं चक्रुरिवांतरिक्षं॥३८॥मातरः देव्यः सुरवेश्म अंतरिक्षं आकाशं पद्माकरमिव चक्रुः पद्मानां
...करः तं पद्माकरं॥किंकुर्वंत्यः मातरः तं देवं अनुव्रजंत्यः॥अनुव्रजंतीति अनुव्रजंत्यः॥पुनः कथंभूताः
...स्ववाहनक्षोभचलावतंसाः॥कथंभूतैः सुरवेश्मप्रभामंडलरेणुगौरैः॥स्ववाहनानां मकरहंसउलूकादीनां क्षोभे
...चलौ अवतंसौ कर्णकुंडले यासां ताः॥स्ववाहनक्षोभचलावतंसाः॥अथवा स्ववाहनानां क्षोभेण चलानि
...शिरोभूषणानि यासां ताः स्ववाहनक्षोभचलावतंसाः॥प्रभाणां दीप्तीनां मंडलैः समूहैः तदेव रेणुः तेन गौराः ११५
...प्रभामंडलरेणुगौरैः॥तासां च पश्चात्कनकप्रभाणां काली कपालाभरणा चकासे॥बलाकिनी नीलपयो
...दूरं पुरःक्षिप्तशतह्रदेव॥३९॥काली तासां मातृणां मध्ये पश्चात् चकासे शुशुभे॥किंविशिष्टानां तासां कन
...प्रभाणां॥कनकवत्सुवर्णवत् प्रभा यासां ताः कनकप्रभाः तासां कनकप्रभाणां॥किंविशिष्टा काली॥कपाला
...भरणा॥कपालान्येव आभरणानि यस्याः सा कपालाभरणा॥उत्प्रेक्ष्यते बलाकिनी नीलपयोदराजिरिव॥बलाका वि

...द्यंते यस्यां सा बलाकिनी॥नीला चासौ पयोदराजिश्च नीलपयोदराजिः॥कथंभूता नीलपयोदराजिः दूरं दूरं पुरः अग्रे
...क्षिप्तशतह्रदा॥क्षिप्ता शतह्रदा विद्युत् यया सा क्षिप्तशतह्रदा॥७॥ततो गणैः शूलभृतः पुरोगैरुदीरितो मंगलतूर्यघोषः
...शृंगाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः॥४०॥ततोनंतरं मंगलतूर्यघोषः सुरेभ्यः सेवावसरं शशंस॥
...मंगलतूर्यघोषः शूलभृतः ईश्वरस्य पुरोगैः गणैः उदीरितः॥पुनः कथंभूतः॥किंकुर्वाणः॥सल
...मेरुशृंगाणि अवगाहमानः॥अवगाहते अवगाहमानः॥७॥उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातप
...त्रं॥तद्दुकूलादविदूरमौलिर्बभौ वहन् गांगमिव प्रवाहं॥४१॥सहस्ररश्मिः सूर्यः तस्य ईश्वरस्य नवं आतपत्रं आददे
...आतपत्रं॥त्वष्ट्रा ब्रह्मणा निर्मितं तद्दुकूलात् अविदूरमौलिः॥स ईश्वरः बभौ॥उत्प्रेक्ष्यते स ईश्वरः गांगं प्रवाहं
...तस्य छत्रस्य दुकूलं तद्दुकूलं तस्मात् तद्दुकूलात् अविदूरे निकटे मौलिर्यस्य स अविदूरमौलिः॥७॥मूर्ते
...गंगायमुने तदानीं सचामरे देवमसेविषातां॥समुद्रगारूपविपर्ययेपि सहंसपाते इव लक्ष्यमाणे॥४२॥सचामरे गं

...सर्वैर्मर्त्यमये देवैर्ईश्वरं आसेवितास्तौ॥ सदृशा अमराश्चाप्योर्वर्त्तते स्म आमरे॥ उत्प्रेक्षते तेन गंगायमुने सदैव पा
...क्षोव॥ सदैव पातास्यो वर्त्तेन सदैव पातो कस्मिन् सत्यपि समुद्रगारूपविपर्ययेपि सति॥ समुद्रगागायाः
...र्यनस्य विपर्ययः॥ नाशनं तस्मिन् समुद्रगारूपविपर्ययेपि सति॥ जलसमयसंस्थानत्यागेपि॥ ७॥ तमखंडग
...विधाता श्रीवत्सलक्ष्मीपुरुषस्य साक्षात्॥ जयेति वाचा महिमानमस्य संवर्द्धयंतो दधिरेपवक्रैः॥ ४३॥ प्रथम
...ता॥ आद्या ब्रह्मा तमीश्वरं अभ्यगच्छत्॥ पुनः श्रीवत्सलक्ष्मा पुरुषः दिसुः साक्षात् तं ईश्वरं अभ्यगच्छत्॥ श्रीवत्स ११६
...लक्ष्म यस्यासौ श्रीवत्सलक्ष्मा॥ किं कुर्वंतौ तौ॥ संवर्द्धयंतौ॥ इति संवर्द्धयंतौ॥ केन कमिव॥ दधि विषादध्येन वह्निमिवाय था
...निः दध्येन घृतेन वर्द्धनं॥ श्रीवत्सः कौस्तुभस्योदर सिलक्षण विशेषः॥ ७॥ एकैव मूर्त्तिर्विभिदे त्रिधा सा सामान्यमेषां
...प्रथमावरत्वं॥ विष्णोर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ॥ ४४॥ असौ मूर्त्तिः एकैव त्रिधा विभिदे
...षां त्रयाणां॥ ब्रह्मविष्णुहराणां॥ प्रथमावरत्वं सामान्यं प्रथमस्य अवरस्य प्रथमावरता तयोर्भावः प्रथमावरत्वं

आद्यलघुत्वं॥ प्राधान्याप्राधान्यं समानस्थत्वावः सामान्यं सदृशं कदाचित् कस्मिंश्चित्समये हरः विष्णोः ईड्यो भवति कदाचि
द्धरिस्तस्य ईश्वरस्य ईड्यो भवति॥ ... भवति॥ कदाचित्तयोर्द्धरः विष्णोः वेधा ब्रह्मा ईड्यो भवति॥ कदाचिद्धरहरौ
अपि धातुर्ब्रह्मणः ईड्यो भवतः॥ ७॥ तं लोकपालाः पुरुहूतमुख्याः श्रीलक्षणोत्सर्गविनीतवेषाः॥ दृष्टिप्रसादेन कृतनंदि
संज्ञा सहदर्शिताः प्रांजलयः प्रणेमुः॥ ४५॥ पुरुहूतमुख्याः इंद्राद्याः लोकपालाः तं ईश्वरं प्रणेमुः॥ पुरुहूत इंद्रः स्य
...पुनः कथंभूताः॥ पुरुहूतमुख्याः॥ श्रीलक्ष्मणोत्सर्गविनीतवेषाः॥ श्रियः लक्षणानि छत्रचामरादीनि तेषां उत्सर्गेण
...विनीतः वेषा येषां ते श्रीलक्षणोत्सर्गविनीतवेषाः॥ पुनः कथंभूताः पुरुहूतमुख्याः॥ दृष्टिप्रदानेन कृतनंदिसंज्ञा
...र्वं अस्मान् ईश्वराय दर्शय॥ दर्शयाः अस्माकं अवसरं कुरु इत्यर्थः॥ पुनः कथं दर्शिताः॥ तेन नंदिना दर्शि
...ताः॥ पुनः कथंभूताः॥ पुरुहूतमुख्याः॥ प्रांजलयः प्रकृष्टो बद्धो अंजलिर्यैस्ते प्रांजलयः॥ दृष्टप्रदानं दृष्टिप्र
दानं ... दृष्टिप्रदानेन हरस्य दर्शनेन कृता येन ताः दृष्टिप्रदानेन कृतनंदिसंज्ञाः॥ ७॥ कंपेन मूर्ध्नः शतपत्रयोनिं वा

…वदणे स्मितेन ॥ आलोकमात्रेण सुरानशेषान् संतावयामास यथा प्रधानं ॥ ४६ ॥ स ईश्वरः स्मर्द्धःकंपेन ॥ बाल
…स्वयोनिं ब्रह्माणं संतावयामास ॥ समतोषयत् ॥ स ईश्वरः वाचा लक्षिं संतावयामास ॥ स ईश्वरः स्मितेन द्र
…हाणे इंद्रं संतावयामास ॥ स ईश्वरः ॥ आलोकमात्रेण दर्शनप्रमाणेन अशेषान् सुरान् संतावयामास ॥ कथं य
…तितथा ॥ प्रधानेयथा स्तवति तथा ॥ प्रधानमनतिक्रम्य यथा प्रधानं ॥ प्रधानानुरूपेण ॥ ॥ तस्मै जयाशी ॥ सस्
…रस्नातु ॥ सप्तर्षिभिः स्नानुस्मितपूर्वमाह ॥ विवाहयज्ञे वितते अत्र यूयं पूर्यवन्पूर्ववृतामयेति ॥ ४७ ॥ सप्तर्षिभिः कर्
…रस्तात् ॥ आदौ जयाशीः समृज्ञे ॥ जयस्य आशीः ॥ जयाशीः ॥ स ईश्वरः ॥ तान् सप्तर्षीन् स्मितपूर्वं यथा स्तवति त ११८
था ॥ इति आह ॥ उवाच ॥ इतीति किं ॥ मया अत्र वितते विस्तृते ॥ विवाहयज्ञे ॥ यूयं कर्म ॥ अध्वर्य ॥ पूर्वं वृता ॥ इति ॥ अध्वर्
…तानुहोतारं इत्यमरः ॥ ७ ॥ विश्वावसुप्राग्रहरैः प्रवीणैः संगीयमान त्रिपुरावदानः ॥ अध्वानमध्वांतविकारलंघ्यस्तूर्णं
तारा धिपखंडधारी ॥ ४८ ॥ ताराधिपखंडधारी ईश्वरः अध्वानं मार्गं ततार ॥ ययौ ॥ कथंभूतः ताराधिपखंडधारी ॥ प्र

वीणैः ॥ दक्षैः ॥ विश्वावसुप्राग्रहरैः संगीयमानं त्रिपुरावदानः ॥ पुनः कथंभूतः ॥ तारा ॰ अध्वांतविकारलंघ्यः ॥ न ध्वांतवि
कारेण लंघ्यः ॥ अध्वांतविकारलंघ्यः ॥ ताराधिपस्य खंडं ताराधिपखंडं धारयतीति ताराधिपखंडधारी ॥ विश्वावसुनामा प्राग्र
हरो अग्रेसरो येषां ते विश्वावसुप्राग्रहराः ॥ तैः विश्वावसुप्राग्रहरैः ॥ संगीयमानं त्रिपुरस्य अवदानं खंडनं यस्य स संगी
यमानत्रिपुरावदानः ॥ ८ ॥ खं खेलगामीतमुवाह वाहः सशब्दचामीकरकिंकिणीकः ॥ तटाभिघातादिवलग्नपंक
…मुहुः प्रोतघनेन विषाणे ॥ ४९ ॥ वाहः वृषः खे आकाशे तं ईश्वरं उवाह ॥ कथंभूतः ॥ वाहः खेलगामी ॥ खेलेन क्री
…डतीति खेलगामी ॥ पुनः कथंभूतः वाहः सशब्दचामीकरकिंकिणीकः ॥ सशब्दाः चामीकरकिंकिण्यः यस्य
…स्य स सशब्दचामीकरकिंकिणीकः ॥ किं कुर्वन् ॥ प्रोतघने विषाणे मुहुः वारंवारं धुन्वन् ॥ प्रोतः घनो यायां
…॥ उत्प्रेक्ष्यते ॥ तटाभिघातात् लग्नपंकं इव ॥ तटस्य अभिघातः तटाभिघातः ॥ तस्मात् तटाभिघातात् ॥ ९
…नः …शात् पराभियोगीनगेंद्रगुप्तं नगरं मुहूर्त्तात् पुरो विलग्नैः दृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणं ॥ ५० ॥ स ई

...त्रानगंइयुक्तैनगरं प्रापत् ॥ कथंभूतं नगरं ॥ असासपरातियोगीन प्रासः परातियोगो येन तत् ॥ असासपराति
...योगं हननं अतियोगः समुद्यमः ॥ परातियोगः न प्राप्तः ॥ परातियोगो येन तत् ॥ असासपरातियोगं अनासादि
...नो इत्यर्थः ॥ पुनः कथंभूतं नगरं ॥ पुरो विलम्बैः दरदृष्टिपातैः कृष्यमाणं ॥ आकृष्यमाणं ॥ ...त्यते सुवर्ण
...कृष्यमाणं ॥ अन्यथा दरस्य कथं शीघ्रप्राप्तिः स्यादिति भावः ॥ ८ ॥ तस्योपकंठे घननीलकंठः कुतूहलादुन्मुख
...ष्टिः ॥ स्वबाणविह्नादवतीर्य मार्गादासन्नरूप्यविष्टमियाय देवः ॥ ९ ॥ देव ईश्वरः तस्य ओष्ठ समीपं उपकंठे स
...समासन्नरूपदृष्टं इयाय ॥ जगाम ॥ इण् गतौ ॥ इपरोक्षा ॥ अट्टावधि ॥ द्विवचने ... पक्षयादी ... मिनामि ... ११८
...दि मूलधातुकाइकारदेयुपेआयू ॥ ध्वंजनमः इयाय ॥ किं कृत्वा ॥ स्वबाणविह्नात् मार्गात् अवतीर्य ॥ अवतरणं पूर्वं अ
...तीर्य ॥ स्वबाणस्य ईश्वरबाणविह्नसंकेताय नसस्वबाणविह्नः तस्मात् स्वबाणविह्नात् मार्गात् आकाशात् आसन्न
...नूदृष्टं आसन्नदृष्टं ॥ नतु आसन्नदृष्टं ॥ कथंभूतः देवः ॥ घननीलकंठः ॥ घनवत् नीलः कंठो यस्य स घननी

...लकंठः ॥ पुनः कथंभूतः देवः ॥ कुतूहलात् कौतुकात् उन्मुखपौरदृष्टः ॥ उन्मुखा ये पौराः उन्मुखपौराः तैर्दृष्टः ॥ उन्मुखपौर
दृष्टः ॥ ८ ॥ तमृद्धिमद्भुजनाधिरूढं दंष्ट्राजानां गिरिचक्रवर्ती ॥ प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः ॥
॥ प्रशाम गिरिचक्रवर्ती हिमाचलः गजानां दंष्ट्रः तं ईश्वरं प्रत्युज्जगाम ॥ तस्य इत्यते स्वैः कटकैरिव ॥ कटकः स्त्री नितंबा
...इत्यमरः ॥ स्वकीयैः शृंगैरिव ॥ कथंभूतैः कटकैः प्रफुल्लवृक्षैः ॥ प्रफुल्ला वृक्षा येषु ते प्रफुल्लवृक्षाः तैः प्रफुल्लवृक्षैः ॥
...तं ... तैः गजानां दंष्ट्रः कृद्धिमद्भुजनाधिरूढं ॥ ऋद्धिमन्तो ये भुजगास्तैः अधिरूढा नितैः भुजनाधिरूढं ॥ कथं
...गिरिः ॥ आगमनप्रतीतः ॥ आगमनेन प्रतीतो हर्षितः ॥ ९ ॥ वर्गोत्तुंगो देवमहीधराणां द्वारे पुरस्योद्घटितापिधाने ॥
...ईरविसर्पिघोषो निल्लकसहं पयसामिवौघो ॥ १० ॥ देवमहीधराणां उत्तेवर्गो पुरस्य द्वारे समीयत्र ॥ कसं
...उद्घटितापिधाने ॥ अपाहनकपाटे ॥ कथंभूतो उत्तो वर्गो दूरविसर्पिघोषो ॥ दूरे विसर्पी घोषो यस्य यः स
...विसर्पिघोषो ॥ उत्त्येव ... पयसां ओघ इव ॥ पूर इव ॥ कथंभूतो पयसां ओघो ॥ निल्लकसहं ॥ निल्लः नदितः

...रणः से उर्वयोः तौ निनैकसे ॥ हरविसर्पि घोषौ ॥ इति जनयविशेषणं ॥ अपिधीनेछाद्यते ॥ अनेनेति
...॥ कपाटं ॥ अवाप्योरुपसर्गयोः ॥ अपिका अकारकोलोपः ॥ ॥ श्रीमान् भूमिधरो हरेण त्रैलोक्यवंद्येन क
...॥ पूर्वं महिम्ना सहितस्य हरमावर्जितं नात्मशिरो विवेद ॥ ५४ ॥ भूमिधरः श्रीमान् लक्ष्मीवान् इत् ॥ त्रैलो
...क्यवंद्येन हरेण कृतप्रणामः ॥ कृतः प्रणामो यस्मै स कृतप्रणामः ॥ हि यस्मात् सहिमाचलः ॥ तस्य ईश्वरस्य महिम्ना
...॥ एवं अन्वयः ॥ सहिमाचलः कर्ता ॥ आत्मशिरः कर्म ॥ न विवेद ॥ कथंभूतं शिरः ॥ पूर्वं आदौ आवर्जितं तस्मात् ॥ आवर्जि
...तं आवर्जितं ॥ कथं यथा स्तवति दूरं यथा स्तवति तथा ॥ अत्यर्थं यथा स्तवति ॥ ॥ सप्रीतियोगाद्विकसन्मुखश्रीः
...मातुरग्रेसरतामुपेत्य ॥ प्रवेशयन्मंदिरमद्भुतमेनमागुल्फकीर्णापणमार्गपुष्पं ॥ ५५ ॥ सहिमाचलः एनं ईश्वरं
...समद्भुतं मंदिरं प्रावेशयत् ॥ किंकृत्वा ॥ मातुः अग्रेसरतां उपेत्य ॥ अग्रेसरस्य भावो अग्रेसरता ॥ तां अग्रेसरतां उपा
...नं पूर्वं उपेत्य ॥ उपसमीपे गमनं उपायनं ॥ कथंभूतः ॥ सहिमाचलः ॥ प्रीतियोगात् विकसन्मुखश्रीः ॥ विकसंती मु ११९

...श्रीर्यस्य स विकसन्मुखश्रीः ॥ ॥ कथंभूतं मंदिरं ॥ आगुल्फकीर्णापणमार्गपुष्पं ॥ आगुल्फं कीर्णानि आपणमार्गे
...षु पुष्पाणि यस्मिन् तत् आगुल्फकीर्णापणमार्गपुष्पं ॥ आपणस्तु निषद्यायां इत्यमरः ॥ निषीदंति अस्यामिति
...॥ ॥ तस्मिन् मुहूर्ते पुरसुंदरीणां ईशानसंदर्शनलालसानां ॥ प्रासादमालासु बभूवुरेवं मुक्तान्यकार्याणि विचेष्टि
...तानि ॥ ५६ ॥ तस्मिन् मुहूर्ते तस्मिन् क्षणे पुरसुंदरीणां प्रासादमालासु विचेष्टितानि चरितानि एवं बभूवुः ॥ कथंभूतानि वि
...तानि मुक्तान्यकार्याणि मुक्तानि अन्यकार्याणि येषु तानि मुक्तान्यकार्याणि ॥ कथंभूतानां पुरसुंदरीणां ॥ ईशानसं
...लालसानां ॥ ॥ आलोकमार्गं सहसा व्रजंत्या कयाचिदुद्वेष्टनवांतमाल्यः ॥ बद्धुं न संभावित एव तावत्करे
...पि द्विकेशपाशः ॥ ५७ ॥ कयाचिन्नायकया तावत् आदौ करेण रुद्धोपि केशपाशः बद्धुं न संभावित एवानं
...बंधनाय बद्धुं ॥ किंकुर्वंत्याः ॥ सहसा झटिति आलोकमार्गं गवाक्षदर्शनपथं व्रजंत्या ॥ कथंभूतः केशपा
...नवांतमाल्यः ॥ उद्वेष्टनेन श्लथनेन वांतं त्यक्तं माल्यं येन ॥ स उद्वेष्टनवांतमाल्यः ॥ ॥ प्रसाधिकालंबित

...माक्षिप्य काचिद्द्रवरागमेव॥ उत्सृष्टलीलागतिरागवाक्षादलक्तकांकां पदवीं ततान॥ ५८॥ कथंचित्प्रसाधिकाले
...पादं आक्षिप्य गवाक्षात् अलक्तकांकां पदवीं ततान॥ कथंभूता काचित् प्रसाधिका॥ उत्सृष्टलीलागतिः॥ उत्सृ-
...गतिर्यया सा उत्सृष्टलीलागतिः॥ कथंभूतं अग्रपादं द्रवरागं॥ द्रवरागो यस्य स तं द्रवरागं॥ प्रसाधिकायां
...प्रसाधिकया आलंबितं प्रसाधिकालंबितं॥ अलक्तस्य अंको यस्यां सा अलक्तकांका॥ तां अलक्तकांकां॥ ७॥ विलो-
...दक्षिणमंजनेन संभाव्य तद्वंचितवामनेत्रा॥ तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहंती॥ ५९॥ अपरा १२०
...च नायका शलाकां वहंती सती तथैव उत्सृष्टलीलागतिः॥ वातायनसंनिकर्षं ययौ॥ वातायनस्य संनिकर्षं
...वातायनसंनिकर्षं॥ किं कृत्वा॥ दक्षिणं॥ विलोचनं अंजनेन संभाव्य॥ संयोज्य॥ संभावनं सर्वसंभाव्य॥ तद्वं-
चितवामनेत्रा॥ तेन अंजनेन वंचितं वामनेत्रं यया सा॥ तद्वंचितवामनेत्रा॥ ८॥ जालांतरप्रेषितदृष्टिरन्या॥ प्रस्थान-
...भिन्नां न बबंध नीवीं॥ नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलंब्य वासः॥ ६०॥ काचित् अन्या नायका॥ प्रस्थानभि-

...नीवीं न बबंध॥ कथंभूता॥ अन्या॥ जालांतरप्रेषितदृष्टिः जालांतरे प्रेषिता दृष्टिर्यया सा॥ जालांतरप्रेषितदृष्टिः॥
...ना तु भिन्ना॥ प्रस्थानभिन्ना॥ तां प्रस्थानभिन्नां॥ केवलं हस्तेन वासः अवलंब्य तस्थौ॥ स्थिता॥ कथंभूतेन हस्तेन
...नाभिप्रविष्टाभरणप्रभेण॥ ९॥ अर्द्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलंती॥ कस्याश्चिदासीद्रसना तद-
...नीं अंगुष्ठमूलार्पितसूत्रशेषा॥ ६१॥ सत्वरमुत्थितायाः कस्याश्चित् रसना॥ तदानीं तस्मिन् अवसरे॥ अंगुष्ठमूला-
र्पितसूत्रशेषा आसीत्॥ अंगुष्ठमूले अर्पितः सूत्रशेषो यस्याः सा अंगुष्ठमूलार्पितसूत्रशेषा॥ किं कुर्वती॥ दुर्निमि-
...ते॥ स्खलंती॥ दुष्टं निमितं निधाने निक्षेपः निहितं दुर्निमितं॥ सत्वरचलनात् दुर्निमितं तस्मिन् दुर्निमिते
...रसना॥ अर्द्धाचिता॥ अर्द्धा चासौ चिता च अर्द्धाचिता॥ १०॥ तासां मुखैरासवगंधगर्भैर्व्याप्तांतराः सांद्रकुतूहला-
...नां॥ विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्॥ ६२॥ तासां मुखैः व्याप्तांतराः गवाक्षाः सहस्रपत्राभ-
रणा इव आसन्॥ व्याप्तं अंतरं मध्यं येषां ते व्याप्तांतराः॥ कथंभूतैः तासां मुखैः आसवगंधगर्भैः॥ आसव-

...सेयेषां तानि तैः श्रामवगंधगर्भैः॥ पुनः कथंभूतैः सुरवैः विलोलनेत्रभ्रमरैः॥ विलोलानि यानि नेत्राणि ता
...येषां तानि तैः॥ विलोलनेत्रभ्रमरैः॥ किंभूतानां तासां॥ सांद्रकुतूहलानां॥ सांद्रं कुतूहलं येषां यासां नाः सां
...नां॥ तासां॥ सांद्रकुतूहलानां॥ सहस्रपत्राण्येवाभरणानि येषां तानि सहस्रपत्राभरणानि॥ ६॥ तावत्प
...कुलमिंदुमौलिरुत्तोरणं राजपथं प्रपेदे॥ प्रासादशृंगाणि दिवापि कुर्वंज्योत्स्नाभिषेकद्विगुणच्छवीनि॥ ६३
...मौलिः॥ ईश्वरः॥ तावत् आदौ उत्तोरणं राजपथं प्रपेदे॥ उत्कटानि तोरणानि यत्र स उत्तोरणस्तं उत्तोरणं॥ राज्ञां पंथा
राजपथः॥ तं राजपथं॥ कथंभूतं राजपथं॥ पताकाकुलं॥ सपताकाभिः आकुलैः पताकाकुलः स्तं पताकाकुलं॥ कथं १२१
भूतं राजपथं॥ किं कुर्वन् सन्॥ प्रासादशृंगाणि दिवापि ज्योत्स्नाभिषेकद्विगुणच्छवीनि कुर्वन् सन्॥ ज्योत्स्नाया अ
भिषेकः स्नानं तेन द्विगुणा छविर्येषां तानि ज्योत्स्नाभिषेकद्विगुणच्छवीनि॥ ६॥ तमेकदृश्यं नयनैः पिबंत्यो नार्यो
...न्नमुर्विषयांतराणि॥ तथा हि शेषेंद्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा॥ ६४॥ नार्यः॥ विषयांतराणि न

...जग्मुः॥ एकस्मात् विषयात् अन्ये विषयाः विषयांतराणि॥ तानि विषयांतराणि॥ किं कुर्वत्यः नार्यः॥ तं ईश्वरं एकं दृश्यं नयनैः
...पिबंत्यः॥ एकमेव दृश्यः एकदृश्यः॥ तं एकदृश्यं॥ तथा हि दृष्टांतमाह॥ आसां स्त्रीणां शेषेंद्रियवृत्तिः सर्वात्मना सम
...चक्षुः प्रविष्टा इव॥ शेषाणि श्रवणादीनि यानि इंद्रियाणि तेषां वृत्तिः आकर्णादिको व्यापारः॥ शेषेंद्रियवृत्तिः॥ ६॥
...नि तपो दुश्चरमेतदर्थमपर्णया पेलवयापि तप्तं॥ तद्दास्यमप्यस्य लभेत नारी सा वत्स्य कृतार्था किमु तांकशय्यां॥ ६५
...वयापि कोमलयापि अपर्णया एतदर्थं ईश्वरार्थं तपस्तप्तं॥ तत् स्थाने युक्तं॥ किं विशिष्टं तपः दुश्चरं॥ दुःखेन चर्यं
...श्वरं॥ या नारी अस्य ईश्वरस्य दास्यं लभेत॥ सा कृतार्था स्यात्॥ तत्र अथवा या अंकशय्यां॥ लभेत तस्याः किं अं
...कशय्या॥ अंकशय्या॥ तां अंकशय्यां॥ ६॥ परस्परेण स्पृहणीयशोभं न चेदिदं द्वंद्वमयोजयिष्यत्॥ अस्मिन्द्वं
...द्वे धातुः पत्युः प्रजानां विफलोऽभविष्यत्॥ ६६॥ प्रजानां पतिर्वेधा यदि इदं द्वंद्वं न अयोजयिष्यत्॥ न
...नं च कथंभूतं द्वंद्वं॥ परस्परेण स्पृहणीयशोभं॥ स्पृहणीया शोभा यस्य तत् स्पृहणीयशोभं॥ तदा प्रजानां

...द्र्येरूपविक्षनयनः वितथः निष्फलः॥ अत्र विषये तु क्रियातिपत्तौ केन्यस्य निष्फलः कुतो होता॥ क्रिया
...तत्क्रिः॥ अतीते लविष्यति॥ लवतीत्यत्र संहिता नित्यादीनि लविष्यंतीत्यादीनि क्रियातिपत्तिः स्यन संज्ञि
...नो क्रियातिपत्तिसंज्ञानि लवंति॥ अनेन प्रकारेण मिलित्वा॥ अद्यतन्या दितो अनुष्ट्व्यादीनि त्यादीनि वचन
...यातिपत्तिसंज्ञानि लवंतीत्यर्थः॥ सा क्रियातिपत्तिर्विलक्षिः अतीतार्थे लविष्यदर्थे च लवत्युदाहरण॥ को॥ नन्समाहुः
...शरीरमनेन दग्धं कुसुमायुधस्य॥ व्रीडादमुं देवमुदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः॥६७॥ अनेन आहुः कुरूप
...परेण कुसुमायुधस्य शरीरं न दग्धं॥ अहं एवं मन्ये॥ कामः अमुं देवं ईश्वरं उदीक्ष्य दृष्ट्वा स्वयं संन्यस्तदेहो जातः॥
...सात् व्रीडात् लज्जायाः॥ आरूढारूढयस्य स आरूढः रूढः तेन आरूढरूपः॥ को॥ अनेन संबंधमवाप्य दिष्ट्या
...प्रार्थितमीश्वरेण॥ मूर्द्धानमालि क्षितिधारणोच्चमुच्चैस्तरां वक्ष्यति शैलराजः॥६८॥ ॥ हे आलि शैलराज
...क्षितिपालनो उंचं मूर्द्धानं उच्चैस्तरां अतिशयेन वक्ष्यति॥ धरयिष्यति॥ वहप्रापणे॥ वक्ष्यति विष्यति कोस्य

...कोऽठःषढोन्कसे कत्वे निमित्तात्य एकस्य संयोगे कः॥ वक्ष्यति सिद्धं॥ क्षितिधारणेन उच्चः तं क्षितिधारणोच्चं॥
...मस्तको स्त्रियाम् इत्यमरः॥ किं कृत्वा॥ अनेन ईश्वरेण सह संबंधं अवाप्य॥ दिष्ट्या शब्दो निपातः॥ आनंदार्थे
...इति वर्द्धामहे॥ कथंभूतं संबंधं॥ मनोरथप्रार्थितं॥ मनोरथेन प्रार्थितं मनोरथप्रार्थितं॥ तं मनोरथप्रार्थि
...केलके॥ को॥ ॥ इत्योषधिप्रस्थविलासिनीनां शृण्वन् कथाः श्रोत्रसुखाः कुमारः त्रिनेत्रः केयूरचूर्णीकृतला
...मुष्टिं हिमालयस्यालयमाससाद॥६९॥ त्रिनेत्रः ईश्वरः हिमालयस्य आलयं आससाद प्राप॥ किं कुर्वन् इति
...प्रकारेण॥ ओषधिप्रस्थविलासिनीनां कथाः शृण्वन्॥ ओषधिप्रस्थस्य या विलासिन्यः ताः ओषधिप्रस्थवि
...लासिन्यः॥ तासां ओषधिप्रस्थविलासिनीनां॥ कथंभूताः कथाः॥ श्रोत्रसुखाः॥ श्रोत्रयोः सुखाः श्रोत्रसुखाः॥ कथंभूतः
...केयूरचूर्णीकृतलाजमुष्टिं॥ केयूरेण चूर्णीकृता लाजमुष्टिर्यस्य स केयूरचूर्णीकृतलाजमुष्टिः॥ ततो
...च्युतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्ष्णः॥ क्रांतानि पूर्वं कमलासनेन कक्ष्यांतराण्यद्रिपतेर्विवेश॥७०॥

नंतरं ईश्वरः अद्रिपतेः हिमाचलस्य कक्षांतराणि विवेश॥ कथंभूतानि कक्षांतराणि॥ कमलासनेन ब्रह्मणा
निकक्षा॥ कक्षाः प्रयत्नात् अवतीर्य॥ कस्मात्॥ कइव॥ शरद्घनात् दीधितिमान् इव॥ चंद्र इव॥ शरदः घनः शरद्घ
नः तस्मात् शरद्घनात्॥ कथंभूतः स ईश्वरः अद्रिपतेः दत्तहस्तः॥ अच्युतेन कृष्णेन दत्तः हस्तो यस्मै स अच्युतदत्तहस्तः॥ अद्रि
पंचश्लोक वचनोतः॥ ८॥ तं चेन्मदेंद्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च॥ गणाश्च गिर्यालयमभ्यगच्छन्
प्रशस्तमारंभमिवोत्तमार्थाः॥ ७१॥ इंद्रप्रमुखाः देवाः तमीश्वरं अन्वगच्छन्॥ अनुपश्चात् गिर्यालयं अभ्यगच्छन् १२३
गिरेः आलयः॥ गिर्यालयः तं गिर्यालयं॥ निकाय्यनिलयालयाः निवीयं तेयस्मिन्निति निकाय्यः॥ निवासः सप्तर्षि
ते साहरमर्षयः चपुनः ईश्वरं अन्वक्रुपश्चात् गिर्यालयं अभ्यगच्छन्॥ च पुनः गणाः नंदिमहाकालप्रभृतयः तं ईश्व
रं कृतमनुपश्चात् गिर्यालयं अभ्यगच्छन्॥ हिमालयगदं अन्वगच्छन्॥ कं कमिव॥ उत्तमार्थाः प्रशस्तकार्याणि
प्रशस्तं आरंभमिव॥ उत्तमाश्च ते अर्थाश्च उत्तमार्थाः॥ प्रशस्तं नियशो निर्मि आरंभं अनुसरंति॥ ८॥ दुकूलवा
दं वधूसमीपं निन्ये विनीतैरवरोधरक्षैः॥ वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चंद्रपादैः॥ ७२॥ विनीतैरवरो
धरक्षैः सो विदल्लाकंचुकिनः॥ कर्तईश्वरः॥ कर्मवधूसमीपं निन्ये॥ वध्वाः समीपः वधूसमीपः तं वधूसमीपं॥ कथंभूतः
दुकूलवासाः॥ सितपट्टांबरधरः॥ दुकूलं वाससी यस्य स दुकूलवासाः॥ अवरोधः अंतःपुरस्य रक्षाः॥ अवरोध
रक्षैः॥ अवरोधरक्षैः॥ केन कमिव॥ नवैश्चंद्रपादैः॥ चंद्रकिरणैः॥ उदन्वान् समुद्रः॥ वेलासकाशमिव॥ वेलायाः सका
शं वेलासकाशं तं वेलासकाशं॥ कथंभूतः उदन्वान् समुद्रः स्फुटफेनराजिः॥ स्फुटा प्रकटा फेनराजिर्यस्य स
स्फुटफेनराजिः॥ ८॥ तत्रेश्वरो विष्टरभाग्यथावत् सरत्नमर्घ्यं मधुमच्च गव्यं॥ नवे दुकूले च नगोपनीतं प्रत्यग्रही
त्सर्वममंत्रवर्ज्यं॥ ७३॥ तत्र श्वशुरगृहे ईश्वरः सरत्नं अर्घं प्रत्यग्रहीत्॥ कथंभूतः यथावत् विष्टरभाक्॥ यथावत् यथा
योग्यं यथायोग्यं॥ विधिवदित्यर्थः॥ च पुनः मधुमत् गव्यं प्रत्यग्रहीत्॥ मधु विद्यते यत्र तत् मधुमत्॥ च पुनः नगोप
नीतं नवे दुकूले प्रत्यग्रहीत्॥ स ईश्वरः सर्वं अमंत्रवर्ज्यं प्रत्यग्रहीत्॥ न मंत्रवर्ज्यं अमंत्रवर्ज्यं॥ अमंत्रवर्ज्यं तत्॥ अमंत्र

॥कथंभूतः स ईश्वरः॥ विष्टरस्थः॥ विष्टरं स्तङ्गते विष्टरस्थः॥ ८॥ तया विरुद्धाननचंद्रकांत्या प्रफुल्लचक्षुःकुमु
मार्या॥ प्रसन्नचेतःसलिलः शिवोऽभूत् संसृज्यमानः शरदेव लोकः॥७४॥ तया कुमार्या पार्वत्या संसृज्यमा
शिवः प्रसन्नचेतःसलिलोऽभूत्॥ प्रसन्नं निर्मलं चेत एव सलिलं यस्य स प्रसन्नचेतःसलिलः॥ संसृज्यते संसृज्य
...कथंभूतया पार्वत्या॥ विरुद्धाननचंद्रकांत्या॥ आननमेव चंद्रः तस्य कांतिः विरुद्धा आननचंद्रस्य कांतिर्यस्याः
...विरुद्धाननचंद्रकांतिः॥ तया विरुद्धाननचंद्रकांत्या॥ कथंभूतः शिवः॥ प्रफुल्लचक्षुःकुमुदः प्रफुल्लानि चक्षूंषि
...कुमुदानि यस्य सः प्रफुल्लचक्षुःकुमुदः॥ उत्प्रेक्षते॥ शरदा संसृज्यमानो लोक इव॥ ८॥ तयोः समापत्तिषु कातराणि
...किंचिद्व्यवस्थापितसंहृतानि॥ ह्रीयंत्रणां तत्क्षणमन्वभूवन्नन्योन्यलोलानि विलोचनानि॥७५॥ तयोः पार्वतीपरमे
...श्वरयोः विलोचनानि तत्क्षणा निह्रीयंत्रणां आनशिरे॥ अन्वभूवन्॥ ह्रियः लज्जायाः यंत्रणा मीलनं ह्रीयंत्रणा तां ह्री
...॥ कथंभूतानि विलोचनानि॥ किंचिद्व्यवस्थापितसंहृतानि॥ किंचिद्व्यवस्थापितानि मिलितानि संहृता

...नि॥ किंचिद्व्यवस्थापितसंहृतानि॥ किंविशिष्टां ह्रीयंत्रणां॥ मनोज्ञां॥ पुनः कथंभूतानि विलोचनानि॥ अन्योन्यलोलानि
...स्य त शिरे॥ अशू व्याप्तौ॥ अशू॥ परोक्षाद्वे वर्णपरोक्षावे॥ अशू॥ द्विर्वचनं॥ अत्यासस्या॥ अस्यादेः सर्वत्र॥ अत्यास का
...॥ ...॥ तस्माच्चागमः॥ परादिरंतश्चसंयोगः॥ आयेनुआगमः॥ नार्चंजनमः॥ आनंजनमः॥ आनशिरे सिद्धं॥ ८॥
...करं शैलगुरूपनीतं जग्राह ताम्रांगुलिमष्टमूर्त्तिः॥ उमातनौ गूढतनोः स्मरस्य तच्छंकिनः पूर्वमिव प्ररोहं॥७६॥
...मूर्त्तिः तस्याः पार्वत्याः करं जग्राह॥ कथंभूतं करं॥ शैलगुरूपनीतं॥ शैलगुरुणा हिमाचलेन उपनीतः आनी
...वि॥ शैलगुरूपनीतं॥ पुनः कथंभूतं करं॥ ताम्रांगुलिं॥ ताम्रा अंगुलयो यस्य स ताम्रांगुलिः तं ताम्रांगुलिं॥ ताम्रं
...रतिव...द्रुते॥ उमातनौ गूढतनोः स्मरस्य पूर्वं प्ररोहमिव॥ अंकुरमिव॥ उमायाः तनुः तस्यां उमातनौ गूढा प्रच्छन्ना त
...तनुर्यस्य स गूढतनुः तस्य॥ गूढतनोः॥ कथंभूतस्य स्मरस्य॥ तच्छंकिनः तस्मात् ईश्वरात् शंका॥ तच्छंकी तच्छंकिनः॥ ८॥
...क्रमः प्रादुरभूदुमायाः स्विन्नांगुलिः पुंगवकेतुरासीत्॥ वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभव

७७॥ उमायाः पार्वत्याः रोमोद्गमः प्रादुरभूत्॥ पुंगवकेतुः ईश्वरः स्विन्नांगुलिः आसीत्॥ पुमांश्चासौ गवश्च पुंगवः
...र्षभस्य पुंगवकेतुः॥ स्विन्नाः अंगुलयो यस्य स स्विन्नांगुलिः॥ तयोः पार्वतीपरमेश्वरयोः पाणिसमागमेन सम
...स्य वृत्तिः समं समकाले विभक्ता इव विभागीकृतेव॥ स्वेदरोमांचादयो द्विकामस्य वृत्तयः॥ पुंगवकेतुः पुमस्य
...गौश्च पुंगवः। गोरतद्धितानिषेधे॥ गोश्राग अतुप्रत्य॥ ओ अवृ थोंऽनमः॥ पुंगवाः॥८॥ प्रयुक्तपाणिग्रहणं यद
...वरं पुष्यति कांतिमय्यां॥ सांनिध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुत तस्य तस्याः॥७८॥ प्रयुक्तपाणिग्र
...परस्य तत्त्वं वधूवरं यत् अग्र्यां कांतिं पुष्यति॥ प्रयुक्तं पाणिग्रहणं यस्य तत् प्रयुक्तपाणिग्रहणं॥ तदानीं तस्मिन् तयोः अनयोः १२५
...सान्निध्ययोगात् तस्य तत् तस्याः श्रीः किं कथ्यते॥८॥ प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे॥ मे
...रुकोपांतेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामं॥७९॥ उदर्चिषः कृशानोः प्रदक्षिणप्रक्रमणात् तन्मि
...थु... कासे॥ तदेवाह॥ अन्योन्यसंसक्तं अहस्त्रियामम् इव॥ अहश्च त्रियामा च अहस्त्रियामं॥ कथंभूतं अहस्त्रियामं॥

...उपांतेषु निकटेषु वर्तमानं॥ भ्रममाणं॥ वर्तते वर्तमानं॥ उत्कटानि अर्चींषि यस्य स उदर्चिः॥ तस्य उदर्चिषः॥८
...दंपती त्रिः परिणीय वह्निमन्योन्यसंस्पर्शनिमीलिताक्षौ॥ तौ कारयामास वधूं पुरोधाः तस्मिन्समिद्धार्चिषि ला
...जमोक्षं॥८०॥ पुरोधाः सा पार्वतीं। तस्मिन् समिद्धार्चिषि वह्नौ लाजमोक्षं कारयामास॥ किं कृत्वा॥ तौ दंपती तं वह्निं त्रि
...परिणीय॥ परिणयनं पूर्वं परिणीय॥ कथंभूतौ तौ दंपती॥ अन्योन्यसंस्पर्शनिमीलिताक्षौ॥ अन्योन्यसंस्पर्शेन निमी
...लिते अक्षिणी याभ्यां तौ अन्योन्यसंस्पर्शनिमीलिताक्षौ॥ सा लाजधूमांजलिमिष्टगंधं गुरूपदेशाद्वदनं निनाय।
...कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे॥८१॥ सा पार्वती। गुरूपदेशात् लाजधूमांजलिं कर्ट वद
...नं निनाय॥ कथंभूतं लाजधूमांजलिं इष्टगंधं॥ इष्टो गंधो यस्य स इष्टगंधः॥ तं इष्टगंधं॥ लाजानां धूमः तस्य
...अंजलिः लाजधूमांजलिः॥ तं लाजधूमांजलिं॥ गुरोः उपदेशः गुरूपदेशः॥ तस्मात् गुरूपदेशात्॥ कपोलसंसर्पि
...लाजधूमांजलिः तस्याः पार्वत्याः मुहूर्तं कर्णोत्पलतां प्रपेदे॥ कपोलयोः संसर्पिणी शिखा यस्य स कपोल

श्रियः॥७॥ नवीषदार्द्रारुणगंडशैलेखमुच्छ्वसिकालीऊनरागमक्ष्णोः॥ वधूमुखं कांतयवावतंसमाचारधूमग्र
हणं॥७८॥ तद्वधूमुखं आचारधूमग्रहणात् कांतयवावतंबरूव॥ कांतः यवावतंसो यस्य तत् कांतयवावतं
मूतं वधूमुखं ईषदार्द्रारुणगंडलेखं॥ ईषन्मूआर्द्रा अरुणा गंडलेखा यस्य तत् ईषदार्द्रारुणगंडलेखं॥ पुनः
वधूमुखं अक्ष्णोः उच्छ्वसिकालीऊनरागं॥ उच्छ्वासीत उच्छ्वसद्वीलकालीऊनरागो यस्य तत् उच्छ्वसिकाली
नरागं॥७॥ वधूं द्विजः प्राह तवैषवत्सेवह्निर्विवाहं प्रतिपूर्वसाक्षी॥ शिवेन सत्रां सह धर्मचर्या कार्या त्वयामुक्तविचा १२६
रेति॥८॥ द्विजः ब्रह्मा वधूं पार्वतीं इति प्राह इतीति किं॥ हे वत्से एषवह्निः तव विवाहे प्रतिपूर्वसाक्षी इति॥ पूर्वसा
क्षीव्राह्मीवर्धवत्से॥ त्वया शिवेन सत्रीसह धर्मचर्या साध्वी॥ व्रतं कार्यं इति कथं भूतया त्वया मुक्तविचारया॥ मुक्तो
विचारोयया सामुक्तविचारा॥ तया मुक्तविचारया॥ निःसंशयं धर्मचरणं कार्यमित्यर्थः॥८॥ आलोचनांतं श्रवणे
वितत्य पीतं गुरोस्तद्वचनं भवान्या॥ निदाघकालोल्वणतापयेव माहेंद्रमंभः प्रथमं पृथिव्याः॥८४॥ भवान्या गुरोः

तद्वचनं पीतं॥ कृतमंगीकृतं॥ किंकृत्वा आलोचनांतं यथा तथा वितत्य॥ श्रवणौ वितत्य॥ दिवर्त्तने पूर्वे वितत्य॥ विस्फार्य॥
लोचनांतं आमर्यादीकृत्य आलोचनांतं॥ नेत्रपर्यंतं॥ कया कमिव पृथिव्याः प्रथमं आदौ माहेंद्रं अंभः इव॥ महेंद्रस्य इदं
माहेंद्रं॥ कथं भूतायाः पृथिव्याः॥ निदाघकालोल्वणतापया॥ निदाघकालेन उल्वणा तापो यस्याः सा तथा॥ निदाघकालोल्वणत
ापया तया निदाघकालोल्वणतया॥८॥ ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन॥ सा दृष्ट इत्याननमुन्नम
य्य ह्रीसन्नकंठी कथमप्युवाच॥८५॥ साक्षीसन्नकंठी पार्वती इति आननं उन्नमय्य कथमपि महता कष्टेन उवाच इति
...॥ सा पार्वती॥ ध्रुवेण शाश्वतेन भर्त्रा॥ ध्रुवदर्शनाय प्रयुज्यमाना॥ कथं भूतेन भर्त्रा प्रियदर्शने
...॥ ध्रुवदर्शनाय क्रियामंत्र कंठगतं यस्याः सा ह्रीसन्नकंठी॥ प्रयुज्यते प्रयुज्यमाना
...ध्याननेपूर्वतन्मम ...के विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ॥ प्रणेमतुस्तौ पितरौ प्रजानां प
...के नस्थायपितामहाय॥८६॥ तौ प्रजानां पितरौ पद्मासनस्थाय पितामहाय ब्रह्मणे प्रणेमतुः पद्मासने तिष्ठती

सनस्थः॥ तस्मै पत्न्या समस्थाय॥ कथंभूतौ तौ॥ [illegible] पूर्वोक्तप्रकारेण विधिज्ञेन। पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ॥
ः पाणिग्रहणोपचारो ययोस्तौ प्रयुक्तपाणिग्रहणोपचारौ॥ तौ प्रयुक्तपाणिग्रहणोपचारौ॥ ८॥ वधूर्द्विजः बा प्र
तेस्म कल्याणि वीरप्रसवा त्वं भवेति॥ वाचस्पतिः सन्नपि सोष्टमूर्तौ आशास्य चिंतास्तिमितो बभूव॥ ७॥ द्विजः बा
वधूः पार्वती इति प्रतिनंद्य तस्मा इत्वी तिकिं हे कल्याणि त्वं वीरप्रसवा त्वं वा वीरप्रसूर्भवेति वीरप्रसवा॥ सन्
स्पतिः सन्नपि अष्टमूर्तौ ईश्वरे आशास्य चिंतास्तिमितो बभूव॥ आशास्यस्य आशीर्वादस्य चिंता आशास्य चिंता त
या स्तिमितः। निश्चलः। आशास्य चिंतास्तिमितः॥ वाचां पतिः वाचस्पतिः॥ ८॥ कृतोपचारौ च चतुरस्त्रवेदीं तौ [illegible] आकनका १२७
स्थौ। जायापती लौकिकमेषितव्यम् आर्द्राक्षतारोपणम् अन्वभूतां॥ ७॥ तौ जायापती कृतोपचारौ चतुरस्त्रवेदीत्य
[illegible]ाय आर्द्राक्षतारोपणम् अन्वभूतां॥ आ[illegible]ः॥ आर्द्राणि यानि अक्षतानि तेषां आरोपणं आर्द्राक्षतारोपणं त
आर्द्राक्षतारोपणं॥ चतुरस्त्रा सा चासौ वेदिश्च चतुरस्त्रवेदिः तां चतुरस्त्रवेदिं। वेदिः परिष्कृता भूमिरित्यमरः। क

दं तौ तौ हे॥ कनकासनस्थौ॥ कनकस्य आसने तिष्ठतीति कनकासनस्थौ॥ कृतः रचितः उपचारो याभ्यां तौ कृतोपचा
रौ तां कृतोपचारौ॥ ८॥ पत्रांतलग्नैर्जलबिंदुवृंदैराकृष्टमुक्ताफलजालशोभं॥ तयोरुपर्यायतनालदंडमाधत्त ल
क्ष्मीः स्वयमातपत्रं॥ ७॥ लक्ष्मीः स्वयं तयोर्द्वयोः उपरि कमलातपत्रं आधत्त। कमलमेव आतपत्रं कमलातपत्रं तत्
कमलातपत्रं। किं विशिष्टम् आतपत्रं। आयतनालदंडं॥ आयतो दीर्घः नालमेव दंडो यस्य तत् आयतनालदंडं। पुनः
कथंभूते आतपत्रे। पत्रांतलग्नैः जलबिंदुवृंदैः आकृष्टमुक्ताफलजालशोभं। आकृष्टा आकर्षिता मुक्ताफलजालशो
भा येन तत्। आकृष्टमुक्ताफलजालशोभं॥ पत्रस्य अंते प्रांते लग्नानि तैः पत्रांतलग्नैः जलानां बिंदवः तेषां वृंदानि
तैः जलबिंदुवृंदैः॥ ८॥ द्विधा प्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव॥ संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्य
निबंधनेन॥ ७॥ सरस्वती द्विधा प्रयुक्तेन वाङ्मयेन तन्मिथुनं नुनाव॥ वाचां विकारो अवयवो वा वाङ्मयं। गद्यपद्यं तेन
[illegible] द्वाभ्यां प्रकाराभ्यां द्विधा॥ द्विधा प्रयुक्तं द्विधाप्रयुक्तं तेन द्विधाप्रयुक्तेन। द्विधा अव्ययं॥ केन किमित्याह सारस्व

ञ्कारपूतेन।संस्कारेण वरेण्यं वरं॥ईश्वरं तु नाव॥सरस्वती सुखग्राह्या।निबंधनेन।प्राकृतेन।वधूं पार्वतीं तु नाव सु
न्त्यै।निबंधनेयस्यास्तु नू।सुखग्राह्या निबंधनं।तेन सुखग्राह्यनिबंधनेन॥९०॥तौ संधिषु व्यंजितवृत्तिभेदं रसांतरे
बद्धरागं।अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललितांगहारं॥९१॥तौ दंपती अप्सरसां आद्यं प्रधानं।प्रय
न्नः।अपश्यतां॥कथं यथा नवति मुहूर्तं मुहूर्तमात्रं यथा स्यात्तथा॥कथंभूतं प्रयोगं।संधिषु मुखप्रतिमुख
गर्भविमर्शनिर्वहणाख्येषु।व्यंजितवृत्तिभेदं।व्यंजितः वृत्तिभेदः प्रकटीकृतः वृत्तीनां भेदः कैशिक्यारभटादीनां भेदो
येन यत्र स व्यंजितवृत्तिभेदः।तं व्यंजितवृत्तिभेदं।पुनः कथंभूतं प्रयोगं।रसांतरेषु प्रतिबद्धरागं।रसानां शृंगार
दीनां अंतराणि।मध्यानि।तानि रसांतराणि तेषु रसांतरेषु।प्रतिबद्धः अवस्थापितः रागो रसः यत्र।सतं प्रतिबद्धरा
गं पुनः कथंभूतं प्रयोगं।ललितांगहारं॥ललितः सुकुमारः अंगहारो नृत्यं यत्र सतं ललितांगहारं स तं ललितांगहा
देवास्तदंते हरमूढभार्यं किरीटबद्धांजलयो निपत्य।शापावसानप्रतिलब्धमूर्तेर्ययाचिरे पंचशरस्य सेवां॥९२॥ १२८॥

दंते तस्यांते ऊढभार्यं हरं निपत्य।कथंभूताः देवाः।किरीटबद्धांजलयः।किरीटे मुकुटे बद्धा अंजलयो यैस्ते किरीट
बद्धांजलयः।कथंभूतस्य पंचशरस्य।शापावसानप्रतिबद्धमूर्तेः।शापस्य अवसानं शापावसानं शापप्रांतं तत्र प्र
तिलब्धा मूर्तिर्येन स शापावसानप्रतिलब्धमूर्तिः तस्य शापावसानप्रतिलब्धमूर्तेः॥९२॥तस्यानुमेने भगवान्विमन्युर्व्या
पारमात्मन्यपि सायकानां।काले प्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति॥९३॥विमन्युर्भगवांस्तस्य
स्य सायकानां व्यापारं आत्मनि अनुमेने।प्रयुक्तायमर्थः॥कार्यविद्भिः कार्यज्ञैः प्रयुक्ता विज्ञापना सिद्धिं एति। १२०
विगतः मन्युर्यस्मात्सो विमन्युः।मन्युर्दैन्ये क्रतौ क्रुधि।इत्यमरः॥९३॥अथ विबुधगणांस्तानिंदुमौलिर्विसृज्य क्षि
तिधरपतिकन्यामाददानः करेण।कनककलशरक्षाभक्तिशोभासनाथं क्षितिविरचितशय्यं कौतुकागारमागात्
॥९४॥अथ अनंतरं इंदुमौलिः।तान् विबुधगणान् विसृज्य।कौतुकागारं मंगलांतःपुरं।आगात्।किं कुर्वाणः।क्षिति
धरपतिकन्यां करेण आददानः॥कथंभूतं कौतुकागारं।कनककलशरक्षाभक्तिशोभासनाथं।पुनः कथंभूतं कौतुकागारं।

विरचितशय्यं॥कनककलशाश्चरक्षाश्चभक्तिश्चतासांशोभा।तयासनाथं।युक्तंतत्॥कनककलशरक्षाभक्तिशोभासना
थं॥पुनःकथं।क्षितौविरचिताशय्याशयनीयंयस्मिंस्तत्क्षितिविरचितशय्यं॥७॥नवपरिणयलज्जाभूषणांतत्र
वदनमपहरंतींतत्कृताक्षेपमीशः॥अपिशयनसखीभ्योदत्तवाचंकथंचित्प्रमथमुखविकारैर्हासयामासगू
ढं॥ईशःमहादेवः।तत्रतस्मिन्शय्यागृहे।गौरींभवानींगूढंयथातथाहासयामास॥कथंभूतांगौरीं।नव
परिणयलज्जाभूषणां॥नवश्चासौपरिणयश्चनवपरिणयः।नवपरिणयात्लज्जासैवभूषणंयस्याःसा।नवप १२९
रिणयलज्जाभूषणातां।नवपरिणयलज्जाभूषणां॥पुनःकथंभूतां।गौरीं॥वदनंअपहरंतीं।पश्चात्कुर्वतीं॥कथंभू
तं।तत्कृताक्षेपं॥तेनईश्वरेणकृतःआक्षेपोयस्याःतत्तत्कृताक्षेपं॥पुनःकथंभूतां॥शयनसखीभ्योपिकथंचि
त्कष्टेनदत्तवाचं॥दत्तावाक्वचनंययासादत्तवाक्।तांदत्तवाचं॥शयनार्थंसख्यः।शयनसख्यःताभ्यः
सखीभ्यः॥कैः।प्रमथमुखविकारैः॥प्रमथानांयेमुखविकाराःकटाक्षनिरीक्षणभ्रूभंग्यादिकाःतैःप्रमथमुख

विकारैः॥९४॥ ॥इतिश्रीकुमारसंभवेमहाकाव्येवल्लभकृतायांटीकायांसप्तमःसर्गः॥ ॥७॥ ॥श्री॥ ॥समाप्तोयंग्रंथः॥

विरंद
ैं।।तु
दिव=
रुणा।।
सर
ख
सो
गां
अ